# BENARES SANSKRIT SERIES;

A

COLLECTION OF SANSKRIT WORKS

EDITED BY THE

PANDITS OF THE BENARES SANSKRIT COLLEGE,

UNDER THE SUPERINTENDENCE OF

G. THIBAUT, PH. D.

*No. 142.*

श्रीमद्भागवतदशमस्कन्धस्थरासपञ्चाध्यायीव्याख्या।

# गूढार्थदीपिका।

पण्डितवर—श्रीधनपतिसूरिकृता।

श्रीमदाचार्यश्रीवल्लभाधीश्वर-श्रीविठ्ठलनाथदीक्षितशुद्धाद्वैत-
संप्रदायविदुषा रत्नगोपालभट्टेन परिशोधिता।

# GÛDHÂRTHADÎPIKÂ,

A Commentary on Râsa Panchâdhaâyî

of the Tenth Chapter of Srîmad Bhâgawata,

BY PANDIT DHANAPATI SÛRI

EDITED BY RATNA GOPÂL BHATTA.

*Fasciculus II.*

BENARES:

*Published by the Proprietors Messrs. Braj B. Das & Co.*

AND SOLD BY H. D. GUPTA,

*Secretary, Chowkhamba Sanskrit Book-Depot.*

**Printed at the Vidyâ Vilâs Press.**

**BENARES.**

**1908.**

# सूचीपत्रम् ।

| | रु० | आ० | पा० |
|---|---|---|---|
| गणपाठः | ० | ४ | ० |
| गोलप्रकाशः | २ | ८ | ० |
| गंगालहरी | ० | १ | ० |
| गुरसारणी | ० | ४ | ० |
| जातकतत्त्वम् | ० | १२ | ० |
| तत्त्वदीप | ० | १ | ० |
| तर्कसंग्रहः | ० | १ | ० |
| दत्तकमीमांसा | ० | ८ | ० |
| धर्मशास्त्रसंग्रहः | ० | १ | ६ |
| धातुपाठः ( शिला -) ) | ० | २ | ० |
| धातुरूपावली | ० | १ | ६ |
| परिभाषापाठः | ० | ० | ६ |
| पाणिनीयशिक्षा भाष्यसहिता | ० | २ | ० |
| प्रथम परीक्षा | ० | २ | ० |
| प्रथमपुस्तक हिन्दी | ० | १ | ० |
| प्रश्नभूषणम् ( प्रश्न विचार का बहुत उत्तम ग्रन्थ ) | ० | ४ | ० |
| बीजगणितम् (म० म० पं० सुधाकरकृतटिप्पणीसहित) | १ | ८ | ० |
| मनोरमा शब्दरत्नसहिता ( टाइप ) | ७ | ० | |
| मुहूर्तमार्तण्डः | ० | ८ | ० |
| लघुकौमुदी टिप्पणीसहिता | ० | ४ | ० |
| लघुकौमुदीभाषाटीका (पं० मथुराप्रसादमिश्र कृत) ( टिप्पणीसहित ) | ४ | ० | |
| लीलावती ( म० म० पं० सुधाकरकृतटिप्पणीसहित ) | १ | ० | ० |
| वसिष्ठसिद्धान्तः | ० | १ | ६ |
| विष्णु सहस्रनाम | ० | १ | ० |
| व्याकरणकौमुदी (उपक्रमणिका का दूसरा भाग ) | १ | ० | ० |
| शब्दरूपावली | ० | ० | ६ |
| शृङ्गार सप्तशती | १ | ८ | ० |
| समासचक्रम् | ० | १ | ० |
| समासचन्द्रिका | ० | १ | ० |
| सरस्वतीकण्ठाभरणम् | ३ | ० | ० |
| साङ्ख्यचन्द्रिका टिप्पणीसहिता | ० | ८ | ० |
| सिद्धान्तकौमुदी ( पं० वामनाचार्येण संशोधिता ) | २ | ० | ० |
| सिद्धान्तमुक्तावली दिनकरीटिप्पणीसहिता | २ | ८ | ० |
| उपसर्गवृत्ति | ० | १ | ० |
| क्षेत्रकौमुदी | ० | ६ | ० |
| क्षेत्रसंहिता | १ | ० | ० |

अस्थास्म स्पृष्टवसस्तत्प्रभृति अन्यस्य समक्षे स्थातुमपि न पारयामः शक्नुमः । इतः परं तत्समक्षे स्थितिः कोटिनरकखेदादप्यऽधिकखेदं करोतीति सूचनाय बतेत्युक्तम् । किञ्च, नैतावन्मात्रम्, अपि तु त्वयाभिरमिता बालभावमारभ्य त्वया सार्द्धं त्वत्प्रसादात् क्रीडामपि लब्धवत्यः। अम्बुजमन्तःकरणकमलमश्नुते व्याप्नोतीत्यम्बुजाक्षः । तथाचान्तःकरणवृत्तिज्ञस्त्वं सर्वं जानन्नपि किमेवमाग्रहं करोषीति सम्बोधनाशयः । स्वस्य भगवत्पादतलस्पर्शयोग्यतामपि सूचयन्ति ॥ क्वचिदरण्यजनाः प्रिया यस्य । तथाच वयमप्यरण्यजनत्वात् क्वचिदस्थास्मेति भावः । इतःपरमन्यत्र क्वापि स्थातुमशक्ता इत्यत्र हेतुमाहुः ॥ रमाया लक्ष्म्या दत्तोत्सवं दत्तावसरं वा । तदपि क्वचिदेव, न सर्वदा । तथाच रमाया अपि यत् प्रार्थ्यं दुर्लभं चेदं पादतलं स्पृष्ट्वाऽन्यसमक्षे स्थातुमस्माकं का शक्तिरिति भावः । यद्वा, हे अम्बुजाक्ष दृष्ट्यैव तापनिवारक, यथा लक्ष्म्या चाञ्चल्यं विहायैतत्प्राप्तं तथाऽस्माभिरपि सर्वतश्चाञ्चल्यं परित्यज्य तत्प्राप्तये तदेकनिष्ठतैव संपादनीयेत्याशयेनाहुः ॥ रमाया इति ॥ किञ्च, अरण्यजनप्रियस्य सर्वसङ्गविनिर्मुक्तेषु वने स्थित्वा तवाराधनपरेष्वेव तव प्रीतिदर्शनात् तवप्रीत्यर्थं तत्साम्यमेवास्माकमपि संपादनीयमित्याशयः । किञ्च, स्वान्ये सर्वदा त्वयाऽभिरमिता अपि जाताः । अन्यथा जीवनस्यैव दुर्लभत्वात् । तस्माद्वयमन्यत्र गन्तुं प्रेषयितुं च न समुचिता इति भावः॥ क्वचिदज्ञ इति पाठस्तत्राज्ञः सर्वभावेन स्थातुमित्यर्थः । अनभिज्ञापक्षे, ननु कामाग्नितप्तानां यदि गृहकुलेषु नास्ति शक्तिस्तथापि कुलाङ्गनानां युष्माकं पतिसान्निधावेव स्थातुमुचितमतः स्वपतीनेवोपगच्छत, त एवैनं कामाग्निमपि सिञ्चेयुरिति चेत्तत्राहुः॥ यर्हीति॥ हे अम्बुजाक्ष ? तव नेत्रकमलदर्शनक्षणमारभ्यैव वयं भ्रमरीभूय स्थिताः

स्मेत्युत्पन्नचक्षूरागेण लब्धचित्तासङ्गादिकाः किमेवं ब्रवीषि। चक्षूरागः प्रथमं चित्तासङ्गस्ततोऽथ संकल्प * इति रसशास्त्रं किं न जानासीति भावः। तत्राऽपि यर्हि अस्मद्भाग्योदयक्षणे कदाचिदेव क्वचिदपि दुर्लभे गोवर्द्धनादिकुञ्जप्रदेशे त्वया अभिरमिता निजभावव्यञ्जनयाभिनन्दितवत्यस्तत्र पादमूलमस्प्राक्ष्म करेण संवाहनाऽऽद्यर्थं कुचाभ्यां वा स्पृष्टवत्यो, यतो रमायाः, जातावेकवचनं, रमणीनां दत्तोत्सवम्। यद्वा, यद्वाञ्छया श्रीर्ललनाऽऽचरत्तप * इति नागपत्नीनां मुखाच्छ्रुतत्वाद् रमाया वैकुण्ठवासिन्या लक्ष्म्या नारायणप्रियाया अपि रमणाभिकाङ्क्षिण्या उत्सवदायकम्। तथास्माकं तदभिलाषे, किं चित्रमिति भावः। स्वस्य योग्यत्वेन दुर्लभत्वमाशङ्क्याहुः॥ अरण्यजना गोपादय एव प्रिया यस्य। यद्वा, रमणीनामुत्सवजनकस्य कादाचित्कत्ववर्णनमसङ्गतमित्याशङ्क्याहुः॥ अरण्यजनाः पुलिन्द्यः प्रिया यस्य। तथाच पुलिन्द्यादिषु दर्शनादिना प्रीतिजनकस्य पादतलस्पर्शोऽस्माकं दुर्लभ इति भावः। अहो रमण अस्मान् विहाय तादृशानां प्रीतिं प्रयच्छसीत्युपालम्भोऽपि व्यज्यते। तत्प्रभृति अन्यदर्शनमपि न रोचते। तथाच कोऽप्युच्चाटनमन्त्ररूपस्तव पादतलमात्रस्पर्श एवेति भावः। अञ्ज इति पाठे, ननु भो मिथ्यावादिन्यो व्रजं वसथवेति चेत् तत्राहुः॥ अञ्जः = अनायासेन, तथाच तत्र बलाद् वसामो, न तु प्रीत्येति भावः॥ मानिनीपक्षे, नन्वङ्गस्पर्शादिना कामाग्निमुद्दीपयित्वा संप्रत्येवं वक्तुं प्रवृत्ता इत्याशङ्क्याहुः॥ यर्हीति॥ बाल्ये त्वदङ्गस्पर्शः कदाचित् कृतः स्यात्, परन्तु यत्प्रभृति तव पादतलं रमणीनां दत्तक्षणं जातं तत्प्रभृति कथञ्चिदपि कदाचिदपि नाऽस्प्राक्ष्म। यतो वाऽरण्यजनप्रियस्य वानरादिप्रियस्य सतः, त्वया कथादिना अभिरमिता अपि। अत एवान्येषां श्वश्रूप्रमुखानां समक्षं स्थातुं पारयाम। अन्यथा

तैर्द्विष्येमहीति भावः । अम्बुजवद्विशालनेत्रस्यास्मत्स्वभावं पश्यतो नैवं प्रार्थनमुचितमिति संबोधनाशयः । यद्वा, यदि तव पादतलं वय-मस्प्राक्ष्म तर्हि तत्प्रभृति अन्यसमक्षं स्थातुमपि न पारयाम । बतेति खेदे । तथा सति महान् खेदः स्यादिति भावः। न तु तथा जातमतो महत् कुशलमित्यर्थः । पादतलस्पर्शमात्रस्य यदा इयं कथा तदा त्वयाऽभिरमितानां जायमानस्तु खेदो वाचामप्यगोचर इत्य-भिप्रायेण त्वयाभिरमिता इत्युक्तम् । ननु मदङ्गस्पर्शवतीनां मया-भिरमितानां प्रतिदिनमानन्दास्वादनपराणां तत्समक्षावस्थाने किं प्रयोजनमित्याशङ्कानिवृत्त्यर्थमुक्तं, रमाया दत्तक्षणम् । तथाचैवंविध-पादस्य तवगर्वावश्यम्भावादखर्वगर्ववतीभिरस्माभिः सङ्गलः स्था-यित्वासम्भवात् तादृशस्य सुखस्य तथाविधदुःखकारणत्वसम्भ-वान्नैवमिति भावः । तत्राप्यरण्यजनप्रियस्य रमणविरोधिभाववत-स्तयाचोभयभ्रष्टत्वसम्पादकं तव पादतलस्पर्शादिकमिति भावः ॥

निवृत्तिपक्षे, ननु मया सिक्तोऽपि यथोक्तवादिकल्पितदुस्त-कैर्निर्वापणं यास्यतीति चेत् तत्राहुः ॥ यर्हीति ॥ हे अम्बुजाक्ष सर्वहृत्कमलव्याप्त ! यदा तव प्रसादोदयकाले प्राप्तसाधनसम्पदा-धिकारिणा विचारिता वयं तव पादतलमस्प्राक्ष्म तत्प्रभृति नान्य समक्षं स्थातुमपि पारयाम । ब्रह्मातिरिक्तं किमपि पारमार्थिकं न प्रतिपादयामः । आपाततोऽर्थान्तरप्रतीतावपि अन्तस्तात्पर्येणा-न्यपरत्वं नास्तीत्यर्थः । तत्रापि त्वया परमात्मना अभिरमिता त्व-य्येव समन्वयं प्राप्ताः । ननु तथापि, यतो वा इमानि भूतानि जायन्त इत्यादिश्रुतीनां सविशेषपरत्वमेवावसीयते । निर्विशेषस्य निर्व्यापारस्य जगत्कर्तृत्वाद्यसम्भवादित्याशङ्कानिरासायोक्तं—क्व-चिद्रमाया आपातरम्याया महामायाया दत्तक्षणं, न तु सर्वत्र सर्वदा च । तथा शाखाग्रन्यायेन तासां सविशेषे वा, निर्विशेष एव

तात्पर्यम् । यश्चोरः स स्थाणुरितिवद् यो जगत्कर्तृत्वादिविशिष्टः स निर्विशेषः परमात्मेति जगत्कर्तृत्वादेर्निर्विशेषब्रह्मलक्षणकत्वे नाऽस्ति कश्चिद्विरोधः । दृग्दृश्यसम्बन्धानिरूपणान्मायासम्बन्धो ब्रह्मणि न वास्तव इति भावः । ननु श्रुतवेदान्तानामपि यथापूर्वसंसारानुवृत्तिदर्शनात् कथमुच्यते पुनरन्यपरत्वमस्माकं नास्तीत्याशङ्कानिवृत्त्यर्थमुक्तम्—अरण्यजनाप्रियस्य ॥ तथाच विवेकवैराग्यादिसाधनविधुरत्वच्चरणारविन्दानभिमुखस्येयं कथा, न तु सर्वसाधनसंपदलंकृतस्येति भावः ॥ ३६ ॥

ननु रमाया दत्तक्षणमित्युक्त्या, तद्वद् अस्मानप्यङ्गीकुर्विति भवतीभिः सूचितम् । परन्तु लक्ष्म्या दैवगत्या जातो यः सम्बन्धः स तु प्राथमिको, भवतीनां तु न तथेत्यतः किं करोमीतिचेत् तत्राहुः ॥

श्रीर्यत्पदाम्बुजरजश्चकमे तुलस्या
लब्ध्वापि वक्षसि पदं किलभृत्यजुष्टम् ॥
यस्याः स्ववीक्षणकृतेऽन्यसुरप्रयास-
स्तद्वद्वयं च तवपादरजः प्रपन्नाः ॥ ३७ ॥

श्रीरिति ॥ श्रीर्यथा यत्पादाम्बुजरजश्चकमे कामयते स्म, तद्वद्वयमपि तव पादरजः प्रपन्नाः । तथाच श्रीरपि न दैवगत्या भवन्तं प्राप्तवती, किन्तु महता तपसेति भावः । तत्रापि तुलस्या सपत्न्या सह । न चाङ्गसङ्गालाभात् सापत्न्यमप्यङ्गीचकार, अपि तु भक्त्यतिशयादेवेत्याशयेनाहुः ॥ वक्षसि पदं लब्ध्वाऽपि तुलस्या एवासाधारणामिति वा । तथाच परमोत्कृष्टस्वतन्त्रस्थलं प्राप्यापि तादृशं रजो यच्चकमे तद्भक्त्यतिरेकविजृम्भितमिति भावः । ननु

कुत एवमित्याशङ्क्य रजसो माहात्म्यमाहुः ॥ भृत्यैर्नारदादिभिः सर्वैरपि तदेवानन्यतया सेवितम् ॥ किलेति प्रसिद्धम् । नाऽत्र किंचिद्वक्तव्यम् । रज एवैवंविधसामर्थ्यं, यत् तत्र संलग्नचेतसः पुनरन्यत्र गमनासम्भवसम्पादनं, नान्यस्यातो लक्ष्मीर्वक्षसि पदं लब्ध्वापि कदापि चेतसोऽन्यत्र प्रवृत्तिर्न भवेन्नाप्यन्यस्य कस्यापि स्पर्श इति मनसि निधाय यद्रजश्चकम इति भावः । ननु लक्ष्म्याः कुत एतावद्भयमित्यत आहुः ॥ यस्या लक्ष्म्याः स्वस्य वीक्षणकृते श्रीरस्मान् करुणया पश्यत्वित्येतदर्थमन्येषां सुराणां ब्रह्मादीनां प्रयासः । सर्वपुरुषार्थानां तदधीनत्वात् । तथाच बहवो मां प्रार्थयन्ते । काश्चित् कदाचिदत्यन्तं यदि तपः कुर्यात् तर्हि स को वेद किं कुर्यादिति विचारवशात्तस्यास्तावद् भयमिति भावः । तद्वद् वयमपि प्रार्थनावतां बहुत्वमालोक्य तद्भयात् प्रथममेव तव पादरजः प्रपन्नाः । तस्मादस्मदर्थमेवावतीर्णो भवानात्मानं न गोपय गोपनाऽसम्भवादतो माऽस्त्वाग्रह इति भावः । यद्वा, तव पादस्पर्शस्य को वा तादृशो महिमेति चेत् तत्राहुः ॥ श्रीरिति ॥ यद्वा, ननु चरणस्पर्शादेव भवत्यः कृतार्थाः किमर्थमङ्गसङ्गार्थं विकलचित्ताः । किञ्चाङ्गसङ्गमवाप्य पुनश्चरणस्पर्शो भक्तिर्न भविष्यति । नचैवं का हानिरिति भ्रमितव्यम् । तस्या एव परमपुरुषार्थत्वादित्याशङ्क्याहुः ॥ श्रीरिति ॥ तथाच भगवत्पादरज एव तथाविधं यथा वक्षःस्थलनिवासिनी श्रीरपि तदेव चकमे । परमभक्तायास्तुलस्याश्च तदेवाऽसाधारणं स्वाश्रयैश्च सर्वैर्भृत्यैस्तदेव जुष्टम् । तस्मात् तत्प्रतिबन्धकमङ्गसङ्गाभिलाषं निवर्त्य तदेकशरणत्वमेवाश्रयिष्याम इति भावः ॥ अनभिज्ञापक्षे, ननु सौन्दर्यादिगुणसम्पन्नाः शोभनकुलोत्पन्ना महिषीपदयोग्याः किमेवं ब्रूथेत्याशङ्क्य महिषीपदापेक्षयेदमुत्कृष्टमिति लक्ष्मीदृष्टान्तेन समाधानमाहुः ॥ श्रीरिति ॥ यद्

यस्माल्लक्ष्मीर्नारायणस्य पदाम्बुजरजो यथा चकमे तद्वद्वयं नारायणसदृशस्य तव पादरजः प्रपन्नाः । यद्वा यस्य नारायणस्य तद्वत् तत्तुल्यस्य तवेति वा । नारायणसमो गुणैरिति * गर्गोक्त्या तव नारायणसमत्वेऽस्माकं लक्ष्मीसमत्वमर्थादागतमिति भावः । तत्रापि वक्षसि परमोत्कृष्टस्थले पदं रमणीभावं लब्ध्वाऽपि तुलस्याः सपत्न्याः पदमपि भृत्यैर्जुष्टं पुरुषजनसमुदाययुक्तमपि । तथाच तस्या यथा प्रेयसीभावसमुचितां लज्जां स्वन्यूनतां चाविगणय्य दासीभावोऽभिलषितस्तथैवास्माकमपि । यद्यप्येवं न, तथापि त्वं नारायणवन्नाचरसि, वक्षःस्थलोद्वहनयोग्या अस्मान् स्वपादतलसन्निधौ स्थातुमपि न ददास्यतो दग्धललाटा वयं किं कुर्म इति भावः। ननु लक्ष्मीवत्त्वमपि युष्मासु प्राप्तमित्याशङ्क्याह ॥ यस्या इति ॥ तथाच या पुत्रतुल्यान् सुरादीनपि ययाकयाचिच्छक्त्याऽनुगृह्णाति सा चञ्चलेति मूर्खप्रवाद इति भावः । श्रीः पदाऽम्बुजरजश्चकमे, वयं तु पादरज इत्युक्त्या श्रियः स्ववासस्थानोपमसादृश्योपाधिकसेवनमस्माकं तु निरुपाधिकमिति व्यज्यते । यद्वा, ननु स्वस्वपतिवक्षःस्थलरमणयोग्याः कथं दासीभावं प्रार्थयन्ते ? इत्याशङ्क्य, यद्यदाचरति श्रेष्ठस्तदेवेतरो जन * इति न्यायमवलम्ब्य समाधानमाहुः ॥ श्रीरिति ॥ स्वभर्तुर्नारायणस्य वक्षसि पदं लब्ध्वापि लब्धनारायणपादसम्बन्धया तुलस्या सह, यस्य तच्च वृन्दावनसम्बन्धि पदाम्बुजरजश्चकमे । तत्सेवनाऽर्थं वृन्दावनशोभारूपेण प्रेयोवक्षसि रेखारूपेण श्रीरत्रास्ते । तुलस्यपि वृन्दाख्यदेवीरूपेण वृन्दारूपेण चाऽऽस्ते इति भावः। तस्मात् परमपतिव्रताया लक्ष्म्या यदेवं दशा तदानीं वयं कथं, भर्तुः शुश्रूषणमित्याद्युपदेशार्हा इत्यपि ध्वनितम् ॥ मानिनीपक्षे, ननु श्रीवृन्दे अपि स्वपतिं त्यक्त्वाऽत्र वने मम सन्निधौ तिष्ठतः, यूयं किमित्येवंविधं

मानं कर्तुं प्रवृत्ता इति चेत् तत्राहुः ॥ यद्यपि श्रीर्वृन्दया सहाऽत्र स्थितं ते पादरजश्चकमे तद्वद्वयं किं पादरजः प्रपन्नाः !! अपि तु नेति काक्वा योज्यम् । तयोरेव तद्युक्तं नास्माकमिति भावः । यद्वा, यस्य नारायणस्य पदाम्बुजरजः श्रीश्चकमे, तद्वद्वयं = तेन नारायणेन तुल्या वयम्, अत एव तादृशलक्ष्म्यादिप्रार्थनीयं पादरजः सम्पन्नास्तव लक्ष्म्यादिसदृशस्य तुल्या आराधनीया इति भावः ॥

निवृत्तिपक्षे लक्ष्म्यादिवत् स्वस्य भगवत्परायणत्वमाहुः ॥ श्रीरिति ॥ तथाच श्र्यादिसमस्ताराध्यपादपद्मे समस्तश्रुतितात्पर्य्यविषयं परमात्मनि सर्वभावेन रतिः सम्पाद्येति भावः ॥ ३७ ॥

तथाच भगवदेकभोग्यशरीराणामस्माकं मनोरथं पूरयेति पश्चिमदिग्गताः प्रार्थयन्ते ॥

तन्नः प्रसीद वृजिनार्दन तेऽङ्घ्रिमूलं
प्राप्ता विसृज्य वसतीस्त्वदुपासनाऽऽशाः ॥
त्वत्सुन्दरस्मितनिरीक्षणतीव्रकाम-
तप्तात्मनां पुरुषभूषण ! देहि दास्यम् ॥ ३८ ॥

तन्न इति ॥ यस्माद्वयं भवत्पादरज एव प्रपन्नाः । प्रपत्तिश्च भवत्प्रसादं विना दुर्लभा । तस्मात् प्रसीद प्रसन्नो भव । त्वयि प्रसन्ने किमपि नावशिष्यत इति भावः । ननु दुःखप्रदं मत्सङ्गमप्रतिबन्धकं दुरदृष्टं भवतीनां वर्तते। तत्र मया किं कर्तव्यमिति चेत् तत्राहुः ॥ हे वृजिनार्दन ॥ सकलदुःखनिदानभूतदुरितविनाशन स्मरणादिनापि समस्तपापतृणदावानलस्य तवाभिमुख्यं प्राप्तानामस्माकं पापनिवारणे को भार इति भावः ।एतेन स्वपत्यादित्याग-

कृतमपि पापं नाशयेति सूचितम् । सर्वधर्मान् परित्यज्य मामेकं शरणं व्रज * अहं त्वां सर्वपापेभ्यो मोक्षयिष्यामि मा शुचः * तावद्रागादयः स्तेनास्तावत् कारागृहं गृहम् * तावन्मोहोऽङ्घ्रिनिगडो यावत् कृष्ण न ते जनाः * इत्यादिशास्त्रात् । अथ स्वस्य प्रसादादियोग्यतामाहुः ॥ तेऽङ्घ्रिमूलं प्राप्ता इति ॥ ननु स्त्रीणां स्वभावः—ईश्वरादपि प्रसन्नाद् गृहस्थाश्रमसुखमेव प्रार्थयन्ति । ततस्तदनुकूलः किं प्रसादोऽपेक्षित इतिचेत् तत्राहुः ॥ वसतीर्विसृज्येति ॥ गृहस्थाश्रम एवास्माभिस्त्यक्तो, न तु गृहमात्रमिति सूचनाय वसतीरिति बहुवचनम् । यतो वयं, त्वदुपासनाऽऽशाः भगवदुपासनां करिष्याम इत्येवंविधा आशा यासां ताः । न तु तज्जन्यं सुखमस्माकमपेक्षितम् । तथाच गन्धपुष्पादिनोपासनपराणामनन्यभक्तानामिवावर्जनीयतया प्राप्ते सुखोपभोगे न कश्चिद्दोष इति भावः । यद्वा, तवोपास्यस्योपासनस्य नाशो यासु ता वसतीः । तथाचाभीप्सितानुकूल एव प्रसादो युक्तो, न तु तत्प्रतिकूलः । तस्मादितः परं गृहसम्बन्धिवार्ताऽपि न विधेया । तत्र प्रेषणं तु दूरनिरस्तमिति भावः । एवं भगवन्तमभिमुखीकृत्य प्रार्थ्यमावेदयन्ति ॥ त्वदिति ॥ हे पुरुषभूषण दास्यं देहि । अधिकारिभेदेन दास्यस्यानेकविधत्वात् तद्रूपं स्वतापोक्त्याऽभिव्यञ्जयन्ति— तव सुन्दरं परमानन्दजनकं यत् स्मितपूर्वकं निरीक्षणं तेन तीव्रो यः कामस्तेन तप्तान्तःकरणानामस्माकम् । तथाचैतत्तापनिवर्तकदास्यं देहीति भावः । दास्यस्य स्वव्यापारसाध्यस्य, देहीति प्रार्थनया यथोक्ततापनिवृत्तेस्तद्द्वारत्वात् तस्याश्च त्वदधीनत्वाद् यथाऽस्माकं तन्निवृत्त्यर्थं त्वदपेक्षा तथा तवास्मदपेक्षायां स्वयमुद्यम्यास्मदुपभोगः कार्यः । प्रभुणा ह्यपेक्षितवस्तुनि दत्ते दास्यं भवतीति भावः । ननु किमिदं कामोपाधिकं दास्यं प्रार्थ्यते, शुद्धमेव तत् प्रार्थ्यतामिति

चेत् तत्राहुः ॥ पुरुषभूषणेति ॥ पुरुषो भूत्वा भूषणरूप ! तथाच भूषणं यथा कण्ठादौ धार्य्यते तथा पुरुषाकारभूषणरूपस्त्वमपि धारणयोग्यस्तस्मान्मणिखचितभूषणधारणे लाक्षाधारणवन्मध्ये कामोपभोगो, न तु तदुपाधिकृतं दास्यमिति भावः । यद्वा, तत् तस्मान्नः प्रसीद । हे वृजिनार्दन ! स्वप्राप्तिप्रतिबन्धकं पापं नाशय । यतः ॥ प्राप्ता विसृज्य वसतीरिति ॥ तस्मात् तव सुन्दरस्मितस्य नितरामीक्षणेन चिन्तनेन तीव्रो भजनाभिलाषस्तेन तप्तात्मनां तपःसपन्नचित्तानां दास्ये लब्धाधिकाराणामस्माकं लक्ष्म्या इवाऽस्मद्योग्यं दास्यं देहि । यतो हे पुरुषेषु भूषण! तवापीदमेव योग्यम् । अस्माकं च कामोपाधिकृतोऽपि तव सम्बन्धोऽलङ्कारायैवेति भावः॥ अनभिज्ञापक्षे, नारायणसमो गुणैरित्युक्तत्वात् त्वं नारायणगुणधारणे योग्यो, वयं च तद्भक्तगुणधारण इत्याशयेनाहुः ॥ तदिति ॥ यस्मात् त्वं नारायणसमस्तस्मान्नस्तद्भक्ततुल्या अस्मान् प्रसीद । ननु प्रसन्न एवाहमस्मि, स्वस्मिन्मम कोपो भवतीभिः कदा दृष्ट इति चेत्, तत्राहुः ॥ हे वृजिनार्दन, दुःखविध्वंसकर । ननु नाऽस्ति भवतीनां किमपि दुःखम् । गृहाद्युपद्रवजनितदुःखहेत्वऽसुरादिविनाशाय ममोद्युक्तत्वात् । तस्मात् किमित्येवं दैन्यमाविष्कुरुतेति चेत्तत्राहुः ॥ त इति ॥ तथाच गृहादिकं महाग्निज्वालया प्रज्वलतु, तिष्ठतु वा । नाऽस्ति अस्माकं तत्प्रयुक्तं किमपि दुःखं, सुखं वेति भावः । ननु भवत्वेवं, यदर्थं वसतीर्विसृज्य मदङ्घ्रिमूलं प्राप्तास्तादेव याच्यतामिति चेत् तत्राहुः ॥ त्वदुपासनाऽऽशाः ॥ तवोपासनायां सेनायां श्लेषेण, उप आसङ्गेन स्थितिरूपा आशा यासां, न तूपासनया दास्यमाने कस्मिंश्चित्सुखे ताः । त्वत्सुखार्थमङ्गसङ्गदानादिरूपोपासनापराणामस्माकमप्यवर्ज्जनीयतया प्राप्तेन सुखोपभोगेन, को दोषः इति भावः । ननु तादृशमुपासनं तु स्वपतेरेव

संभवति। न चाऽहं युष्माकं पतिः।नन्वस्तु संप्रति विवाह इति चेन्न। उपनयनरहितस्य मम सम्प्रति विहानविकारात्। विवाहितानां भवतीनामपि तदयोगाच्चेत्याशङ्क्याहुः ॥ त्वदिति ॥ तादृशकामतप्तात्मनामप्यस्माकं दास्यं दासीभावमेव देहि।तथाच न वयं विवाहाऽर्थिन्यः, किन्तु दास्याऽर्थिन्य एवाऽतस्तवोपनयनादिराहितत्वेऽस्माकं च कन्यात्वे परोढत्वे वा न काऽपि हानिः। सर्वथाऽपि दास्यसम्भवादिति भावः।यद्वा, हे वृजिनार्दन! अस्माकं विरहदुःखदानमनुचितमिति भावः। न चाऽस्त्यस्मद्दुःखनाशे कश्चन तव प्रयास इत्याशयेन सम्बोधयन्ति ॥ हे सुन्दरस्मितनिरीक्षण ॥ एतावतैवास्मद्दुःखनिवृत्तिरिति भावः । यतस्त्वत्र त्वत्त एव यस्तीव्रः कामस्तेन तप्तात्मनाम् । अतस्त्तापनिवृत्त्यर्थं विकसितमुखपङ्कजो भूत्वा दास्यमात्रं देहि, न तु बहु प्रार्थयाम, यद्भयादेवंस्वरूपमात्मानं कृतवानसीति भावः। किञ्च, काममहोदधिभूतत्वादेव स्त्रीलम्पटस्य तवास्माभिर्युवतिभिः स्वाङ्गरूपार्पणं सुखजनकमतस्तत्सेवनप्रार्थनाऽपि त्वदर्थमेवेत्याशयेन सम्बोधयन्ति ॥ हे पुरुषभूषण ॥ यद्वा गौराङ्गीनामस्माकमलङ्कारार्थं पुरुषाकारमिन्द्रनीलमणिमयं भूषणं विधात्रा रचितम् । तस्मात् स्वोत्पत्तिसार्थक्यायाऽस्मत्कण्ठसंलग्नता त्वयाऽवश्यं सम्पाद्येति नर्म व्यञ्जयन्ति ॥ हे पुरुषभूषणेति ॥ मानिनीपक्षे, ननु लोकोत्तरपरमसौन्दर्य्याकृष्टचेतसः स्त्रियो मद्दास्यं प्रार्थयन्ति । भवत्यस्तु स्वामित्वमपि मत्प्रार्थनयापि नैवाङ्गीकुरुथेति महानन्याय इत्याशङ्क्याहुः ॥ तदिति ॥ तत् तस्मान्नः प्रसीद । अहंग्रहमसुमर्धं च त्यज। हे वृजिनार्दन । सर्वदुःखच्छेदकस्यापि दुःखानुच्छेदनमनुचितमिति भावः । यद्वा, वृजिनार्दनस्य तव स्वदुःखानिवारणमनुचितमिति भावः । यद्वा वृजिनं दुःखमर्दयति प्रार्थयतीति । तथाच दुःखोदर्कं वस्तु न प्रा-

ऽर्थनीयमिति भावः । यतो निरपेक्षाऽपेक्षा केवलं दुःखायैव भवतीत्याशयेनाहुः ॥ नेति ॥ वसतीर्विसृज्य त्वदुपासनाऽऽशा वयं तवाङ्घ्रिमूलं न प्राप्ताः । तस्मात् त्वत्सुन्दरास्मितनिरीक्षणतप्तात्मनामेव दास्यं देहि, न त्वस्माकं स्वामिनीभावमप्रार्थितत्वात् । न ह्यप्रार्थितमनुत्तममपि वस्तु कस्याचिदुपादेयं भवतीति भावः । पुरुषानेव भूषयति । तथाच सक्तकामसन्तप्तचित्तो यदि जातोऽसि तर्हि गोपवधूरूपेण गोपान् भूषयेति भावः । यद्वा, शरीरमात्रमस्माकं तव सविधे वर्तते, मनस्तु स्वस्वगृहमेव प्रविष्टम् । अत एवाग्रहेणात्रावस्थाने कृतेऽपि नास्ति किञ्चित्फलमित्याहुः ॥ तदिति ॥ तत् तस्मादितः परमस्मासु प्रसाद एव विधेयो, न तु वृथाग्रहः । न चेदं तवोचितं, स्वपरदुःखजनकत्वादस्य कर्मण इत्याशयेन सम्बोधयन्ति ॥ हे वृजिनार्दनेति ॥ मत्सन्निधानेता स्थिता इति न भ्रमितव्यम् । वयं तु तेऽङ्घ्रिमूलं विसृज्य, वसतीः प्राप्ताः । नन्वतच्चित्तानां त्वदुपासनं सम्भवति । यतस्त्वदुपासस्य समीपावस्थानादिरूपोपासनस्य नाशो यासु । अतः स्वाभाविकास्मत्सुन्दरास्मितादिना तीव्रकामाक्रान्तता तव नोचितेति सूचयन्त्यः सम्बोधयन्ति ॥ हे सुन्दरास्मितनिरीक्षणतीव्रकाम ॥ नेदं पुरुषरत्नानां लक्षणमपि तु पुरुषापसदनामतः पुरुषभूषणस्य तव नेदमुचितमिति भावेन सम्बोधयन्ति ॥ हे पुरुषभूषणेति ॥ तस्मात् पुरुषभूषणस्य तव त्वदर्थं तप्तात्मनामपि स्त्रीणां स्त्रीभावदानमयोग्यम् । किञ्चिद्दानावश्यकत्वे दास्यमात्रं दातुमुचितमित्याशयेनाहुः ॥ त्वत् त्वद्वियोगात् तप्तात्मनामपि दास्यमात्रं देहि । सर्वथा विमुखाभिस्तु भापगमपि तव नोचितमित्यर्थः ॥

निवृत्तिपक्षे, अथ य एषोऽन्तरादित्ये हिरण्मयः पुरुषो दृश्यते हिरण्यश्मश्रुर्हिरण्यकेश आप्रणखात् सर्व एव सुवर्णस्तस्य

यथा कप्यासं पुण्डरीकमेवमक्षिणी, तस्योदिति नाम, स एष सर्वे-भ्यः पाप्मभ्य उदित, उदेति ह वै सर्वेभ्यः पाप्मभ्यो य एवं वेदे त्याद्याः श्रुतयः परमात्मानमेवोपास्यमावेदयन्ति ॥

तदिति ॥ यस्मात् सर्वश्रुतितात्पर्य्यविषयो भवानेव तस्माद् उपासनापरा अस्मानपि प्रसीद । अस्मत्तात्पर्य्यविषयत्वमात्मनः स्वीकुरु । यतो हे वृजिनार्दन ! सर्वपापासंस्पर्श ! निर्विशेष-त्वात् तथात्वेनोपासितस्त्वमुपासकस्य दुःखमात्रबीजभूतं पापमात्रं नाशयसि । स एष सर्वेभ्यः पाप्मभ्य उदित इति सर्वपाप्मापगम उक्तः । स च परमात्मन एव सम्भवति । आत्माऽपहतपाप्मेत्यादि-श्रुत्यन्तरात् । उदेति ह वै सर्वेभ्यः पाप्मभ्यो य एवं वेदेति तदु-पासनात् सर्वपापनिवृत्तिः कथितेति भावः । ननु हिरण्यश्मश्रुरि-त्यादिरूपश्रवणाद्, य एषोऽन्तरादित्ये पुरुष इत्याधारश्रवणाच्च कथं रूपादिप्रतिपादनपराणां श्रुतीनां परमात्मपरत्वमऽशब्दमस्प-र्शमरूपमव्ययं, स भगवः कस्मिन् प्रतिष्ठितः स्वे महिम्नि, आकाश-वत् सर्वगतश्च नित्य इत्यादिश्रुत्या रूपादिरहितब्रह्मस्वरूपावगमा-दित्याशङ्क्याहुः ॥ तं इति ॥ वसतीरापाततः प्रतीयमानपरमेश्वरा-तिरिक्तप्रतिपाद्यरूपा विसृज्य तेऽङ्घ्रिमूलं प्राप्ता, यतस्त्वदुपासना-याम् आशा आशयो यासां ता वयम् । तथाच परमेश्वरस्यापीच्छा-वशात् साधकानुग्रहार्थं मायामयरूपादिस्वीकारो न विरुद्ध्यते । प्रकृतिं स्वामधिष्ठाय सम्भवाम्यात्ममायया ॥ माया ह्येषा मया सृष्टा यन्मां पश्यति नारद ॥ सर्वभूतगुणैर्युक्तं न मां पश्यन्ति सूरय इत्यादिस्मृतेः । अशब्दमित्यादिशास्त्रं निरस्तसर्वविशेषज्ञेय-ब्रह्मपरम् । सर्वकर्मा सर्वकामः सर्वगन्धः सर्वरसः हिरण्यश्मश्रुरि-त्यादिशास्त्रमुपास्यब्रह्मपरम् । तथा स्वमहिमप्रतिष्ठस्याधारविशेषोप-देशोऽप्युपासनार्थो न विरुद्ध्यत इति भावः । तस्मादनुग्रहाऽर्थं

प्रकटितलावण्यसागरविग्रहस्य तव सुन्दरस्मितस्य निरीक्षणे यो तीव्रकामोऽभिलाषस्तेन तप्तात्मनां जीवानां, हे पुरुषोत्तम दास्यं देहि । त्वदनुग्रहं विना तव दास्यस्य दुर्लभत्वात् । तेन विनोद्धाराऽसम्भवात् । तत्प्रदानेन जीवानुद्धरेति भावः । यद्वा, तव सुन्दरं यत् स्मितं चराचरात्मकं निरीक्षणं भूतात्मकं च जगत् तत्र तीव्रो यः कामस्तेन तप्तात्मनाम् । तथाच तादृशतापनिवृत्त्यर्थं त्वदास्यं देहीत्यर्थः । निःश्वसितमस्य वेदा वीक्षितमेतस्य पञ्च भूतानि * स्मितमेतस्य चराचरमस्य च सुप्तं महाप्रलय इत्यभियुक्तवाक्ये चराचरादेर्भगवत्स्मितादिरूपेण निरूपणं द्रष्टव्यम् ॥ ३८ ॥

ननु यदि निरुपाधिकप्रेमवशो भवत्यस्तर्हि सालोक्यादिफलं प्रार्थ्यतां, किमर्थं दास्यं प्रार्थ्यत इत्याशङ्क्याहुः ॥

वीक्ष्यालकावृतमुखं तव कुण्डलश्रि
गण्डस्थलाधरसुधं हसितावलोकम् ॥
दत्ताऽभयं च भुजदण्डयुगं विलोक्य
वक्षः श्रियैकरमणं च भवाम दास्यः ॥ ३९ ॥

वीक्ष्येति ॥ इदं सर्वं वीक्ष्य दास्य एव भवाम । तत्र सारूप्यं नास्माकमपेक्षितम् । यतोऽलकैः समानरूपैस्तदुपलक्षितैः । समानरूपैर्भ्रमरैश्चावृतं मुखम् । तथाच सारूप्यं गतानामपि या भक्तिरवशिष्यते तदर्थिन्यो वयमिति भावः । तथा सामीप्यापेक्षामपि वारयन्ति ॥ कुण्डलाभ्यां श्रीः शोभा यस्य, तयोःश्रीर्यस्मादिति वा । तथाचाऽत्यन्तसमीपयोस्तत्र प्रमाणभूतसांख्ययोगरूपयोः कुण्डलयोरपि यदा मुखावलोकनपरत्वं तदान्यस्य का कथेति भावः । गण्डौ विशालौ सुधापानार्थं स्थले यस्मिन्, तथा अधरे

# सूचीपत्रम् ।

| | रु० | आ० | पा० |
|---|---|---|---|
| गणपाठः | ० | ४ | [illegible] |
| गोलप्रकाशः | २ | ८ | ० |
| गंगालहरी | ० | १ | ० |
| गुरसारणी | ० | ४ | ० |
| जातकतत्त्वम् | ० | १२ | ० |
| तत्त्वदीप | ० | १ | ० |
| तर्कसंग्रहः | ० | १ | ० |
| दत्तकमीमांसा | ० | ८ | ० |
| धर्मशास्त्रसंग्रहः | ० | १ | ६ |
| धातुपाठः ( शिला -) ) | ० | २ | ० |
| धातुरूपावली | ० | १ | ६ |
| परिभाषापाठः | ० | ० | ६ |
| पाणिनीयशिक्षा भाष्यसहिता | ० | २ | ० |
| प्रथम परीक्षा | ० | २ | ० |
| प्रथमपुस्तक हिन्दी | ० | १ | ० |
| प्रश्नभूषणम् ( प्रश्न विचार का बहुत उत्तम ग्रन्थ ) | ० | ४ | ० |
| बीजगणितम् (म० म० पं० सुधाकरकृतटिप्पणीसहित) | १ | ८ | ० |
| मनोरमा शब्दरत्नसहिता ( टाइप ) | ७ | ० | |
| मुहूर्तमार्तण्डः | ० | ८ | ० |
| लघुकौमुदी टिप्पणीसहिता | ० | ४ | ० |
| लघुकौमुदीभाषाटीका (पं० मथुराप्रसादमिश्र कृत) ( टिप्पणीसहित ) | ४ | ० | |
| लीलावती ( म० म० पं० सुधाकरकृतटिप्पणीसहित ) | १ | ० | ० |
| वसिष्ठसिद्धान्तः | ० | १ | ६ |
| विष्णु सहस्रनाम | ० | १ | ० |
| व्याकरणकौमुदी (उपक्रमणिका का दूसरा भाग ) | १ | ० | ० |
| शब्दरूपावली | ० | ० | ९ |
| शृङ्गार सप्तशती | १ | ८ | ० |
| समासचक्रम् | ० | १ | ० |
| समासचन्द्रिका | ० | १ | ० |
| सरस्वतीकण्ठाभरणम् | ३ | ० | ० |
| साङ्ख्यचन्द्रिका टिप्पणीसहिता | ० | ८ | ० |
| सिद्धान्तकौमुदी ( पं० वामनाचार्येण संशोधिता ) | २ | ० | ० |
| सिद्धान्तमुक्तावली दिनकरीटिप्पणीसहिता | २ | ८ | ० |
| उपसर्गवृत्ति | ० | १ | ० |
| क्षेत्रकौमुदी | ० | ६ | ० |
| क्षेत्रसंहिता | १ | ० | ० |

अस्प्राक्ष्म स्पृष्टवन्तस्तत्प्रभृति अन्यस्य समक्षे स्थातुमपि न पारयामः शक्नुमः । इतः परं तत्समक्षे स्थितिः कोटिनरकखेदादप्यऽधिकखेदं करोतीति सूचनाय बतेत्युक्तम् । किञ्च, नैतावन्मात्रम्, अपि तु त्वयाभिरमिता बालभावमारभ्य त्वया सार्द्धं त्वत्प्रसादात् क्रीडामपि लब्धवत्यः। अम्बुजमन्तःकरणकमलमश्नुते व्याप्नोतीत्यम्बुजाक्षः । तथाचान्तःकरणवृत्तिज्ञस्त्वं सर्वं जानन्नपि किमेवमाग्रहं करोषीति सम्बोधनाशयः । स्वस्य भगवत्पादतलस्पर्शयोग्यतामपि सूचयन्ति ॥ क्वचिदरण्यजनाः प्रिया यस्य । तथाच वयमप्यरण्यजनत्वात् क्वचिदस्प्राक्ष्मेति भावः । इतःपरमन्यत्र क्वापि स्थातुमशक्ता इत्यत्र हेतुमाहुः ॥ रमाया लक्ष्म्या दत्तोत्सवं दत्तावसरं वा । तदपि क्वचिदेव, न सर्वदा । तथाच रमाया अपि यत् प्रार्थ्यं दुर्लभं चेदं पादतलं स्पृष्ट्वाऽन्यसमक्षे स्थातुमस्माकं का शक्तिरिति भावः । यद्वा, हे अम्बुजाक्ष दृष्ट्यैव तापनिवारक, यथा लक्ष्म्या चाञ्चल्यं विहायैतत्प्राप्तं तथाऽस्माभिरपि सर्वतश्चाञ्चल्यं परित्यज्य तत्प्राप्तये तदेकनिष्ठतैव संपादनीयेत्याशयेनाहुः ॥ रमाया इति ॥ किञ्च, अरण्यजनप्रियस्य सर्वसङ्गविनिर्मुक्तेषु वने स्थित्वा तवाराधनपरेष्वेव तव प्रीतिदर्शनात् तव प्रीत्यर्थं तत्साम्यमेवास्माकमपि संपादनीयमित्याशयः । किञ्च, स्वान्ये सर्वदा त्वयाऽभिरमिता अपि जाताः । अन्यथा जीवनस्यैव दुर्लभत्वात् । तस्माद्वयमन्यत्र गन्तुं प्रेषयितुं च न समुचिता इति भावः ॥ क्वचिदञ्ज इति पाठस्तत्राञ्जः सर्वभावेन स्थातुमित्यर्थः । अनभिज्ञापक्षे, ननु कामाग्नितप्तानां यदि गृहकुलेषु नास्ति शक्तिस्तथापि कुलाङ्गनानां युष्माकं पतिसान्निधावेव स्थातुमुचितमतः स्वपतीनेवोपगच्छत, त एवैनं कामाग्निमपि सिञ्चेयुरिति चेत्तत्राहुः ॥ यर्हीति ॥ हे अम्बुजाक्ष ? तव नेत्रकमलदर्शनक्षणमारभ्यैव वयं भ्रमरीभूय स्थिताः

स्मेत्युत्पन्नचक्षूरागेण लब्धचित्तासङ्गादिकाः किमेवं ब्रवीषि। चक्षूरागः प्रथमं चित्तासङ्गस्ततोऽथ संकल्प * इति रसशास्त्रं किं न जानासीति भावः।तत्राऽपि यर्हि अस्मद्भाग्योदयक्षणे कदाचिदेव क्वचिदपि दुर्लभे गोवर्द्धनादिकुञ्जप्रदेशे त्वया अभिरमिता निजभावव्यञ्जनयाभिनन्दितवत्यस्तव पादमूलमस्प्राक्ष्म करेण संवाहनाऽऽद्यर्थं कुचाभ्यां वा स्पृष्टवत्यो, यतो रमायाः, जातावेकवचनं, रमणीनां दत्तोत्सवम्। यद्वा, यद्वाञ्छया श्रीर्ललनाऽऽचरत्तप * इति नागपत्नीनां मुखाच्छ्रुतत्वाद् रमाया वैकुण्ठवासिन्या लक्ष्म्या नारायणप्रियाया अपि रमणाभिकाङ्क्षिण्या उत्सवदायकम्। तथास्माकं तदभिलाषे, किं चित्रमिति भावः। स्वस्य योग्यत्वेन दुर्लभत्वमाशङ्क्याहुः॥ अरण्यजना गोपादय एव प्रिया यस्य। यद्वा, रमणीनामुत्सवजनकस्य कादाचित्कत्ववर्णनमसङ्गतमित्याशङ्क्याहुः॥ अरण्यजनाः पुलिन्द्यः प्रिया यस्य। तथाच पुलिन्द्यादिषु दर्शनादिना प्रीतिजनकस्य पादतलस्पर्शोऽस्माकं दुर्लभ इति भावः। अहो रमण अस्मान् विहाय तादृशानां प्रीतिं प्रयच्छसीत्युपालम्भोऽपि व्यज्यते। तत्प्रभृति अन्यदर्शनमपि न रोचते। तथाच कोऽप्युच्चाटनमन्त्ररूपस्तव पादतलमात्रस्पर्श एवेति भावः। अञ्ज इति पाठे, ननु भो मिथ्यावादिन्यो व्रजे वसथैवेति चेत् तत्राहुः॥ अञ्जः = अनायासेन, तथाच तत्र बलाद् वसामो, न तु प्रीत्येति भावः॥ मानिनीपक्षे, नन्वङ्गस्पर्शादिना कामाग्निमुद्दीपयित्वा संप्रत्येवं वक्तुं प्रवृत्ता इत्याशङ्क्याहुः॥ यर्हीति॥ बाल्ये त्वदङ्गस्पर्शः कदाचित् कृतः स्यात्, परन्तु यत्प्रभृति तव पादतलं रमणीनां दत्तक्षणं जातं तत्प्रभृति कथञ्चिदपि कदाचिदपि नाऽस्प्राक्ष्म। यतो वाऽरण्यजनप्रियस्य वानरादिप्रियस्य सतः, त्वया कथादिना अभिरमिता अपि। अत एवान्येषां श्वश्रूप्रमुखानां समक्षं स्थातुं पारयाम। अन्यथा

तैर्द्विष्येमहीति भावः । अम्बुजवद्विशालनेत्रस्यास्मतत्त्वभावं पश्यतो नैवं प्रार्थनमुचितमिति संबोधनाशयः । यद्वा, यदि तव पादतलं वयमस्प्राक्ष्म तर्हि तत्प्रभृति अन्यसमक्षं स्थातुमपि न पारयाम । बतेति खेदे । तथा सति महान् खेदः स्यादिति भावः। न तु तथा जातमतो महत् कुशलमित्यर्थः । पादतलस्पर्शमात्रस्य यदा इयं कथा तदा त्वयाऽभिरमितानां जायमानस्तु खेदो वाचामप्यगोचर इत्यभिप्रायेण त्वयाभिरमिता इत्युक्तम् । ननु मदङ्गस्पर्शवतीनां मयाभिरमितानां प्रतिदिनमानन्दास्वादनपराणां तत्समक्षावस्थाने किं प्रयोजनमित्याशङ्कानिवृत्त्यर्थमुक्तं, रमाया दत्तक्षणम् । तथाचैवंविधपादस्य तवगर्वावश्यम्भावादखर्वगर्ववतीभिरस्माभिः सङ्गलः स्थायित्वासम्भवात् तादृशस्य सुखस्य तथाविधदुःखकारणत्वसम्भवान्नैवमिति भावः । तत्राप्यरण्यजनप्रियस्य रमणविरोधिभाववतस्तथाचोभयभ्रष्टत्वसम्पादकं तव पादतलस्पर्शादिकमिति भावः ॥

निवृत्तिपक्षे, ननु मया सिक्तोऽपि यथोक्तवादिकल्पितदुस्तर्कैर्निर्वापणं यास्यतीति चेत् तत्राहुः ॥ यर्हीति ॥ हे अम्बुजाक्ष सर्वहृत्कमलव्याप्त ! यदा तव प्रसादोदयकाले प्राप्तसाधनसम्पदाधिकारिणा विचारिता वयं तव पादतलमस्प्राक्ष्म तत्प्रभृति नान्य समक्षं स्थातुमपि पारयाम । ब्रह्मातिरिक्तं किमपि पारमार्थिकं न प्रतिपादयामः । आपाततोऽर्थान्तरप्रतीतावपि अन्तस्तात्पर्येणान्यपरत्वं नास्तीत्यर्थः । तत्रापि त्वया परमात्मना अभिरमिता त्वय्येव समन्वयं प्राप्ताः । ननु तथापि, यतो वा इमानि भूतानि जायन्त इत्यादिश्रुतीनां सविशेषपरत्वमेवावसीयते । निर्विशेषस्य निर्व्यापारस्य जगत्कर्तृत्वाद्यसम्भवादित्याशङ्कानिरासायोक्तं—क्वचिद्रमाया आपातरम्याया महामायाया दत्तक्षणं, न तु सर्वत्र सर्वदा च । तथा शाखाग्रन्यायेन तासां सविशेषे वा, निर्विशेष एव

तात्पर्यम् । यश्चोरः स स्थाणुरितिवद् यो जगत्कर्तृत्वादिविशिष्टः स निर्विशेषः परमात्मेति जगत्कर्तृत्वादेनिर्विशेषब्रह्मलक्षणकत्वे नाऽस्ति कश्चिद्विरोधः। दृग्दृश्यसम्बन्धानिरूपणान्मायासम्बन्धो ब्रह्मणि न वास्तव इति भावः । ननु श्रुतवेदान्तानामपि यथापूर्वसंसारानुवृत्तिदर्शनात् कथमुच्यते पुनरन्यपरत्वमस्माकं नास्तीत्याशङ्कानिवृत्त्यर्थमुक्तम्—अरण्यजनप्रियस्य ॥ तथाच विवेकवैराग्यादिसाधनविधुरत्वच्चरणारविन्दानभिमुखस्येयं कथा, न तु सर्वसाधनसंपदलंकृतस्येति भावः ॥ ३६ ॥

ननु रमाया दत्तक्षणमित्युक्त्या, तद्वद् अस्मानप्यङ्गीकुर्विति भवतीभिः सूचितम् । परन्तु लक्ष्म्या दैवगत्या जातो यः सम्बन्धः स तु प्राथमिको, भवतीनां तु न तथेत्यतः किं करोमीतिचेत् तत्राहुः ॥

श्रीर्यत्पदाम्बुजरजश्चकमे तुलस्या
लब्ध्वापि वक्षसि पदं किलभृत्यजुष्टम् ॥
यस्याः स्ववीक्षणकृतेऽन्यसुरप्रयास-
स्तद्वद्वयं च तवपादरजः प्रपन्नाः ॥ ३७ ॥

श्रीरिति ॥ श्रीर्यथा यत्पादाम्बुजरजश्चकमे कामयते स्म, तद्वद्वयमपि तव पादरजः प्रपन्नाः । तथाच श्रीरपि न दैवगत्या भवन्तं प्राप्तवती, किन्तु महता तपसेति भावः । तत्रापि तुलस्या सपत्न्या सह । न चाङ्गसङ्गालाभात् सापत्न्यमप्यङ्गीचकार, अपि तु भक्त्यतिशयादेवेत्याशयेनाहुः ॥ वक्षसि पदं लब्ध्वाऽपि तुलस्या एवासाधारणमिति वा । तथाच परमोत्कृष्टस्वतन्त्रस्थलं प्राप्यापि तादृशं रजो यच्चकमे तद्भक्त्यतिरेकविजृम्भितमिति भावः । ननु

कुत एवमित्याशङ्क्य रजसो माहात्म्यमाहुः॥ भृत्यैर्नारदादिभिः सर्वैरपि तदेवानन्यतया सेवितम् ॥ किलेति प्रसिद्धम् । नाऽत्र किंचिद्वक्तव्यम् । रज एवैवंविधसामर्थ्यं, यत् तत्र संलग्नचेतसः पुनरन्यत्र गमनासम्भवसम्पादनं, नान्यस्यातो लक्ष्मीर्वक्षसि पदं लब्ध्वापि कदापि चेतसोऽन्यत्र प्रवृत्तिर्न भवेन्नाप्यन्यस्य कस्यापि स्पर्श इति मनसि निधाय यद्रजश्चकम इति भावः । ननु लक्ष्म्याः कुत एतावद्भयमित्यत आहुः ॥ यस्या लक्ष्म्याः स्वस्य वीक्षणकृते श्रीरस्मान् करुणया पश्यत्वित्येतदर्थमन्येषां सुराणां ब्रह्मादीनां प्रयासः । सर्वपुरुषार्थानां तदधीनत्वात् । तथाच बहवो मां प्रार्थयन्ते । कश्चित् कदाचिदत्यन्तं यदि तपः कुर्यात् तर्हि स को वेद किं कुर्यादिति विचारवशात्तस्यास्तावद् भयमिति भावः । तद्वद् वयमपि प्रार्थनावतां बहुत्वमालोक्य तद्भयात् प्रथममेव तव पादरजः प्रपन्नाः । तस्मादस्मदर्थमेवावतीर्णो भवानात्मानं न गोपय गोपनाऽसम्भवादतो माऽस्त्वाग्रह इति भावः । यद्वा, तव पादस्पर्शस्य को वा तादृशो महिमेति चेत् तत्राहुः ॥ श्रीरिति ॥ यद्वा, ननु चरणस्पर्शादेव भवत्यः कृतार्थाः किमर्थमङ्गसङ्गार्थं विकलचित्ताः । किञ्चाङ्गसङ्गमवाप्य पुनश्चरणस्पर्शो भक्तिर्न भविष्यति । नचैवं का हानिरिति भ्रमितव्यम् । तस्या एव परमपुरुषार्थत्वादित्याशङ्क्याहुः ॥ श्रीरिति ॥ तथाच भगवत्पादरज एव तथाविधं यथा वक्षःस्थलनिवासिनी श्रीरपि तदेव चकमे । परमभक्तायास्तुलस्याश्च तदेवाऽसाधारणं स्वाश्रयैश्च सर्वैर्भृत्यैस्तदेव जुष्टम् । तस्मात् तत्प्रतिबन्धकमङ्गसङ्गाभिलाषं निवर्त्य तदेकशरणत्वमेवाश्रयिष्याम इति भावः ॥ अनभिज्ञापक्षे, ननु सौन्दर्य्यादिगुणसम्पन्नाः शोभनकुलोत्पन्ना महिषीपदयोग्याः किमेवं ब्रूथेत्याशङ्क्य महिषीपदापेक्षयेदमुत्कृष्टमिति लक्ष्मीदृष्टान्तेन समाधानमाहुः ॥ श्रीरिति ॥ यद्

यस्माल्लक्ष्मीर्नारायणस्य पदाम्बुजरजो यथा चकमे तद्वद्वयं नारायणसदृशस्य तव पादरजः प्रपन्नाः । यद्वा यस्य नारायणस्य तद्वत् तत्तुल्यस्य तवेति वा । नारायणसमो गुणैरिति * गर्गोक्त्या तव नारायणसमत्वेऽस्माकं लक्ष्मीसमत्वमर्थादागतमिति भावः । तत्रापि वक्षसि परमोत्कृष्टस्थले पदं रमणीभावं लब्ध्वाऽपि तुलस्याः सपत्न्याः पदमपि भृत्यैर्जुष्टं पुरुषजनसमुदाययुक्तमपि । तथाच तस्या यथा प्रेयसीभावसमुचितां लज्जां स्वन्यूनतां चाविगणय्य दासीभावोऽभिलषितस्तथैवास्माकमपि । यद्यप्येवं न, तथापि त्वं नारायणवन्नाचरसि, वक्षःस्थलोद्वहनयोग्या अस्मान् स्वपादतलसन्निधौ स्थातुमपि न ददास्यतो दग्धललाटा वयं किं कुर्म इति भावः। ननु लक्ष्मीवत्त्वमपि युष्मासु प्राप्तमित्याशङ्क्याह ॥ यस्या इति ॥ तथाच या पुत्रतुल्यान् सुरादीनपि ययाकयाचिच्छक्त्याऽनुगृह्णाति सा चञ्चलेति मूर्खप्रवाद इति भावः । श्रीः पदाऽम्बुजरजश्चकमे, वयं तु पादरज इत्युक्त्या श्रियः स्ववासस्थानोपमसादृश्योपाधिकसेवनमस्माकं तु निरुपाधिकमिति व्यज्यते । यद्वा, ननु स्वस्वपतिवक्षःस्थलरमणयोग्याः कथं दासीभावं प्रार्थयन्ते ? इत्याशङ्क्य, यद्यदाचरति श्रेष्ठस्तदेवेतरो जन * इति न्यायमवलम्ब्य समाधानमाहुः ॥ श्रीरिति ॥ स्वभर्तुर्नारायणस्य वक्षसि पदं लब्ध्वापि लब्धनारायणपादसम्बन्धया तुलस्या सह, यस्य तच्च वृन्दावनसम्बन्धि पदाम्बुजरजश्चकमे । तत्सेवनाऽर्थं वृन्दावनशोभारूपेण प्रेयोवक्षसि रेखारूपेण श्रीरत्रास्ते । तुलस्यपि वृन्दाख्यदेवीरूपेण वृन्दारूपेण चाऽऽस्ते इति भावः। तस्मात् परमपतिव्रताया लक्ष्म्या यदैवं दशा तदानीं वयं कथं, भर्तुः शुश्रूषणमित्याद्युपदेशार्हा इत्यपि ध्वनितम् ॥ मानिनीपक्षे, ननु श्रीवृन्दे अपि स्वपतिं त्यक्त्वाऽत्र वने मम सन्निधौ तिष्ठतः, यूयं किमित्येवंविधं

मानं कर्तुं प्रवृत्ता इति चेत् तत्राहुः ॥ यद्यपि श्रीर्वृन्दया सहाऽत्र स्थितं ते पादरजश्चकमे तद्वद्वयं किं पादरजः प्रपन्नाः !! अपि तु नेति काक्वा योज्यम् । तयोरेव तद्युक्तं नास्माकमिति भावः । यद्वा, यस्य नारायणस्य पदाम्बुजरजः श्रीश्चकमे, तद्वद्वयं = तेन नारायणेन तुल्या वयम्, अत एव तादृशलक्ष्म्यादिप्रार्थनीयं पादरजः सम्पन्नास्तत्र लक्ष्म्यादिसदृशस्य तुल्या आराधनीया इति भावः ॥

निवृत्तिपक्षे लक्ष्म्यादिवत् स्वस्य भगवत्परायणत्वमाहुः ॥ श्रीरिति ॥ तथाच श्र्यादिसमस्ताराध्यपादपद्मे समस्तश्रुतितात्पर्य्यविषयं परमात्मानि सर्वभावेन रतिः सम्पाद्येति भावः ॥ ३७ ॥

तथाच भगवदेकभोग्यशरीराणामस्माकं मनोरथं पूरयेति पश्चिमदिग्गताः प्रार्थयन्ते ॥

तन्नः प्रसीद वृजिनार्दन तेऽङ्घ्रिमूलं
प्राप्ता विसृज्य वसतीस्त्वदुपासनाऽऽशाः ॥
त्वत्सुन्दरस्मितनिरीक्षणतीव्रकाम-
तप्तात्मनां पुरुषभूषण ! देहि दास्यम् ॥ ३८ ॥

तन्न इति ॥ यस्माद्वयं भवत्पादरज एव प्रपन्नाः । प्रपत्तिश्च भवत्प्रसादं विना दुर्लभा । तस्मात् प्रसीद प्रसन्नो भव । त्वयि प्रसन्ने किमपि नावशिष्यत इति भावः । ननु दुःखप्रदं मत्सङ्गमप्रतिबन्धकं दुरदृष्टं भवतीनां वर्तते। तत्र मया किं कर्तव्यमिति चेत् तत्राहुः ॥ हे वृजिनार्दन ॥ सकलदुःखनिदानभूतदुरितविनाशन स्मरणादिनापि समस्तपापतृणदावानलस्य तवाभिमुख्यं प्राप्तानामस्माकं पापनिवारणे को भार इति भावः।एतेन स्वपत्यादित्याग-

कृतमपि पापं नाशयेति सूचितम् । सर्वधर्मान् परित्यज्य मामेकं शरणं व्रज * अहं त्वां सर्वपापेभ्यो मोक्षयिष्यामि मा शुचः * तावद्रागादयः स्तेनास्तावत् कारागृहं गृहम् * तावन्मोहोऽङ्घ्रिनिगडो यावत् कृष्ण न ते जनाः * इत्यादिशास्त्रात् । अथ स्वस्य प्रसादादियोग्यतामाहुः ॥ तेऽङ्घ्रिमूलं प्राप्ता इति ॥ ननु स्त्रीणां स्वभावः—ईश्वरादपि प्रसन्नाद् गृहस्थाश्रमसुखमेव प्रार्थयन्ति । ततस्तदनुकूलः किं प्रसादोऽपेक्षित इतिचेत् तत्राहुः ॥ वसतीर्विसृज्येति ॥ गृहस्थाश्रम एवास्माभिस्त्यक्तो, न तु गृहमात्रमिति सूचनाय वसतीरिति बहुवचनम् । यतो वयं, त्वदुपासनाऽऽशाः भगवदुपासनां करिष्याम इत्येवंविधा आशा यासां ताः । न तु तज्जन्यं सुखमस्माकमपेक्षितम् । तथाच गन्धपुष्पादिनोपासनपराणामनन्यभक्तानामिवावर्जनीयतया प्राप्ते सुखोपभोगे न कश्चिद्दोष इति भावः । यद्वा, तवोपास्यस्योपासनस्य नाशो यासु ता वसतीः । तथाचाभीप्सितानुकूल एव प्रसादो युक्तो, न तु तत्प्रतिकूलः । तस्मादितः परं गृहसम्बन्धिवार्ताऽपि न विधेया । तत्र प्रेषणं तु दूरनिरस्तमिति भावः । एवं भगवन्तमभिमुखीकृत्य प्रार्थ्यमावेदयन्ति ॥ त्वदिति ॥ हे पुरुषभूषण दास्यं देहि । अधिकारिभेदेन दास्यस्यानेकविधत्वात् तद्रूपं स्वतापोक्त्याऽभिव्यञ्जयन्ति— तव सुन्दरं परमानन्दजनकं यत् स्मितपूर्वकं निरीक्षणं तेन तीव्रो यः कामस्तेन तप्तान्तःकरणानामस्माकम् । तथाचैतत्तापनिवर्तकदास्यं देहीति भावः । दास्यस्य स्वव्यापारसाध्यस्य, देहीति प्रार्थनया यथोक्ततापनिवृत्तेस्तद्द्वारत्वात् तस्याश्च त्वदधीनत्वाद् यथाऽस्माकं तन्निवृत्त्यर्थं त्वदपेक्षा तथा तवास्मदपेक्षायां स्वयमुद्यम्यास्मदुपभोगः कार्यः । प्रभुणा ह्यपेक्षितवस्तुनि दत्ते दास्यं भवतीति भावः । ननु किमिदं कामोपाधिकं दास्यं प्रार्थ्यते, शुद्धमेव तत् प्रार्थ्यतामिति

चेत् तत्राहुः ॥ पुरुषभूषणेति ॥ पुरुषो भूत्वा भूषणरूप ! तथाच भूषणं यथा कण्ठादौ धार्य्यते तथा पुरुषाकारभूषणरूपस्त्वमपि धारणयोग्यस्तस्मान्मणिखचितभूषणधारणे लाक्षाधारणवन्मध्ये कामोपभोगो, न तु तदुपाधिकृतं दास्यमिति भावः । यद्वा, तत् तस्मान्नः प्रसीद । हे वृजिनार्दन ! स्वप्राप्तिप्रतिबन्धकं पापं नाशय । यतः ॥ प्राप्ता विसृज्य वसतीरिति ॥ तस्मात् तव सुन्दरास्मितस्य नितरामीक्षणेन चिन्तनेन तीव्रो भजनाभिलाषस्तेन तप्तात्मनां तपःसपन्नचित्तानां दास्ये लब्धाधिकाराणामस्माकं लक्ष्म्या इवाऽस्मदुयोग्यं दास्यं देहि । यतो हे पुरुषेषु भूषण! तत्रापीदमेव योग्यम् । अस्माकं च कामोपाधिकृतोऽपि तव सम्बन्धोऽलङ्कारायैवेति भावः ॥ अनभिज्ञापक्षे, नारायणसमो गुणैरित्युक्तत्वात् त्वं नारायणगुणधारणे योग्यो, वयं च तद्भक्तगुणधारण इत्याशयेनाहुः ॥ तदिति ॥ यस्मात् त्वं नारायणसमस्तस्मान्नस्तद्भक्ततुल्या अस्मान् प्रसीद । ननु प्रसन्न एवाहमस्मि, स्वस्मिन्मम कोपो भवतीभिः कदा दृष्ट इति चेत्, तत्राहुः ॥ हे वृजिनार्दन, दुःखविध्वंसकर । ननु नाऽस्ति भवतीनां किमपि दुःखम् । गृहाद्युपद्रवजनितदुःखहेतवऽसुरादिविनाशाय ममोद्युक्तत्वात् । तस्मात् किमित्येवं दैन्यमाविष्कुरुतेति चेत्तत्राहुः ॥ त इति ॥ तथाच गृहादिकं महाग्निज्वालया प्रज्वलतु, तिष्ठतु वा । नाऽस्ति अस्माकं तत्प्रयुक्तं किमपि दुःखं, सुखं वेति भावः । ननु भवत्वेवं, यदर्थं वसतीर्विसृज्य मदङ्घ्रिमूलं प्राप्तास्तदेव याच्यतामिति चेत् तत्राहुः ॥ त्वदुपासनाऽऽशाः ॥ तवोपासनायां सेनायां श्लेषेण, उप आसङ्गेन स्थितिरूपा आशा यासां, नतूपासनया दास्यमाने कस्मिँश्चित्सुखे ताः । त्वत्सुखार्थमङ्गसङ्गदानादिरूपोपासनापराणामस्माकमप्यवर्ज्जनीयतया प्राप्तेन सुखोपभोगेन, को दोषः इति भावः । ननु तादृशमुपासनं तु स्वपतेरेव

संभवति। न चाऽहं युष्माकं पतिः। नन्वस्तु संप्रति विवाह इति चेन्न। उपनयनरहितस्य मम सम्प्रति विहानधिकारात्। विवाहितानां भवतीनामपि तदयोगाच्चेत्याशङ्क्याहुः ॥ त्वदिति ॥ तादृशकामतप्तात्मनामप्यस्माकं दास्यं दासीभावमेव देहि। तथाच न वयं विवाहाऽर्थिन्यः, किन्तु दास्याऽर्थिन्य एवाऽतस्तवोपनयनादिराहितत्वेऽस्माकं च कन्यात्वे परोढत्वे वा न काऽपि हानिः। सर्वथाऽपि दास्यसम्भवादिति भावः। यद्वा, हे वृजिनार्दन! अस्माकं विरहदुःखदानमनुचितमिति भावः। न चाऽस्यस्मद्दुःखनाशे कश्चन तव प्रयास इत्याशयेन सम्बोधयन्ति ॥ हे सुन्दरस्मितनिरीक्षण ॥ एतावतैवास्मद्दुःखनिवृत्तिरिति भावः। यतस्त्वत्त्वत्त एव यस्तीव्रः कामस्तेन तप्तात्मनाम्। अतस्तत्तापनिवृत्त्यर्थं विकसितमुखपङ्कजो भूत्वा दास्यमात्रं देहि, न तु बहु प्रार्थयाम, यद्वयादेवंस्वरूपमात्मानं कुन्तानसीति भावः। किञ्च, काममहोदधिभूतत्वादेव स्त्रीलम्पटस्य तवास्माभिर्युवतिभिः स्वाङ्गेरुपामनं सुखजनकमतस्तत्सेवनप्रार्थनाऽपि त्वदर्थमेवेत्याशयेन सम्बोधयन्ति ॥ हे पुरुषभूषण ॥ यद्वा गौराङ्गीनामस्माकमलङ्कारार्थं पुरुषाकारमिन्द्रनीलमणिमयं भूषणं विधात्रा रचितम्। तस्मात् स्वोत्पत्तिसार्थक्यायाऽस्मत्कण्ठसंलग्नता त्वयाऽवश्यं सम्पाद्येति नर्म व्यञ्जयन्ति ॥ हे पुरुषभूषणेति ॥ मानिनीपक्षे, ननु लोकोत्तरपरमसौन्दर्याकृष्टचेतसः स्त्रियो मद्दास्यं प्रार्थयन्ति। भवत्यस्तु स्वामित्वमपि मत्प्रार्थनयापि नैवाङ्गीकुरुथेति महानन्याय इत्याशङ्क्याहुः ॥ तदिति ॥ तत् तस्मान्नः प्रसीद। अहंग्रहमप्यमर्थं च त्यज। हे वृजिनार्दन। सर्वदुःखच्छेदकस्यापि दुःखानुच्छेदनमनुचितमिति भावः। यद्वा, वृजिनार्दनस्य तव स्वदुःखानिवारणमनुचितमिति भावः। यद्वा वृजिनं दुःखमर्दयति प्रार्थयतीति। तथाच दुःखोदर्कं वस्तु न प्रा-

ऽर्थनीयमिति भावः । यतो निरपेक्षाऽपेक्षा केवलं दुःखायैव भवतीत्याशयेनाहुः ॥ नेति ॥ वसतीर्विसृज्य त्वदुपासनाऽऽशा वयं तवाङ्घ्रिमूलं न प्राप्ताः । तस्मात् त्वत्सुन्दरस्मितनिरीक्षणतप्तात्मनामेव दास्यं देहि, न त्वस्माकं स्वामिनीभावमप्रार्थितत्वात् । न ह्यप्रार्थितमनुत्तममपि वस्तु कस्यचिदुपादेयं भवतीति भावः । पुरुषानेव भूषयति । तथाच सक्तकामसन्तप्तचित्तो यदि जातोऽसि तर्हि गोपवधूरूपेण गोपान् भूषयेति भावः । यद्वा, शरीरमात्रमस्माकं तव सविधे वर्तते, मनस्तु स्वस्वगृहमेव प्रविष्टम् । अत एवाग्रहेणात्राव-स्थाने कृतेऽपि नास्ति किञ्चित्फलमित्याहुः ॥ तदिति ॥ तत् तस्मादितः परमस्मासु प्रसाद एव विधेयो, न तु वृथाग्रहः । न चेदं तवोचितं, स्वपरदुःखजनकत्वादस्य कर्मण इत्याशयेन सम्बोधयन्ति ॥ हे वृजिनार्दनेति ॥ मत्सन्निधानेता स्थिता इति न भ्रमितव्यम् । वयं तु तेऽङ्घ्रिमूलं विसृज्य, वसतीः प्राप्ताः । नन्वतच्चित्तानां त्वदुपासनं सम्भवति । यतस्त्वदुपासस्य समीपावस्थानादिरूपोपासनस्य नाशो यासु । अतः स्वाभाविकास्मत्सुन्दरस्मितादिना तीव्रकामाक्रान्तता तव नोचितेति सूचयन्त्यः सम्बोधयन्ति ॥ हे सुन्दरस्मितनिरीक्षणतीव्रकाम ॥ नेदं पुरुषरत्नानां लक्षणमपि तु पुरुषापसदनामतः पुरुषभूषणस्य तव नेदमुचितमिति भावेन सम्बोधयन्ति ॥ हे पुरुषभूषणेति ॥ तस्मात् पुरुषभूषणस्य तव त्वदर्थं तप्तात्मनामपि स्त्रीणां स्त्रीभावदानमयोग्यम् । किञ्चिद्दानावश्यकत्वे दास्यमात्रं दातुमुचितमित्याशयेनाहुः ॥ त्वत् त्वद्वियोगात् तप्तात्मनामपि दास्यमात्रं देहि । सर्वथा विमुखाभिस्तु भापणमपि तव नोचितमित्यर्थः ॥

निवृत्तिपक्षे, अथ य एषोऽन्तरादित्ये हिरण्मयः पुरुषो दृश्यते हिरण्यश्मश्रुर्हिरण्यकेश आप्रणखात् सर्व एव सुवर्णस्तस्य

यथा कप्यासं पुण्डरीकमेवमक्षिणी, तस्योदिति नाम, स एष सर्वे-भ्यः पाप्मभ्य उदित, उदेति ह वै सर्वेभ्यः पाप्मभ्यो य एवं वेदे त्याद्याः श्रुतयः परमात्मानमेवोपास्यमावेदयन्ति ॥

तदिति ॥ यस्मात् सर्वश्रुतितात्पर्य्यविषयो भवानेव तस्माद् उपासनापरा अस्मानपि प्रसीद । अस्मत्तात्पर्य्यविषयत्वमात्मनः स्वीकुरु । यतो हे वृजिनार्दन ! सर्वपापासंस्पर्श ! निर्विशेष-त्वात् तथात्वेनोपासितस्त्वमुपासकस्य दुःखमात्रबीजभूतं पापमात्रं नाशयसि । स एष सर्वेभ्यः पाप्मभ्य उदित इति सर्वपाप्मापगम उक्तः । स च परमात्मन एव सम्भवति । आत्माऽपहतपाप्मेत्यादि-श्रुत्यन्तरात् । उदेति ह वै सर्वेभ्यः पाप्मभ्यो य एवं वेदेति तदु-पासनात् सर्वपापनिवृत्तिः कथितेति भावः । ननु हिरण्यश्मश्रुरि-त्यादिरूपश्रवणाद्, य एषोऽन्तरादित्ये पुरुष इत्याधारश्रवणाच्च कथं रूपादिप्रतिपादनपराणां श्रुतीनां परमात्मपरत्वमऽशब्दमस्प-र्शमरूपमव्ययं, स भगवः कस्मिन् प्रतिष्ठतः स्वे महिम्नि, आकाश-वत् सर्वगतश्च नित्य इत्यादिश्रुत्या रूपादिरहितब्रह्मस्वरूपावगमा-दित्याशङ्क्याहुः ॥ तं इति ॥ वसतीरापाततः प्रतीयमानपरमेश्वरा-तिरिक्तप्रतिपाद्यरूपा विसृज्य तेऽङ्घ्रिमूलं प्राप्ता, यतस्त्वदुपासना-याम् आशा आशयो यासां ता वयम् । तथाच परमेश्वरस्यापीच्छा-वशात् साधकानुग्रहार्थं मायामयरूपादिस्वीकारो न विरुद्ध्यते । प्रकृतिं स्वामधिष्ठाय सम्भवाम्यात्ममायया * माया ह्येषा मया सृष्टा यन्मां पश्यति नारद * सर्वभूतगुणैर्युक्तं न मां पश्यन्ति सूरय इत्यादिस्मृतेः । अशब्दमित्यादिशास्त्रं निरस्तसर्वविशेषज्ञेय-ब्रह्मपरम् । सर्वकर्मा सर्वकामः सर्वगन्धः सर्वरसः हिरण्यश्मश्रुरि-त्यादिशास्त्रमुपास्यब्रह्मपरम् । तथा स्वमहिमप्रतिष्ठस्याधारविशेषोप-देशोऽप्युपासनार्थो न विरुद्ध्यत इति भावः । तस्मादनुग्रहाऽर्थं

प्रकटितलावण्यसागरविग्रहस्य तव सुन्दरस्मितस्य निरीक्षणे यो तीव्रकामोऽभिलाषस्तेन तप्तात्मनां जीवानां, हे पुरुषोत्तम दास्यं देहि । त्वदनुग्रहं विना तव दास्यस्य दुर्लभत्वात् । तेन विनोद्धाराऽसम्भवात् । तत्प्रदानेन जीवानुद्धरेति भावः । यद्वा, तव सुन्दरं यत् स्मितं चराचरात्मकं निरीक्षणं भूतात्मकं च जगत् तत्र तीव्रो यः कामस्तेन तप्तात्मनाम् । तथाच तादृशतापनिवृत्त्यर्थं स्वदास्यं देहीत्यर्थः । निःश्वसितमस्य वेदा वीक्षितमेतस्य पञ्च भूतानि ॥ स्मितमेतस्य चराचरमस्य च सुप्तं महाप्रलय इत्यभियुक्तवाक्ये चराचरादेर्भगवत्स्मितादिरूपेण निरूपणं द्रष्टव्यम् ॥ ३८ ॥

ननु यदि निरुपाधिकप्रेमवशो भवत्यस्तर्हि सालोक्यादिफलं प्रार्थ्यतां, किमर्थं दास्यं प्रार्थ्यत इत्याशङ्क्याहुः ॥

वीक्ष्यालकावृतमुखं तव कुण्डलश्रि
गण्डस्थलाधरसुधं हसितावलोकम् ॥
दत्ताऽभयं च भुजदण्डयुगं विलोक्य
वक्षः श्रियैकरमणं च भवाम दास्यः ॥ ३९ ॥

वीक्ष्येति ॥ इदं सर्वं वीक्ष्य दास्य एव भवाम । तत्र सारूप्यं नास्माकमपेक्षितम् । यतोऽलकैः समानरूपैस्तदुपलक्षितैः । समानरूपैर्भ्रमरैश्चावृतं मुखम् । तथाच सारूप्यं गतानामपि या भक्तिरवशिष्यते तदर्थिन्यो वयमिति भावः । तथा सामीप्यापेक्षामपि वारयन्ति ॥ कुण्डलाभ्यां श्रीः शोभा यस्य, तयोःश्रीर्यस्मादिति वा । तथाचाऽत्यन्तसमीपयोस्तत्र प्रमाणभूतसांख्ययोगरूपयोः कुण्डलयोरपि यदा मुखावलोकनपरत्वं तदान्यस्य का कथेति भावः । गण्डौ विशालौ सुधापानार्थं स्थले यस्मिन्, तथा अधरे

सुधा यस्मिन्, गण्डस्थलं च तदधरसुधं च । कुण्डलयोः श्रीर्ययो-स्ते गण्डस्थले यस्मिन्निति वा । एतेन सालोक्यापेक्षा निवारि-ता । सालोक्यं प्राप्तयोरपि कुण्डलयोर्मुखनिष्ठाधराऽमृतपानाभि-लाषेण लोलत्वदर्शनात् । किञ्च, हसितपूर्वकमवलोकोऽवलोकनं यस्मिँस्तद्धसितावलोकम् । अनेन सायुज्यापेक्षाऽप्यस्माकं नास्ती-त्युक्तम् । यथोक्तमुखावलोकनजन्यानन्दस्य पृथक्स्थितिं विनाऽनु-भवासम्भवात् । किञ्चेन्द्रादिपदमप्यस्माकं नापेक्षितमित्याशयेनाह ॥ दत्ताऽभयं च भुजदण्डयुगं विलोक्येति ॥ तथाचासुरादेर्बिभ्यत इन्द्रादेरप्यभयप्रदं लोकपालास्पदम्, अपराधिजनदण्डरूपभुजाद्वया-ऽवलोकनपराणामस्माकमिन्द्रादिपदाभिलाषो नोपपद्यते । इन्द्रा-दीनामपि भुजदण्डयोर्निविष्टत्वादिति भावः । ऐहिकैश्वर्य्यवाञ्छा-ऽप्यस्माकं नास्तीत्याशयेनाहुः ॥ वक्षः इति ॥ श्रिय एकं मुख्यं रमणं वक्षःस्थलं विलोक्य । चकाराद् धर्मस्यापि संग्रहः । तथाच सर्वतः संप्लुतोदकह्रदवदन्तर्भूतसर्वपुरुषार्थं दास्यमेव प्रार्थयामः । तुलयाम लवेनाऽपि न स्वर्गं नाऽपुनर्भवम् * भगवत्सङ्गिसङ्गस्य मर्त्यानां किमुताशिष इति भगवत्सङ्गिसङ्गस्यापि यदेवं माहात्म्यं तदा साक्षाद्भगवत्सङ्गस्य माहात्म्यं किमु वक्तव्यमिति भावः । एतेन भर्तृत्यागस्य पापरूपत्वं प्रकृते न सम्भवति दुःखरूपफलाजन-कत्वात् । भवन्तमवलोक्य लोकद्वयस्यापि सत्कत्वाचेत्यपि सूचितम् । यच्च, अस्वर्ग्यमयशस्यं च फल्गु कृच्छ्रं भयावहम् * जुगुप्सितं च सर्वत्र ह्यौपपत्यं कुलस्त्रिय इति षड्दोषाभिधानं तदपि प्रकृते नोपपन्नम् । भगवतो यथोक्तषड्विधगुणत्वादित्यपि ध्वनितम् । य-द्वा, ननु किमवलोक्य दास्यभावः प्रार्थ्यत इत्याशङ्क्याहुः ॥ वीक्ष्ये-ति ॥ श्रियैकरमणमिति मुखस्यापि विशेषणम् । तथाच लोकोत्तर-सौन्दर्य्यम् अवलोक्य दास्यो भवाम । ननु दृष्ट्वैव वाञ्छा न निवे-

था । प्रीत्ययोग्यानामापातरम्याणामपि बहूनां पदार्थानां सत्त्वादित्याशङ्कानिरासायोक्तम् ॥ वीक्ष्येति ॥ भगवद्दास्यमेवं सर्वापेक्षयोत्कृष्टम् । अत्रैवंविधविग्रहप्रादुर्भावोऽस्माकं दास्यपदानायैव भगवता कृत इति च सम्यग्विचार्येत्यर्थः ॥ श्रियैकरमणमित्यनेन सर्वोत्तमा चतुराशिरोमणिभूता श्रीर्यत्र सर्वभावेनासक्ता तत्र का वयं वराक्यो दास्येऽप्यनधिकारिण्योऽतः श्रियैकरमणं मुखादिकमवलोक्याऽत्र यद्विचारणीयं तल्लक्ष्म्यैव स्वयंवरकाले विचारितमिति विचार्य्येम् । तदुक्तम् । नूनं तपो यत्र न मन्युनिर्जयो ज्ञानं क्वचित् तत्र न सङ्गवर्जितम् * क्वचिन्महाँस्तस्य न कामनिर्जयः स ईश्वरः किं परतो व्यपाश्रयः * धर्मः क्वचित् तत्र न भूतसौहृदं त्यागः क्वचित् तत्र न मुक्तिकारणम् * वीर्य्यं न पुंसोऽस्त्यजवेगनिष्कृतं न हि द्वितीयो गुणसङ्गवर्जितः * क्वचिच्चिरायुर्न हि शीलमङ्गलं क्वचित्तदप्यास्ति न वेद्यमायुषः * यत्रोभयं कुत्र च सोऽप्यमङ्गलः सुमङ्गलः कश्चन काङ्क्षते हि माम् * एवं विमृश्याव्यभिचारिसद्गुणैर्वरं निजैकाश्रितसद्गुणाश्रयम् * वव्रे वरं सर्वगुणैरपेक्षितं रमा मुकुन्दं निरपेक्षमीप्सितमिति । तस्मादस्मत्प्रवृत्तिर्नाऽविचारप्रयुक्ताऽतो नोपदेशसहस्रैरपि निरोद्धुं शक्येति भावः सूचितः ॥ अनभिज्ञापक्षे, ननु दास्यं देहीति भवतीभिरुक्तं, तत्र मूल्यं श्रुत्वा यत् कर्तव्यं तत् करिष्यामीत्याशङ्क्य लब्धाऽनल्पमूल्या एव वयमतो मास्तु भवतस्तद्दानचिन्तेत्याशयेनाहुः वीक्ष्येति ॥ अलकैः ॥ केशप्रान्तभागैः शोणवक्रोष्णीषधारणसमये तदधोभागे लसद्भिरावृतमनाच्छादितम् । चूडाबन्धनबर्हापीडधारणसमये कुञ्चितैरनतिदीर्घैरलकैरीषदावृतमाच्छादितम् । अभ्यङ्गोद्वर्तनादिसमये आसमन्तादावृतमाच्छादितं मुखं वीक्ष्येक्षणाभ्यां सम्यगास्वाद्य । अनेन मुखोर्ध्वभागशोभोक्ता । तथा कुण्डलयोः समय-

भेदेनाऽलकैरनावृतयोरीषदावृतयोः सम्पूर्णावृतयोरचपलयोरीषच्चपलयोरत्यन्तचपलयोश्चालङ्कारप्रतिबिम्बरूपा श्रीर्ययोस्ते गण्डस्थले यस्मिंस्तत् । अनेन पार्श्वयोः शोभोक्ता । अधरे सुधा यस्मिंस्तच्च हसितं प्रहसितपूर्वकमवलोको यस्मिंस्तद्, हसितं चावलोकश्चेति द्वन्द्वैक्यं वा । अनेन मध्याधोभागशोभाः । तथाचैतावदेव मूल्यं कोटिचिन्तामणिविचित्ररत्नखचितमन्दिरसत्यलोकादिलभ्याऽमृतादेरप्यधिकमस्माकम् । तव च सहजत्वादनायाससाध्यमिति । यथोक्तमूल्येन जातं चास्माकं दास्यं न किञ्चिदपि वक्तव्यं, कर्तव्यं वा शिष्यत इति भावः । लोभविशेषोत्थानात् सौरभ्यविशेषाघ्राणाद्वाऽधरे सुधानुमानम् । ननु नैवं वाच्यं, युष्मत्पतिभ्यो राज्ञश्च बिभेम्यहमित्याशङ्क्य, किमेवं प्रत्यक्षोपलब्धस्वसामर्थ्यं गोपायसीत्याशयेनाहुः ॥ दत्ताऽभयं च भुजदण्डयुगम् ॥ तथाचान्याऽभयङ्करभुजदण्डालङ्कृतस्य तव नाऽस्ति भयसम्भावनेति भावः । अनेन गोवर्द्धनधारणादिना दत्ताभयेभ्योऽस्मत्पत्यादिभ्यस्तेनैव दत्तात्यन्तभयेभ्य इन्द्रादिभ्यश्च भयाऽभावात् तव दास्ये स्वीकृते नास्त्यस्माकं लोकद्वयेऽपि भयशङ्केत्यपि ध्वनितम् । गाढालिङ्गनेन कामभयहारित्वमप्यत्र व्यङ्ग्यम् । दण्डपदेन सुवृत्तत्वादिशोभोक्ता । एवं व्यञ्जितेन वीररसेन शृङ्गाररसोऽपि पुष्टो भवति । ननु तथापि परदारसम्बन्धलाञ्छनान्निष्कलङ्कोऽहं बिभेमीत्याशङ्क्य श्रीरेखोपरि तर्जनीं धृत्वा पृच्छन्त्य इवाहुः ॥ वक्ष इति ॥ श्रिया कन्या एकं श्रेष्ठं रमणं यस्मिंस्तत् । तथाच, हे निष्कलङ्काग्रगण्य, यदि कलङ्काद् बिभेषि तर्हि श्रीमन्नारायणभार्यां लज्जया गृहीतरेखारूपां किमिति वक्षस्युद्वहसि । तस्मान्नैवं वोचस्त्वं तु ब्रह्माण्डस्यान्तर्बहिर्वावस्थितस्य कस्यापि कामपि नारीं न सक्ष्यसीति सम्यग् जानीमो वयम् । अतस्तादृशं स्वसामर्थ्यं माऽवलोपयेति भावः ।

क्रियाद्वयं च स्वानुरागवैशिष्ट्यस्य, मुखे चुम्बनं, भुजवक्षसोरालिङ्गनमिति प्रयोजनद्वयस्य च ध्वननाय । अत्र वीनां पक्षिणामीक्षणीयेति श्लेषेण स्वनेत्राणां खञ्जनत्वम् । तत्रालककुण्डलपाशयोस्तद्बन्धः । गण्डयोः पाशस्थानत्वम् । सुधाया आहारत्वम् । हसितावलोकमिति तन्नेत्रयोः स्वनेत्रखञ्जनाकर्षखञ्जनत्वम् । भुजवक्षसोः सञ्चारदेशत्वं च व्यज्यते । तथाच यथोक्तस्वरूपदर्शनजनितामक्तिमदन्तःकरणानां महाजालबद्धनयनखगानाम् अस्माकं, प्रतियात, नेत्यादिवाग्वज्रप्रहारेण हृदयानि मा विदारयेत्याशयः । मानिनीपक्षे, ननु कथं तर्हि ममाङ्गानि निरीक्षमाणा एव तिष्ठतेति चेत् तत्राहुः ॥ वीक्ष्येति ॥ विलोक्यापि किं वयं दास्यो भवामेति काक्वा, नैवेत्यर्थः । यद्वा, ननु साहसं मा कुथ, ममाङ्गानि विलोक्य विचार्य्य च वक्तव्यमित्याशङ्क्याहुः ॥ वीक्ष्येति ॥ तथाच न वयं तव समकोटिखिङ्गैरपि धैर्य्याच्चालयितुं शक्या इति भावः । यद्वा यदि तवास्मान् दासीकर्तुं महत्युत्कण्ठा वर्तते तर्हि योषिद्रूपस्य तव विश्वासाभावात् स्वपतिं कञ्चन दर्शय, भवतु, तं दृष्ट्वा वयं दास्यो भविष्याम इति नर्म व्यञ्जयन्त्य आहुः ॥ वीक्ष्येति ॥ वक्षसि स्वश्रिया युक्तो यस्तव एको रमणः कान्तस्तं, दत्ताभयं भुजदण्डयुगवन्तं विलोक्य वयं दास्यो भविष्यामः । तेषां बहुत्वख्यापनार्थैकेत्युक्तम् । सोऽस्माकं प्रदर्शनीय इत्युपहासोक्तिः ॥

निवृत्तिपक्षे, चित्तैकाग्र्यास्पदस्य मुक्तानुग्रहार्थं गृहीतलीलाविग्रहस्य भगवतो मुखादिकं विचार्य्य तथैवालोक्य च वयं तवैव दास्यं प्रतिपादयाम इति, वीक्ष्य इति ॥ तथाच समस्तोपासनाविधायिश्रुतितात्पर्य्यगोचरस्यैवंविधस्वरूपस्य भगवतो दास्येनैवोद्धारो, नान्यथेति भावः ॥ २९ ॥

ननु युष्माकमपि भावोऽपेक्षितः, स च यथा मच्छ्रवणादिना

भवति, न तथा मत्सान्निकर्षेणेति मयोक्तमेवातः किमर्थं लोकविद्विष्ट-मार्गानुसरणं कुरुत, गृहे गत्वा मच्छ्रवणादिकमेवाचरतेतिचेत् तत्राहुः

का स्त्र्यङ्ग! ते कलपदाऽमृतवेणुगीत-
संमोहिताऽऽर्यचरितान्न चलेत् त्रिलोक्याम् ॥
त्रैलोक्यसौभगमिदं च निरीक्ष्य रूपं
यद् गोद्विजद्रुममृगाः पुलकान्यऽबिभ्रन् ॥ ४० ॥

केति ॥ शक्तस्यैवाधिकारश्रवणात् स्त्रीणां चैतदुपदिष्टार्था-ऽनुष्ठानेऽशक्तत्वाद्यथोक्तोपदेशो न युक्तः । तस्मात् पुरुष एवैवमु-पदेष्टव्य इति द्योतनाय, का स्त्रीत्युक्तम् । किञ्च, समाहिता एव धर्मा-धर्ममर्यादां विचारयन्ति, न तु मोहिताः । सम्यग् मोहिताश्चेत् किमु वक्तव्यमित्याशयेनाहुः ॥ त इति ॥ तव समस्तजीवसंमोहक-मायाशक्तेर्यत् कलपदाऽमृतमयं गीतं तेन संमोहिता । तव वेणु-गीतामिति सर्वेन्द्रियाणाम्, अमृतेति प्राणस्य, कलपदेत्यन्तःकरण-स्य व्यामोह उक्तः । आयतेति पाठे, कलानि अव्यक्तमधुराऽक्षरा-णि पदानि यस्मिंस्तद् आयतं दीर्घमुच्छ्रितस्वरालापभेदस्तेन स-म्यग् मोहिता का वा स्त्री आर्यचरितात् शिष्टाचारान्निजधर्मान्न चलेत् । या स्त्री न चलेत् तथाविधा चतुर्दशभुवनेषु काऽपि नास्ती-त्यर्थः । तथाच सर्वाऽपि शिष्टदोषेणाऽस्माकमुपालम्भो न युक्तः । किञ्च, विद्यते न खलु कश्चिदुपायः सर्वलोकपरितोषकरो यः * सर्वथा स्वहितमाचरणीयं, किं करिष्यति जनो बहुजल्प * इत्यु-क्तत्वाद् दुराराध्यलोकाराधनार्थमेवंविधफलत्यागो न युक्तः । अ-न्यथा सर्वबान्धवजनानभिमतसंन्यासोऽपि केनचिन्न क्रियेताऽतः परलोकाविरोधि कर्म नानुष्ठेयम् । नच परब्रह्मणस्तवाराधनेन स-

वकर्मफलभूतो नास्ति परलोकबाधः । त्यक्त्वा स्वधर्म्मं चरणाम्बुजं हरेर्भजन्नपक्वोऽथ पतेत् ततो यदि * यत्र क्व वाऽभद्रमभूदमुष्य किं, को वाऽर्थ आप्तोऽभजतां स्वधर्मतः * न वै जनो जातु कथञ्चनाव्रजेन्मुकुन्दसेव्यन्यवदङ्ग संसृतिम् * स्मरन्मुकुन्दाङ्घ्र्युपगूहनं पुनर्विहातुमिच्छेन्न रसग्रहो जन इत्यादिशास्त्रात् । संभावितस्य चाऽकीर्तिर्मरणादतिरिच्यत इत्यादिशास्त्रं तु जिजीविषुपरलोकद्वयविरुद्धकर्मनिन्दापरम् । शिष्टनिन्दापरं च । तत्र वयं त्यक्तसर्वैषणसंन्यासिसदृशा न त्वच्चरणसङ्गमरहितजीवनाभिलाषा, नाऽपि परलोकविरोधिकर्मपरा, नाऽपि भगवत्स्वरूपाभिज्ञशिष्टविनिन्द्याचाररता इति भावः । का स्त्रीत्यनेन, त्वन्मोहिताः पुरुषा अपि चलितास्तन्मोहिता स्त्री का न चलेदित्यपि सूचितम् । किञ्च यथा सूर्येण दिनं, चन्द्रमसा रात्रिस्तथा त्रैलोक्यस्यापि सुभगत्वं सौन्दर्यं येन भगवद्रूपेण तत् त्रैलोक्यसौभगमिदमनुभूयमानं रूपं च निरीक्ष्य यद् यतो गोद्विजद्रुममृगाः पुलकानि अबिभ्रन् अबिभरुः । गवादीनामनभिज्ञाशिरोमणीनामपि यद्दर्शनानुरागो दृश्यते । तेन त्वत्स्वरूपाऽभिज्ञानरसज्ञानामस्माकं स्वधर्मत्यागे किं चित्रम् । तत्रापि त्वद्द्योतकशब्दश्रवणमात्रेणापि निजधर्मत्यागो युक्तः, किं पुनस्त्वदनुभवेनेति भावः ॥ अनभिज्ञापक्षे, ननु नेयं लक्ष्मीः, किन्तु मद्वक्षसि सहजा लक्षणविशेषरूपा स्वर्णरेखा विराजते । तां दृष्ट्वा पतिव्रताशिरोमणिभूतां लक्ष्मीमपि, स्वयं दुष्टोऽन्यानपि दूषयतीति न्यायमनुसृत्य दूषयितुं प्रवृत्तास्तस्या भयतश्च भयं न कुरुतेत्याशङ्क्य, न वयं कामपि दूषयामः, किन्तु सर्वधर्मध्वंसनाय त्वमेव विधात्रा सृष्टोऽसीति सरोषविभ्रममाहुः ॥ केति ॥ अङ्ग हे कृष्ण, तव कलपदाऽमृतवेणुगीतसंमोहिता आर्यचरितात् पातिव्रत्यलक्षणान्निजधर्मात् का स्त्री न चलेदपि तु सर्वाऽपि चलेद्-

व । अतस्त्वत्कर्तृकं गीतमेव दूषयति । धर्मत्याजनलक्षणं चञ्चलत्वे प्राप्स्यत्येवेति भावः । न केवलं तव गीतमेवैवंविधम्, अपि तु रूपपमीत्याहुः ॥ त्रैलोक्यसौभगमिति ॥ ननु नास्ति मम गीतादेरयं स्वभावः, किन्तु स्त्रीणामेवायं स्वभावो यद् यत्किञ्चिदपि गीतादिकमुपलभ्य मोहिता भवन्तीति चेत् तत्राहुः ॥ यदिति ॥ याभ्यां गीतरूपाभ्याम् । यद्वा, नन्वेवं पतिव्रताभिरुपहसनीया भविष्यथेत्याशङ्क्य, तव गीतादिप्रसादाच्चतुर्दशभुवने उपहासकरा काऽपि न भविष्यति । सर्वासां मोहावश्यम्भावादित्याशयेनाहुः ॥ केति ॥ किञ्च चराचरात्मकं सर्वमपि तव गीतादिना मोहितम् । अतः का उपहासशङ्केत्याशयेनाहुः ॥ त्रैलोक्येति ॥ मानिनीपक्षे, ननु यदि मदीयगीतादिकं भवतीनां न क्षोभकरं, तर्हि किमर्थं चलितुमिच्छथेति चेत् तत्राहुः ॥ केति ॥ गीतमोहिताऽपि आर्यचरिताद्धेतोस्ते त्वत्तः सकाशात् का स्त्री न चलेन्नापयायात् । किञ्च, यस्माद् गवादयोऽपि सपुलकास्तदिदं त्रैलाक्यसौभगं रूपं दृष्ट्वा च सदाचारभङ्गभिया का नापयायात् । सुन्दरीणां सुन्दरसन्निधौ स्थितिर्निन्दानिदानमिति मोहिताऽपि यदि चलेत् तर्ह्यमोहिता वयं कथं नापसराम इति भावः । यद्वा, तवास्ति स्वगीतादिप्रयुक्तवशीकार इति वयं जानीमस्तथापि तेऽस्मान् प्रत्यऽकिञ्चित्करतेत्याशयेनाहुः ॥ केति ॥ मोहितानामेव वशीकारो भवति । या तु तव तादृशगीतेन न मोहिता सा स्त्री का आर्यचरिताच्चलेत् । तादृशी काऽपि नास्तीत्यर्थः । किञ्च, यतो गवादयः सपुलकास्तदिदं त्रैलोक्यसौभगं स्वीयं रूपं तु निरीक्ष्य स्वरूपोत्कर्षाभिज्ञा का सदाचाराच्चलेदिति ॥

निवृत्तिपक्षे, तस्मात् त्रिलोक्यां नास्ति तथाविधा श्रुतिर्या त्वां न प्रतिपादयेदित्याहुः ॥ केति ॥ तव, सर्वे वेदा यत्पदमामनन्ति,

सदेव सोम्येदमग्र आसीदित्यादिरूपं यत् कलपदाऽमृतवेणुगीतं तदेव, समा=सम्यक्प्रमाणम् । प्रत्यगभिन्नपरमात्मपराणामुपनिषदां विषयस्य कालत्रयाबाध्यत्वात्तद्विषयकप्रमाणस्य पारमार्थिकतत्त्वावेदकत्वरूपप्रामाण्यवत्त्वात् सम्यक्त्वम् । तदितरप्रमाणानां व्यवहारदशायां बाधाभावात् । व्यावहारिकतत्त्वावेदकप्रामाण्यकत्वादसम्यक्त्वम् । तथा, ऊहितो मननिदिध्यासनपूर्वकमवगतो यः प्रत्यगभिन्नः परमात्मा तस्य चरितात् सृष्टिकर्तृत्वादिलक्षणात् काऽपि स्त्री तदनन्यपरा श्रुतिर्न चलेन्न प्रचलति । अयमर्थः । सृष्टिप्रतिपादकश्रुतीनां सृष्टिमुपन्यस्य तन्निषेधाभिधानादऽविचिकित्समद्वितीयत्वं प्रतिपादितं भवतीति परम्परया निरस्ताखिलद्वैतविभ्रमे अखण्डे सच्चिदानन्दैकरसे परमात्मनि तात्पर्य्यम् । अन्यथा वायौ प्रतिषिद्धस्य रूपस्यान्यत्र सत्त्ववद् ब्रह्मणि प्रतिषिद्धस्य द्वैतस्यान्यत्र सत्त्वशङ्का स्यात् । उपासनाप्रकरणपठितसगुणब्रह्मप्रतिपादिकानां तूपासनाविध्यपेक्षितगुणारोपमात्रपरत्वं, न गुणपरत्वम् । निर्गुणप्रकरणस्थानां निषेधविध्यपेक्षितनिषेध्यसम्पादकत्वेन विनियोगः । कर्मप्रकरणपठितानां संयोगपृथक्त्वन्यायेन विविदिषायामुपयोग इति काऽपि श्रुतिः परमात्मचर्य्यावर्णनान्न चलतीति । ननु महेन्द्रादिप्रतिपादनपरतयोपलभ्यमानानां तासां कथं परमात्मपरत्वमितिचेत् तत्राहुः ॥ त्रैलोक्येति ॥ इदमनुभूयमानं रूपं सत्तास्फूर्त्यात्मकं, येन सेश्वरं जगत् सुन्दरं दृश्यते तदालोच्य तत्तद्देवादिप्रतिपादनपराणां मध्ये च काऽपि न चलति । यद्यद्विभूतिमत् सत्त्वं श्रीमदूर्जितमेव वा * तत्तदेवाऽवगच्छ त्वं मम तेजोंऽशसम्भवमिति भगवत एव इन्द्रादिरूपेणावस्थानाभिधानादिति भावः । इदमेवोदाहरणैः स्पष्टयति ॥ यदिति ॥ येन रूपेण, सर्वतःपाणिपादं तत् सर्वतोऽक्षिशिरोमुखम् * सर्वतः श्रुतिमल्लोके

सर्वमावृत्य तिष्ठतीति सर्वात्मभावप्रतिपादनादिति भावः ॥ ४० ॥

अथोत्तरादिग्गताः प्रार्थयन्ते ॥

व्यक्तं भवान् व्रजभयार्त्तिहरोऽभिजातो (१)
देवो यथादिपुरुषः सुरलोकगोप्ता ॥
तन्नो निधेहि करपङ्कजमार्त्तबन्धो
तप्तस्तनेषु च शिरःसु च किङ्करीणाम् ॥ ४१ ॥

व्यक्तमिति ॥ आदिपुरुषो देवो भवान्, यथा वामनादिरूपेण सुरलोकगोप्ता जातस्तथेदानीं व्रजभयार्तिहरोऽभिजातः प्रकटित इत्यस्माकं व्यक्तं विस्पष्टमस्ति ज्ञानम् । वसुदेवगृहेऽवतीर्णस्य सद्यो व्रजप्रवेशात् । एवं मुख्यमवतारप्रयोजनं जानीमः । तव व्रजस्थानां गोपादीनां भयं भगवता नाशितम् । सम्प्रति तप्तानामस्माकमार्तिहरणमवशिष्यते । तदवतारसार्थक्याय तवावश्यकमिति भावः । ननु तथापि मर्यादयैवार्तिहरणं युक्तमतः कामार्त्तिज्ञानेन हरिष्यामीत्याशङ्कानिरासायोक्तम् ॥ देवः ॥ यथादिपुरुषः ॥ सर्वकारणभूतः । ततश्च देवासुरादिषु समोऽपि इन्द्रादिस्वभक्ताभिलाषानुसारेणोपेन्द्रादिदेवो भूत्वा दैत्यान् मारयन् वैषम्यमङ्गीकरोति तथाऽस्मदर्थं गृहीतगोपालविग्रहः स भवानऽस्मदार्तिहरणाय मर्यादोल्लङ्घनमपि करोत्विति भावः । तस्माद्, ये यथा मां प्रपद्यन्ते तांस्तथैव भजाम्यहमिति स्वप्रतिज्ञामनुसरेत्याहुः ॥ तदिति ॥ यस्मान्मनोरथाऽनुसारिफलप्रदातृत्वेन भवान् प्रसिद्धस्तस्मान्नोऽस्माकं स्तनेषु कामार्तिनाशाय करपङ्कजं निधेहि । तत्र योग्यं सम्बोधनम् ॥ हे आर्तबन्धो ! शिरःसु च निधेहि । कामोपाधिका-

---

(१) व्रजजनार्तिहर इति पाठान्तरम् ।

ऽपीयं भवतीनां भक्तिः शुद्धायामेव तस्यां पर्यवस्यतीत्याश्वसनार्थमिति भावः । यद्वा, अस्माकमेव भयार्तिहरणं तवाऽवतारस्य मुख्यं प्रयोजनम् । तेनास्माकं हृदयतापनिवृत्त्यर्थं स्तनेषु करपङ्कजम् अमृतस्रावित्वात् तापनाशकं निधेहि । संसारभयनिरासार्थं च शिरःसु तन्निधेहीत्यर्थः । यतो वयं किङ्कर्य्योऽतोऽस्मद्भयार्तिनाशनमार्तबन्धोस्तव योग्यमेवेत्याहुः ॥ किङ्करीणामिति ॥ अनभिज्ञापक्षे, तस्मादलं चातुरीनिबन्धनैर्वाग्विलासैः, सर्वथाप्यस्मदभिलषितं सम्पादयेत्याहुः ॥ व्यक्तमिति ॥ यथा अदितौ जात आदिपुरुषो देवः सुरलोकगोप्ता तथा व्रजस्य दावादिभयं वातवर्षादिपीडां च हर्तुं व्रजेश्वर्य्यां भवानभिजातः । नारायणसमो गुणैरित्युक्तत्वात् । व्यक्तमिदं, न तु गुप्तमतोऽस्माकं कामादिभयार्तिहरणमपि स्वव्रतरक्षणायावश्यकमिति भावः । नच युष्मदङ्गीकारेण युष्मत्पतीनां भयार्ती भविष्यतस्तद्धरणार्थमभिजातस्य तत्प्रदानमनुचितमिति शङ्क्यम् । अग्रहणे सत्यस्मन्मरणावश्यम्भावादस्मत्पत्यादीनां तत्कृतभयार्तिनाशस्यास्मद्ग्रहणं विनाऽसम्भवात् । भवतु, स्वस्याभीप्सितमावेद्यतामित्यपेक्षायामाहुः ॥ तदिति ॥ यस्मादेवं तस्मात् तप्तेष्वस्माकं स्तनेषु करपङ्कजं, निधेहि=सम्यक्स्थापय । तव हस्तस्य पङ्कजरूपत्वात् सूर्यतापेन कमलस्येव तस्यास्मत्स्तनतापेन सुखमेव भविष्यतीति व्यङ्ग्यम् । यतो, हे आर्तबन्धो नो चेदिदं नाम निरर्थकं भविष्यतीति भावः । सदैन्यमाहुः ॥ किङ्करीणां शिरःसु च निधेहि ॥ इतः परमेतावन्मात्रेणास्मान् दासीः कुर्विति भावः । यद्वा, शिरःसु करपङ्कजस्थापनेन त्यागभयं निवर्त्तय । यतो वयं किङ्कर्य्यः । त्वं चार्तबन्धुः । तस्मादस्माकमार्त्यादिकं त्वन्निबन्धनम्, अन्यनिमित्तं वा नोपपन्नमिति भावः । यद्वा नास्तीदमनुचितम् । यतो वयं किङ्कर्य्यस्ततः परीक्षार्थे वा तथा

कर्तव्यमिति रसोक्तिः ॥ मानिनीपक्षे, बलात् स्तनादौ हस्तं धर्त्तुं प्रवृत्तमालक्ष्याहुः ॥ व्यक्तमिति ॥ व्रजस्य भयार्त्योर्हरणाय जातस्त्वमस्माकमुभयसाधने कर्मणि नियोजयितुं नार्हसीति भावः । तस्मात् करपङ्कजं, हे आर्तबन्धो धर्मभङ्गभयार्तिनाशक, हे तप्त ! कामाग्नितापित, किंकरीणां दासीनामपि, किमुत सतीनामस्माकं शिरःस्वपि नो निधेहि, किमुत स्तनेषु नो निधेहीति । यद्वा, व्रजभयार्त्तिहरणायाभिजातस्य तस्य तव तद्दुद्धारहरणादिना तत्प्रदानं नोचितमिति भावः । यद्वा, बलात्कारेण यद्यस्मान् स्पृशसि तर्हि प्राणान् वयं त्यक्षामस्तेन सर्वेषां भयार्ती भविष्यतस्तच्च तथाभूतस्य तव नोचितमिति भावः । हे कामार्त, किंकरीणामपि त्वदभिलाषरहितानामतप्तेषु स्तनेषु शिरःसु च करपङ्कजं न निधेहि । यद्वा, या नः किंकर्यस्तासां तप्तस्तनेषु करपङ्कजं निधेहि । उक्तिप्रत्युक्तिमद्वाक्यं संलाप इति कीर्त्यते * इत्युक्तत्वात्, स्वागतमित्यादि, एतदन्तं प्रकरणं संलापाख्योऽनुभावः ॥

निवृत्तिपक्षे, किञ्च, जगत्कारणत्वेन प्रतिपादितो भवान् सर्वाधिष्ठानभूतोऽतस्त्वय्यध्यस्तस्य प्रतिपादनं त्वत्प्रतिपादनमेवेत्याशयेनाहुः ॥ भगवान् देवः स्वयम्प्रकाशचिदानन्दस्वरूपः । तथा च मन्त्रवर्णः, एको देव इति । अत एवादिपुरुषः । सोऽकामयत बहु स्यामित्यादि । जगत्कारणत्वेन प्रतिपादितोऽभिजातः । सच्च त्यच्चाभवत्, तत् सृष्ट्वा तदेवाऽनुप्राविशदित्यादिना सर्वस्वरूपापन्नत्वेन निरूपितो यथा सुरलोकगोप्ता तथा व्रजस्य काण्डत्रयात्मकस्य वेदस्य भयार्तिहरोऽपीति व्यक्तं निश्चितम् । यद्वा, यथा आदिपुरुषो देवो भगवान् वामनादिरूपेण सुरलोकगोप्ताऽभिजातः । तथा मत्स्यरूपेण व्रजभयार्तिहरोऽप्यभिजात इति व्यक्तम् । यद्, वादिकृतवेदभयार्तिहरणार्थं कृष्णद्वैपायनादिरूपेण प्रकटित

इति व्यक्तमित्यर्थः । यस्मादेवं तत् तस्मात् करपङ्कजम् । करोतीति व्युत्पत्त्या करशब्देनाज्ञानमुच्यते । तल्लक्षणात् पङ्काज्जातमधिकार्यन्तःकरणं नोऽस्माकं श्रुतीनां शिरःसु शिरोभागेषु वेदान्तेषु निधेहि तद्विचारार्थं प्रवर्तय । यथा तप्तस्तनेषु ब्रह्मपरत्वाभावप्रतिपादनेन तप्तेषु स्तनस्थानीयेषु कर्मोपासनद्वारा ब्रह्मपरभागेषु च निधेहि । वेदैश्च सर्वैरहमेव वेद्य इत्यादिप्रेरणेनेति भावः । यतो वयं सर्वा अपि भवतः किंकर्य्यस्त्वय्येव तात्पर्य्यवत्यो, भवाँश्चार्तबन्धुस्तत्तद्वादिभिरसुरैश्च दत्तपीडानामस्माकं संसारार्तानां मुमुक्षूणां च बन्धुरतो योग्यमिदमिति संबोधनाशयः ॥ ४१ ॥

ततः किं वृत्तमित्यपेक्षायामाह ।

श्रीशुक उवाच ॥

इति विक्लवितं तासां श्रुत्वा योगेश्वरेश्वरः ॥
प्रहस्य सदयं गोपीरात्मारामोऽप्यरीरमत् ॥ ४२ ॥

इतीति ॥ इत्युक्तप्रकारेण तासां त्रिविधानां गोपाङ्गनानां विक्लवितं प्रेमपारवश्यमिलितप्रार्थनोपालम्भनिषेधरूपं भाषितं श्रुत्वा तच्छ्रवणाभिलाषं पूरयित्वा प्रहस्य प्रहासेनापि वैकल्यमुत्पाद्य । यद्वा सुष्ठूक्तं भवतीभिरित्यपि तदुक्तानुमोदने रत्याख्यभावव्यञ्जनाय प्रकर्षेण हसित्वा । यद्वा, प्रहासेनाऽभिज्ञाः प्रति—युष्मन्निष्ठया प्रीत्याऽत्यर्थमहं प्रसन्नोऽस्मीति । अनभिज्ञाः प्रति—अहोऽद्यैकस्मिन्नेव दिने मया गृहीतेनाऽवहित्थाभावेन ता भवत्यो लज्जायाः श्राद्धं कृतवत्य इति ॥ मानिनीः प्रति, अहो अतिकठिना भवत्यो, जितं युष्माभिरिति सूचयित्वा सदयं यथा भवति तथा, गोपीररीरमत् रमयामास । अभिज्ञापक्षे, सदयं सकरुणम् । अनभिज्ञापक्षे, सस्नेहम् ॥ मानिनीपक्षे, सन् अयः शुभावहो विधिर्यत्र तद् गोपीररम-

पदित्यनेन तास्तन्मनोरथानुसारेण भगवान् प्रेष्ठ आसक्त इत्येवं प्रतीतः सन् रमयामास, स्वयं त्वसङ्ग एवेति सूचितम् । पूर्णकामस्याऽसङ्गनिर्विकारस्य परमात्मनो रमणे दयैव हेतुर्न तु कामेनेति बोधनाय सदयमित्युक्तम् । आत्मारामोऽपीत्याश्चर्यबोधनाय । अहो तासां प्रेमप्राबल्यम् । सनकाद्यात्मारामवशीकरणगुणगणोऽपि स्वयमात्मारामोऽपि ताभिर्वशीकृत इति । ननु आत्मनि आरामः क्रीडा यस्य तस्य निरिन्द्रियस्याऽसङ्गस्यैकस्य असंख्याताभिस्ताभिः कथं रमणं सम्भवतीत्याशङ्क्याह ॥ योगेति ॥ योगाः सौभग्यादयस्तेषामीश्वरा रुद्रादयस्तेषामपीश्वरः । तथा अघटितघटनासमर्थे अज्ञानिप्रतीत्यनुसारेण प्रपञ्चभानवत् तत्प्रतीत्यनुरोधेन रमणोपकरणभानस्याप्यनिरुद्धत्वादिति भावः । यद्वा, अरीरमदपि, वस्तुत आत्माराम एव । यतो, योगेश्वरेश्वरः । यद्वा, ताभिः रममाणोऽप्यात्मरूपाभिस्ताभिरारामवत् क्रीडा यस्येति, न तस्य लौकिकरमणमिति भावः ॥

निवृत्तिपक्षे, इति यथोक्तप्रकारेण तासां श्रुतीनां सदैन्यप्रार्थितं श्रुत्वा, प्रहस्य प्रसन्नो भूत्वा, सदयं यथा स्यात् तथा आत्मारामोऽपि स्वप्रकाशचिदानन्दस्वरूपत्वात् प्रमाणप्रवृत्त्ययोग्योऽपि गोपीः श्रुतीररीरमत् । अतन्निरसनद्वारा तद्विषयतामगच्छत् । यतो योगेश्वरस्य सकलसबन्धघटनसमर्थस्याव्याकृतस्य मायादिशब्दप्रतिपाद्यस्येश्वरः । तथाच । जगज्जन्मादिकारणत्वप्रतिपादनेन श्रुतयो मयि पर्यवस्यन्तीत्यधिकारिचेतसि दृढतरनिश्चयमुत्पादितवानिति भावः ॥ ४२ ॥

रमणप्रकारमाह ॥

ताभिः समेताभिरुदारचेष्टितः

प्रियेक्षणोत्फुल्लमुखीभिरच्युतः ॥

उदारहासद्विजकुन्ददीधिति-
र्व्यरोचतैणाङ्क इवोडुभिर्वृतः ॥ ४३ ॥

ताभिरिति ॥ यथोडुभिस्ताराभिर्वृत एणाङ्कः पूर्णश्चन्द्रः शोभते तद्वत् ताभिर्वृतोऽच्युतो व्यरोचत । विशेषेण शोभितः । अनेन दृष्टान्तेन अन्योन्यापेक्षया शोभावत्त्वम् । गोपीनां तन्वीत्वं, स्वर्णवर्णत्वं व्यज्यते । ताभिः समीपमागताभिरादौ समेताभिर्मिलिताभिर्भगवाँश्च ॥ उदारचेष्टितः ॥ उदाराणि अलौकिकानि निर्मलानि मुक्त्यादिफलदानि चेष्टितानि करस्पर्शनपुष्पार्पणकटाक्षादिरूपाणि यस्य । तस्य तादृशचेष्टितैस्तासां रसोदयमाह ॥ प्रियकर्तृकमीक्षणं, स्वकर्तृकं वा तदीक्षणं तेनोत्फुल्लानि विकसितानि मुखानि यासाम् । अनेन भगवन्मुखस्य चन्द्रत्वं, तन्मुखानां कुमुदत्वं बोधितम् । अथ भगवतोऽपि रसोदयमाह ॥ उदारो हासो यया सा दन्तलक्षणकुन्दपुष्पकान्तिर्यस्य सः । उदारहासेन द्विजकुन्देषु दीधितिर्यस्येति वा । तादृशीभिस्ताभिः, मनस्यपि रसोदयेऽपि च्युतिर्न जातेति ज्ञापनाय अच्युत इत्युक्तम् । यद्वा, तथान्वयेऽपि स्वस्वरूपादप्रच्युत एवासीदित्यच्युतपदेन ध्वनितम् ॥

निवृत्तिपक्षे ताभिः सर्वाभिः, गतिसामान्यादिति न्यायादेकस्मिन्नद्वितीये ब्रह्मणि तात्पर्येण समन्विताभिः श्रुतिभिः । उदाराणि सृष्टिकर्तृत्वादीनि चेष्टितानि यस्य सः । प्रियस्यानन्दरूपस्य परमात्मन ईक्षणाय तद्विषयकप्रेमोत्पत्तये उत्फुल्लानि विकसितानि तत्प्रतिपादनोन्मुखानि मुखस्थानीयानि पदानि यासां ताभिः । उदारो यो हासः = महामाया । हासो जनोन्मादकरी च माया * इत्युक्तत्वात् । स्नेहकला द्विजानि * इत्युक्तत्वाद्, द्विजपदेन स्नेहकला उच्यते । स्नेहकलालक्षणा द्विजा दन्ता यस्य, स चाऽसौ

कुन्दो मुकुन्दः । स एव दीधितिः प्रतिमारूपापन्ना कीर्तिर्यस्य सः । कुन्दो माघ्ये मुकुन्दे च भ्रमिनिध्यन्तरे पुमानिति मेदिनी । कुमुदः कुन्दरः कुन्द इति भारते ॥ ४३ ॥

अथोदारलीलाभिर्वनमपि शोभयन् व्यचरदित्याह ।

उपगीयमान उद्गायन् वनिताशतयूथपः ॥
मालां बिभ्रद् वैजयन्तीं व्यचरन् मण्डयन् वनम् ॥ ४४ ॥

उपगीयमान इति ॥ ताभिरुप समीपे गीयमानः । भक्तपराधीनत्वप्रेयसीजनमनोऽनुरञ्जकत्वमानवतीमानोद्दीपकत्वादिगुणगणालङ्कृतकृष्णनाम्ना पुनः पुनर्गीयमानः, स्वयं च शरच्चन्द्रादिमयं गोपीजनप्रेममयं च गीतमुद् ऊर्ध्वब्रह्मलोकपर्यन्तगामि गीतं गायन् तदुक्तं विष्णुपुराणे— कृष्णः शरच्चन्द्रमयं कौमुदीकुमुदाकरम् * जगौ गोपीजनस्त्वेकं कृष्णनाम पुनः पुनरिति । ततश्चानुरक्तस्त्रीशतयूथपस्तत्पतिः कामिनीरत्नानां पालक इति वा, तदधरपानकर्त्तेति वा । पुनश्च, वैजयन्तीं मुक्तामाणिक्यमरकतेन्द्रनीलवज्राख्यरत्नरचितां स्वाभाविकीमैश्वर्य्यबोधिकां कीर्त्तिमयीम् । पञ्चवर्णा वैजयन्तीति वचनात् । पञ्चवर्णपुष्पग्रथितां वा मालां बिभ्रद् वनमेव सर्वं मण्डयन् अलङ्कुर्वन् व्यचरत् तासां कामोद्दीपनाय लीलागतिं कृतवान् । वनान्तरं गतवानिति वा ॥

निवृत्तिपक्षे, उपगीयमानो मुनिभिः, स्वयं च कृष्णादिरूपेण, मत्तः परतरं नाऽन्यत् किञ्चिदस्ति धनञ्जय * मयि सर्वमिदं प्रोतं सूत्रे मणिगणा इव । क्षेत्रज्ञं चाऽपि मां विद्धि सर्वक्षेत्रेषु भारत । अनादिमत्परं ब्रह्म न सत्तन्नासन्नासदुच्यते । इत्यादिना स्वात्मानमुद्गायन् वनितास्थानीयश्रुतिशतयूथपस्तदर्थत्वात् तत्पतिः । तथाच सूत्रस्मृतिश्रुतिलक्षणप्रस्थानत्रयगम्य इत्यर्थः । तत्त्वमयीं

वैजयन्तीं मालां बिभ्रत् तदवच्छिन्नः सूत्रत्वादिरूपः सः । पञ्चरूपा तु या माला वैजयन्ती गदाभृतः ॥ सा भूतहेतुसंघाता भूतमाला च वै द्विजेति विष्णुपुराणे । अन्तःकरणलक्षणं वनं मण्डयन् व्यचरत् । सर्वासु तद्वृत्तिषु स एवाऽस्फुरदित्यर्थः ॥ ४४ ॥

नद्याः पुलिनमाविश्य गोपीभिर्हिमवालुकम् ॥
रेमे तत्तरलानन्दिकुमुदामोदवायुना ॥ ४५ ॥

ततश्च नद्याः श्रीयमुनायाः पुलिनमाविश्योपविश्य तस्योपवेशनयोग्यतामाह ॥ हिमवालुकम् ॥ हिमवालुकः कर्पूरस्तद्वद्वालुका यत्र । शाकपार्थिवादिवत्समासः । तस्या नद्यास्तरलैस्तरङ्गैरानन्दयुक्तस्तत्करः । स चाऽसौ कुमुदामोदवाँश्च वायुस्तेनोपलक्षितम् ॥ आनन्दीति मान्द्यम् । शैत्यसौरभ्ये स्पष्टे । यद्वा, यथोक्तवायुना हेतुना हिमवालुकम् । यद्वा, तत्तरलानन्दीति पृथक् पदं पुलिनविशेषणम् । तत्रोपविश्य गोपीभिः सह रेमे । जुष्टमिति पाठे रमयाञ्चकारेति परेणान्वयः ॥

निवृत्तिपक्षे, नद्या बुद्धिलक्षणायाः, पुलिनं सात्त्विकं प्रत्ययमाविश्य प्रविश्य तत्तदारूढेति यावत् । ना पुरुषः परमात्मा गोपीभिः श्रुतिभिः सह रेमे तदुक्तं भगवता । तेषामेवानुकम्पार्थमहमऽज्ञानजं तमः ॥ नाशयाम्यात्मभावस्थो ज्ञानदीपेन भास्वतेति । तत्तद्विषयाभिकाङ्क्षालक्षणतापस्य निवृत्तत्वाद्धिमवालुकस्थानीयं शान्तम् । अत एव, तस्या नद्यास्तरलास्तृष्णादिलक्षणास्तरङ्गास्तत्तरलास्तैः शान्ततरलैरानन्दि आनन्दाविर्भावसाधनम् । यतः कुमुदामोदवायु, कुं पृथिवीं भारावतारणादिना मोदयतीति कुमुदः परमात्मा कुमुदपुष्पस्थानीयः । तत्सम्बन्धिहर्षो गन्धस्थानीयः । तद्युक्तो वायुस्थानीयो निरूढः प्राणवायुर्यत्र तत् ॥ ४५ ॥

एवं सर्वप्रकारेण तासां जातस्मरकोलित्वं सम्पाद्य सोपकरणं रसविलासचरित्रमाह ॥

बाहुप्रसारपरिरम्भकरालकोरु-
नीवीस्तनालभननर्मनखाग्रपातैः ॥
क्ष्वेल्यावलोकहसितैर्व्रजसुन्दरीणा-
मुत्तम्भयन् रतिपतिं रमयाञ्चकार ॥ ४६ ॥

बाहुप्रसारेति ॥ तत्राष्टविधालिङ्गनमादौ दर्शयति । दूरे स्थिताऽन्यनविशेषः स्वयं बाहुप्रसारस्ततो बलादपि परिरम्भ आश्लेषस्ततः करादीनामालभनान्यालिङ्गनानि । तत्र कराऽऽलभनं हस्तेन हस्तग्रहणम् । एवं कचोन्नयनार्थम् अलकानां स्पर्शः । बाहुबन्धार्थमूरुस्पर्शः । रसोद्गमनार्थस्तत्तत्क्षतताडनादयः कामयुद्धनिरूपकाः । नखक्षतादिभिस्तत्तत्स्थाने स्थितस्य कामस्योद्बोधायाभिधानात् । क्ष्वेल्या प्रम्लोभनादिः । तत्पूर्वकान्येवावलोकनानि हसितानि च तैः रसस्थापकैर्व्रजसुन्दरीणां रतिपतिं कामम् उद्दीपयन् रमयाञ्चकार । ता रमयामास । संयुक्तः कामो रतिपतिर्वियुक्तस्त्वग्निरूपः ।तत्राऽपि तासां सुखमेव प्रकाटितवान् । न तु कामान्तेन विरतिमुत्पादितवानिति भावः ॥

निवृत्तिपक्षे, अविवेकावस्थायां बाहुप्रसारादिभिर्जातो यो रतिपतिः कामस्तमुत्तम्भयन् नमयन् व्रजसुन्दरीणामुपनिषदः । कर्मणि षष्ठी । रमयाञ्चकार । अधिकारिचेतसि कामनिवृत्तिपूर्वकनिबोधितमखण्डैकरसानन्दस्वरूपमात्मानं प्रकाटितवानिति भावः ॥ ४६ ॥

एवं संयागशृङ्गारमुपपाद्य, न विना विप्रलम्भेन संयोगः पुष्टिमश्नुते ※ कषायिते हि वस्त्रादौ भूयान् रागोऽभिवर्द्धते इ-

ति भरतेनोक्तत्वात् तत्पुष्ट्यर्थं विप्रयोगमुपपादयितुं पीठिकां रचयति ॥

एवं भगवतः कृष्णाल्लब्धमाना महात्मनः ॥
आत्मानं मेनिरे स्त्रीणां मानिन्योऽभ्यधिकं भुवि ॥ ४७ ॥

एवमिति ॥ एवं पूर्वोक्तप्रकारेण भगवतः सर्वदानसमर्थात् सदानन्दस्वरूपात् कृष्णात् परिपूर्णत्वेन न्यूनतामात्ररहितत्वान्महात्मनो लब्धो मान आदरो याभिस्ताः सत्यः । सम्प्रति मानवत्यो बभूवुः । भुवि स्त्रीणां समाजमध्ये प्रत्येकं सर्वा एवात्मानमऽभि सर्वप्रकारेणाधिकं च मेनिरे । स्त्रियः प्रतिगर्वितमानसा बभूवुः । दम्पत्योर्भाव एकत्र सतोरप्यनुरक्तयोः ❋ स्वाभीष्टाश्लेषवीक्षादिविरोधी मान उच्यते । अहेरिव गतिः प्रेम्णः स्वभावकुटिला ततः । सनिमित्तोऽथवा यूनोर्मानोदय उदीरितः । तथाचास्मत्समाना सती अन्या नास्त्यतोऽस्मान् यदि प्रार्थयिष्यति तदा रसं दास्यामस्तथा सत्यस्मत्प्रार्थनया यथा भगवानस्मद्दर्शने जातस्तथा तत्प्रार्थनया वयमपि भविष्याम इति रसार्थमेव भावो, न तु दोषरूपः । भगवद्भावनया कृतत्वादिति भावः ॥

निवृत्तिपक्षे, इत्थं प्रत्यगभिन्नस्य परमात्मन औपनिषदत्वं प्रतिपाद्य ताभिरपि दुर्ज्ञेयतयैव प्रतिपादितमिति बोधयितुं दुर्ज्ञेयताप्रतिपादनमुपक्रमते ॥ एवम् उक्तप्रकारेण प्रतिपादिताद्भगवतो निरङ्कुशैश्वर्यवतः कृष्णाच्छुद्धात् सच्चिदानन्दरूपान्महात्मनः प्रत्यगऽभिन्नात् परमात्मनो लब्धं मानं प्रामाण्यं याभिः । ततश्च, अस्य महतो भूतस्य निःश्वसितमेतद् यदृग्वेद इत्यादिश्रुत्या स्त्रीणां श्रुतीनां भुवि जन्मभूमौ परमात्मनि प्रामाण्यवत्यः सत्यः, आत्मानमधिकं मेनिर इत्यर्थः ॥ ४७ ॥

ततो भगवान् यत् कृतवाँस्तदाह

तासां तत्सौभगमदं वीक्ष्य मानं च केशवः ॥
प्रशमाय प्रसादाय तत्रैवान्तरधीयत ॥ ४८ ॥

तासामिति ॥ स्वात्मानमभ्यधिकम्मन्यमानानां सौभगान्मानाज्जातमसाधारणतापादकं मानस्य गाढावस्थारूपं, येनादरणीयोऽपि तिरस्क्रियते तादृशं मदं तद्धेतुभूतमनुनयाद्यसाध्यचित्तसमुन्नतिरूपं मानं च वीक्ष्य विशेषतस्तदुपलभ्य, मदस्य निवृत्त्यर्थं तासां प्रशमाय चितोन्नतिवारणाय मानशान्तये, तासां प्रसादाय प्रसन्नतया स्ववश्यतापादनाय केशवस्तत्रैवान्तरधीयत, न त्वन्यत्र गच्छन् कयाचिद् दृष्टः । केशा अंशवो यस्य सन्तीति भारतीयव्युत्पत्त्या या शोभा तासां सा तदन्तर्धाने निवृत्तेति व्यज्यते । यद्वा कश्च ईशश्च वशयतीति केशवः । तथाच ब्रह्मरुद्रयोरपि रजस्तमोपशमनेन वशीकरणसमर्थस्य तासां मदमाननिरसनेन वशीकरणे किं चित्रमिति भावः । ननु मदमाननिरासायोपायान्तरं कुतो न रचितवानिति चेदसंभवात् । न हि प्रत्येकप्रसादनं संभवति । एकस्याः प्रथमं प्रसादने सैवादौ किमिति प्रसादितेत्यऽपरस्या मानाधिकोद्भवात् । तस्मात् सर्वाः प्रति रासरसं दातुं प्रेमवर्द्धनाऽर्थं विप्रलम्भः । यद्वा, सर्वासां मदमानयोः प्रशमाय, प्रेयस्याः श्रीराधाभिधायाः सख्याः प्रसादाय वक्ष्यमाणगत्यानुरोधेन तया सहान्तरधीयत । केशान् वयते संस्करोतीति केशवः । तथाच केशप्रसाधनादितत्प्रेमोपायविधाने परमचतुर इति भावः ॥

निवृत्तिपक्षे, तासां श्रुतीनां यः सौभगमदस्तं वीक्ष्य, मानं स्वस्मिन् प्रामाण्यं च वीक्ष्य दुरवगमख्यापनमदस्य प्रशमाय।नावेदविन्मनुते तं बृहन्तमिति श्रुत्या श्रुतिरूपमानातिरिक्तमानागम्यत्वं ख्याप्य-

ते । तेन तासां प्रसादाय तत्रैव तत्तदन्तःकरणवृत्तिष्वेवान्तरधीयत । सर्वप्रत्ययसाक्षित्वेनैवावगन्तुं शक्यतां प्राप्त इत्यर्थः । तथाच श्रुतिः । यदि मंसे सुवेदेति दहरमेत्र न तत्त्वं वेत्थात्मनो रूपं नो न वेदेति वेद च, अविज्ञातं विजानतां विज्ञातमऽविजानतां, प्रतिबोधविधत्त स तमित्याद्या। अत्र ब्रह्मणो दुर्बोधत्वं, श्रुत्येकगम्यत्वं, सर्वप्रत्ययसाक्षित्वेन वेद्यत्वं च दर्शितम् ॥ ४८ ॥

इति श्रीपरमहंसपरिव्राजकाचार्यबालगोपालतीर्थ-
श्रीपादशिष्यदत्तवंशावतंस—रामकुमारसूनु-
धनपतिसूरिकृतायां श्रीभागवतगूढार्थ-
दीपिकाख्यव्याख्यायां दशमस्कन्धे
एकोनत्रिंशोऽध्यायः
॥ २९ ॥ १ ॥

## अथ रासपञ्चाध्यायीव्याख्यायां गूढार्थदीपिकायां द्वितीयोऽध्यायः ॥ २ ॥ ( ३० ) ॥

त्रिंशे विरहसंतप्तचेतसां गोपयोषिताम् ॥
तन्मयत्वसुखप्रश्नमुखलीला निरूप्यते ॥ १ ॥

अथ भगवदन्तर्धानानन्तरं जातां दशां वर्णयिष्यन्नादौ रसाऽऽसक्तचित्तानां भगवत्सखीनाम् अकस्मात् प्रेष्ठादर्शनजन्यं महान्तं तापमाह ॥

श्रीशुक उवाच ॥

अन्तर्हिते भगवति सहसैव व्रजाङ्गनाः ॥
अतप्यँस्तमचक्षाणाः करिण्य इव यूथपम् ॥ १ ॥

अन्तर्हित इति ॥ भगवति पूर्णाऽखिलैश्वर्य्यसम्पन्ने परमनिधिभूते सहसैवाकस्मादेवान्तर्हितेऽदर्शनं गते, सहसैव तं भगवन्तमचक्षणा अपश्यन्त्यः सहसैवातप्यन्त निःसीमसन्तापवत्यो जाताः । रङ्कः सहसैव प्राप्तां सार्वभौमश्रियं सहसैवाचक्षाणो यथा संतप्यते तद्वत् । यतो व्रजाङ्गना बालभावमारभ्य तस्मिन्नेवासक्तस्वान्ता इति भावः । यद्वा, अन्तर्हिते अन्तरन्तःकरण एव तासां प्रविश्य स्थिते सति, बहिस्तं भगवन्तमचक्षाणा बहिर्मुखवदन्तश्चाचक्षाणा अतप्यन् । यता व्रजाङ्गना अन्तर्विचाराकुशला इत्यर्थः । नच तासां कामात्मत्वं स्थितम् । कात्मात्मनां दर्शनादिना शान्तोपलम्भात् । अतस्तासां परमप्रेमवतीनां दर्शनस्पर्शनादिकमेव मुख्यमिति द्योतयितुं दृष्टान्तमाह ॥ करिण्यो हस्तिन्यो यूथपं महामत्तगजमचक्षाणा यथा तप्यन्ति तद्वत् । करिणीनां यथा गजदर्शनाद्यभावे क्लेशो भवति तथा नाऽन्यासामित्यतस्ता एव दृष्टान्तीकृताः ॥

निवृत्तिपक्षे, अथ विजानतामविज्ञातत्वात्तदपेक्षया अन्तर्हिते भगवति सहसैव तं परमात्मानम् अचक्षाणाः साक्षात्प्रतिपादयितुमशक्ताः स्वजन्यवृत्तिप्रतिफलितचैतन्येन विषयीकर्त्तुमशक्ताश्च व्रजाङ्गनाः श्रुतयोऽतप्यन् । तप्ता बभूवुः ॥ १ ॥

तापानन्तरं जातां तासां दशामाह ।

गत्यानुरागस्मितविभ्रमेक्षितै-
र्मनोरमालापविहारविभ्रमैः ॥
आक्षिप्तचित्ताः प्रमदा रमापते-
स्तास्ता विचेष्टा जगृहुस्तदात्मिकाः ॥ २ ॥

गत्येति ॥ रमापतेः प्रेष्ठस्य गत्या स्वाभाविकेन नूपुरस्वनयुक्तेन पादन्यासेन, अनुरागः स्नेहस्तत्पूर्वकं मन्दहसितं तत्सहितो विलासस्तत्सहितानीक्षितानि कटाक्षास्तैः ।
तथा मनो रमयति, मनसि रमते च य आलापो गुह्यं भाषणं वाचिकव्यापारः । विहाराः शृङ्गारचेष्टाः । चित्तवृत्त्यनवस्थानं शृङ्गाराद् विभ्रमो मत * इत्युक्तलक्षणो विभ्रमश्च । तैराक्षिप्तान्याकृष्टानि चित्तानि यासां ताः । अतस्तदात्मिकास्तन्मय्यो, यतश्च प्रमदाः प्रकृष्टमदयुक्ता, रमापतेर्विविधाश्चेष्टा जगृहुस्तदनुकरणैरक्रीडन्नित्यर्थः । अत्रानुरागचित्तवृत्त्यनवस्थाने मानसे, आलापो वाचिको, गत्यादयः कायिकाः । अन्यभावानामप्युपलक्षणमेतत् । अत्राभिज्ञापक्षे, रमापतेर्लक्ष्मीपतेः श्रीविष्णोरन्तरेवाविर्भूतस्वरूपस्य लक्ष्म्या सह विलासरूपाः स्वात्मना च सह विलासरूपा याश्चेष्टास्ता जगृहुः । ननु दासीनां तासां भगवल्लीलाऽनुकरणमनुचितमित्याशङ्कानिवृत्त्यर्थमुक्तं— तदात्मिकाः॥स भगवानात्मनि आविर्भूतो यासां ताः । अतस्तापनिवृत्त्यर्थं तल्लीलाग्रहणं न विरुद्ध-

त इति भावः । किञ्च, प्रमदाः । तथाच प्रमदहेतुकदासीभावं विहाय कान्ताभावस्तथा प्रभुचेष्टानुकरणमपीति भावः ॥ अनभिज्ञापक्षे रमापतेः सर्व्वसौन्दर्य्यसम्पत्तिस्वामिनः ॥ मानिनीपक्षे, गतश्चेद् गच्छतु नाम, वयमेव तदीयास्ताश्चेष्टाः कर्तुं शक्ता इति बहिः प्रकटीकर्तुं तास्ताश्चेष्टा जगृहुः । यतस्तदापि प्रकृष्टो मदो यासां ताः । यतश्च, तदात्मिकाः परस्परमातिगाढप्रेमवशादभेदाभिमानवत्यः । अन्तस्तस्य गत्यादिभिराक्षिप्तचित्ताः ॥

निवृत्तिपक्षे, श्रोत्रस्य श्रोत्रं मनसो मनः वाचो ह वाक् यद्ध प्राणस्य प्राण इत्यादिश्रुतयश्चेतनाद्यधिष्ठितैर्गत्यादिभिः परमात्मानं प्रत्याकृष्टचित्ताः । यतः प्रकर्षेण मदः परमात्मप्रतिपादने हर्षो यासां ताः । रमापतेः सत्तास्फूर्तिलक्षणशोभास्वामिनश्चैतन्यस्यैव तास्ता गमनादिरूपाश्चेष्टा जगृहुः । स्वयं वाच्यवाचकयोरभेदात् । तदात्मिकाः ॥ २ ॥

तदात्मिका इत्युक्तं भगवत्स्वरूपपरिग्रहमाह ।

गतिस्मितप्रेक्षाणभाषणादिषु
प्रियाः प्रियस्य प्रतिरूढमूर्त्तयः ॥
असावहं त्वित्यबलास्तदात्मिका
न्यवेदिषुः कृष्णविहारविभ्रमाः ॥ ३ ॥

गतीति ॥ प्रियस्य गत्यादिषु प्रतिरूढा मूर्तिर्यासाम् । भगवद्धर्मान् स्वात्मन्येवारोपितवत्यः । यतः प्रियाः । तथापि मनसा प्रतिरूढमूर्तयो, न तु नटवत् तत्तद्वेषादिकं धृतवत्यो, यतोऽबलास्तादृशबलरहिताः । अतस्तदावेशवशात् तासां तथात्वमित्याह ॥ तदात्मिकास्ततः कृष्णविहारविभ्रमाः ॥ कृष्णस्येव विभ्रमाः क्रीडा वि-

लाप्ता यासां ताः । अतो योऽन्विष्यतेऽसावहमिति परस्परं निवेदितवत्यः । न तु वयं व्रजस्त्रिय इति मनागपि काश्चिदपि जानन्ति स्मेत्यर्थः । कृष्णविहारैः स्मर्य्यमाणैर्विभ्रम उन्मादो यासामिति वा । लीलाख्यानुभावोऽयम् । समानमिदं पद्यमितरपक्षयोरपि ॥

निवृत्तिपक्षे, गत्यादिषु देहेन्द्रियव्यापारेषु याः प्रियास्तत्तदाकारवृत्तयस्ताः प्रियस्यात्मनः प्रतिरूढा आत्मन्यारूढा मूर्तयो यासां ताः । अत एवास्य वासुदेवस्य विभोश्चिदात्मन एव बलं विषयप्रकाशनसामर्थ्यं यासाम् । किञ्च, तस्मिन्नारोपितत्वात् तदात्मिकाः, तत्सत्तातिरिक्तसत्ताविधुरा इति । कृष्णस्य सदानन्दस्वरूपस्य परब्रह्मणः सत्तास्फूर्तिप्रदानृत्वादिलक्षणविहारे, तद्वर्णने विभ्रमो यासां ताः श्रुतयो न्यवेदिषुः बोधयामासुः । तथा असौ परमात्माऽहमेवेति न्यवेदिषुरित्यर्थः । तथाच श्रुतयः । यद्वाचाऽनभ्युदितं येन वागभ्युद्यते, यन्मनसा न मनुते येनाहुर्मनो मतं, यच्चक्षुषा न पश्यति येन चक्षुरपि पश्यति अहं ब्रह्मास्मि, योऽसावादित्ये पुरुषः सोऽसावहमित्याद्याः ॥ ३ ॥

एवं तन्मयतां प्राप्तानां लीलामुपवर्ण्य पुनः प्राप्तस्वशरीराऽनुसन्धानानां चेष्टामाह ॥

गायन्त्य उच्चैरमुमेव संहता
विचिक्युरुन्मत्तकवद्वनाद्वनम् ॥
पप्रच्छुराकाशवदन्तरं बहि-
र्भूतेषु सन्तं पुरुषं वनस्पतीन् ॥ ४ ॥

गायन्त्य इति ॥ अहो येन वयं रमिताः स प्रेष्ठ इदानीं क्व गत इति विचिन्त्य संहता मिलिताः प्रथमं प्रेष्ठमेव गायन्त्य एव । य-

था वयं तदीयकलगीतमाकर्ण्य झटिति तत्समीपमागतास्तथास्मद्गीतमाकर्ण्य सोऽप्याश्वऽस्मत्सन्निधावायास्यतीत्याशयेन तथा जाताः । ततोऽनागते प्रेष्ठे उन्मत्तकवद् वनाद्वनं विचिक्युः । अस्मिन् वने प्रेष्ठः स्यादित्याशयात् तत्र वने प्रतिवृक्षादिकमन्वेषणं कृतवत्यः । अन्वेषणेनाप्यलब्धं प्रेष्ठं वनस्पतीन् उन्मत्तकवत् पप्रच्छुः । सर्वत्र पूर्णत्वात् तद्व्यतिरिक्तस्य सर्वस्याप्यनिरूपणाच्च तदन्वेषणतत्प्रश्नयोः परमोन्मत्तचेष्टितत्वमित्यभिप्रायेणोन्मत्तकवदित्युक्तम् । भयातिशयद्योतनाद् वा । आकाशवद् भूतेष्वन्तर्बहिः सन्तम् । अत एव पुरुषं पूर्णं सर्वात्मानमन्वेषणाद्ययोग्यमित्यर्थः ॥

निवृत्तिपक्षे, आकाशवत् सर्वगतश्च नित्यः, सत्यं ज्ञानमनन्तं ब्रह्मेत्येवममुमेवाकाशवदन्तर्बहिश्च भूतेषु सन्तं पुरुषं गायन्त्यः, सोऽन्वेष्टव्य इति तं विचिक्युस्तस्यान्वेषणं प्रतिपादयामासुः । तथा, गुहाहितं गह्वरेष्ठं पुराणम् इत्यन्तःकरणलक्षणं वा वनं वनस्थितम् ॥ उन्मत्तकवदिति ॥ सुखरूपात्मविशिष्टमन्तःकरणं वनं तस्माद् वनाद्वनं तद्वृत्तिविशिष्टादितरवृत्तिविशिष्टं, तथात्मा विजिज्ञासितव्य इति प्रश्नपूर्वकं विचारं, वनस्पतीन् अन्तःकरणवनस्पतीन् सत्त्वगुणादीनुद्दिश्य बोधयामासुरित्यर्थः ॥ ४ ॥

तत्कृतप्रश्नान् प्रपञ्चयति ॥

दृष्टो वः कच्चिदश्वत्थ प्लक्ष न्यग्रोध नो मनः ॥
नन्दसूनुर्गतोहृत्वा प्रेमहासावलोकनैः ॥ ५ ॥

दृष्ट इति ॥ तत्रादौ विष्णुप्रजापतिरुद्रावतारभूता एते अश्वत्थादयोऽवश्यं पश्येयुरत एते प्रष्टव्या इत्याशयेनाश्वत्थादीन् पृच्छन्ति ॥ हे अश्वत्थ, हे प्लक्ष, हे न्यग्रोध, वो युष्माभिः कच्चित् किं नन्दसूनुर्दृष्टः । नन्देन परमभक्तेन जन्मान्तरे आराध्य पुत्रत्वेन

लब्धः । अस्मदनुग्रहाय वा तत्पुत्रत्वेन प्रकटितः । अत एव नोऽस्माकं मनः प्रेमहासावलोकनैर्हृत्वा गतः=अन्तर्हितः । यद्यपि स सर्वत्र व्याप्तस्तथापि नन्दसूनुत्वेनास्माकं प्रेष्ठोऽतस्तद्भूयोऽन्विष्यते । युष्माभिर्दृष्टश्चेत् तर्हि करुणया वक्तव्यः । तं लब्ध्वा सुखिन्यः स्याम इति भावः । यद्वा, ननु विष्णुः कथं चौर्यं कृतवानित्याशङ्कानिरासाय नन्दसूनुरित्युक्तम् । तथा च यथा दधिदुग्धादि चोरितवाँस्तथा मनोऽपीति भावः । ततस्तेभ्य उत्तरमलब्ध्वा अहो, अलक्ष्मीसंस्थानभूतः, पशुना देवाः स्वर्गलोकमायन्, तस्य शिरश्छित्वा मेदः प्रक्षारयन् स प्लक्षोऽभवादिति श्रुतेरयमपि प्लक्षो, लोकानामज्ञानहेतुरेव, नितरामग्राण्यधोभूतानि यस्येत्यधोदृष्टिर्न्यग्रोधः । अत एते न वदिष्यन्तीति विचार्य्यान्यत्र गताः ॥ अनभिज्ञापक्षे, अत्युच्चतरत्वादेते दूरतरचरमप्यस्मत्प्रेष्ठमवश्यं पश्येयुरिति सम्भाव्य पृच्छन्ति ॥ दृष्ट इति ॥ किमर्थं पृच्छयत इति चेत् तत्राहुः ॥ नन्दस्य साधोः सूनुर्नोऽस्माकं स्त्रीजनानां प्रेम्णा सर्वलोकमोहनौषधिविशेषेण सहितैर्हासावलोकनैर्भृत्यैश्चौर्य्यकर्म्मकुशलैर्विवृतनेत्रादिद्वाराऽन्तःकरणलक्षणान्तः प्रवेष्टुं समर्थैर्मनोरत्नमञ्जूषां चोरयित्वा पलायितोऽतस्तं पृच्छाम इत्यर्थः । तत उत्तरमलब्ध्वा, महत्त्वपूज्यत्वाद्यभिमानादेतेऽस्मान् क्षुद्राः प्रति अवज्ञया न कथयेयुरिति विचार्य्यान्यत्र गताः ॥ मानिनीपक्षे, एते सर्वलोकपूज्याः प्रष्टव्या इत्याशयेन पृच्छन्ति ॥ दृष्ट इति ॥ दृष्टश्चेद् वक्तव्यः । यतो नो मनो हृत्वा, न त्वस्माभिस्तस्य मनो दत्तमिति भावः । ननु भवदन्तःस्थं मनो बलात् कथं हृतवानितिचेत् तत्राहुः ॥ प्रेमेति ॥ स्वागतमित्यादिवचनैराविष्कृतेन प्रेम्णाऽन्तःप्रवेशो, हासेन ग्रहणमवलोकनेन हरणम् । ननु तदुपरि भवतीभिर्विश्वासः किमर्थं कृत इतिचेत् तत्राहुः ॥ नन्दस्य सर्वानन्दप्रदस्य परमविश्वसनीयस्य

सूनुरतोऽस्मभ्यं सुखमेव दास्यतीति मत्वा विश्वासः कृत इति भावः । ततोऽलब्धोत्तराः क्षणं स्थित्वा, अहो किमेताभिरित्यस्मानवजानन्तस्तब्धाः प्रत्युत्तरं न ददते तदलमेतैः क्षुद्राभक्ष्यफलैःप्रफुल्लैः । न यत्रश्चिरं तिष्ठति । न्यगधो रुणद्धि । रुधिर् आवरणे । प्लक्षस्त्यधो गच्छतीत्यर्थः । तत्त्वात् प्रष्टुमयोग्यैश्च बहिरत्यन्तकठोरैः, परोपकारमाहात्म्यानभिज्ञैर्भूतात्रासयोग्यैरिति विचार्य्यान्यत्र गताः ॥

निवृत्तिपक्षे, गुणा न विदुरात्मानमित्युक्तत्वाद् गुणाद्यभास्यतामाविष्कुर्वन्ति ॥ दृष्ट इत्यादिना ॥ अश्वत्थादिपदैः सत्त्वरजस्तमोऽभिधा गुणा गृह्यन्ते । नोऽस्माकं प्रेम प्रसन्नतापूर्वकम्, अवलोकनैः श्रवणादिरूपैर्मनो हार्दं हृत्वा उद्धृत्य, नन्दः = आनन्दश्चासौ सूनुः=अर्कश्च । आनन्दस्वयम्प्रकाशरूपः परमात्मा गतोऽवगतः स युष्माभिर्दृष्टः कच्चित् । भवद्भिरप्रकाश्य इति भावः । सूनुः पुत्रेऽनुजेऽर्के नेति मेदिनी ॥ ५ ॥

अथ कुरवकादीन् दृष्ट्वा एते महान्तः पुण्यवन्तः सगन्धा मधुपैरऽतिथिभिरनिशं सेव्यमानाः शुद्धान्तःकरणाः कथयिष्यन्तीति मत्वा पृच्छन्ति ।

कच्चित् कुरवकाऽशोकनागपुन्नागचम्पकाः ॥
रामानुजो मानिनीनां गतो दर्पहरस्मितः ॥ ६ ॥

कच्चिदिति ॥ कुरवकः शोणाऽम्लानः । नागो नागकेसरः । हे कुरवकादयः! रामानुजः कच्चिदितो गतः । अनेन मार्गेण गच्छन् दूरतोऽपि दृष्टः स्यादिति भावः । रामावतारे कृतायाः सेवायाः फलप्रदानायास्मिन्नवतारे स्वीयं नाम, ज्येष्ठत्वं च लक्ष्मणाय दत्तवान् । स भक्ता अस्माँस्त्यक्तुमयोग्यास्त्यक्त्वा गतोऽतः पृच्छामः । तस्माद् दृष्टश्चेत् कृपया वदतेति रामानुजपदाशयः । करुणा-

सागरोऽपि भगवान् कठोरचित्तक्षत्रियजात्युत्पन्नत्वात् स्वभाव-मनुकुर्वन्नस्मत्प्राणहरचेष्टो जात इति वा तदाशयः । यद्यपि तेन र-मितानामस्माकं मान उत्पन्नस्तथापि तन्निरासार्थमन्तर्धानं नोचि-तम् । यतो दर्प्पहरं स्मित यस्य सः । तथाच मिष्टौषधप्रदानेन रोगनिवृत्तिसंभवे विषप्रदानं नोचितम् । अर्के चेन्मधु विन्देत कि-मर्थं पर्वतं व्रजेदिति न्यायात् । अतस्तदन्यायं विचार्य वक्तव्य इति भावः । तेभ्योऽलब्धोत्तरास्तदैवाकस्मिकेन वायुना चालि-ताग्रशाखाँस्तानालक्ष्य, अहो शिरोधूननेन, वयं न जानीम इति सू-चयन्त्यतोऽलमेभिः सम्पद्गर्वितैरिति मनसि निधायाऽन्यत्र याताः ॥ अनभिज्ञापक्षे, अहो किमर्थं गत इति चेद् वृथैव गत इत्याशयेना-हुः ॥ रामानुजः ॥ तथाच, बलभद्रानुजस्य तस्य नास्ति भय-संभावना अतो भयनिमित्तकं तद्गमनं न सम्भवति । नाऽप्यस्म-न्माननिरासार्थम् । तस्य स्मितमात्रेणैव सुकरत्वादित्याहुः ॥ दर्प्पे-ति ॥ तथाच स्मितादिस्मृतिमात्रेण हृतमानास्तद्वियोगे क्षणमपि जीवितुमशक्ता अन्वेषयामः पृच्छामश्च । अतः कृपया वदतेति भावः । तेभ्योऽप्यलब्धोत्तराः, अहो अयं कुरवकः । अतिमकरन्द-त्वाद् अलीनां कुत्सित ईषद्वा रवो यत्र सः । यद्वा कुत्सिताद्रोदन-शब्दात् कं सुखं यस्य स रोदनप्रियः। अशोकः शोकरहितः । पी-डानभिज्ञत्वाद् दयावार्जितः । नागोऽयं नाम्नैव भयानकः । अयं तु पुंसामपि नागः । चम्पकोऽपि परिणामविरसस्तस्मादेते न प्रेष्ट-कथनेनास्मान् सुखयिष्यन्तीति विचार्य्यान्यत्र गताः ॥ मानिनीपक्षे, कुरवकाशोकौ कामोद्दीपकौ । नागादयः कामबाणपुष्पाः कामिनं व्यावर्तयन्त्यतः कामिनं तं पश्चाऽप्येते ज्ञास्यन्तीति मत्वा तान् पृच्छन्ति ॥ कच्चिद् गतः, किं वा क्वचिदत्रैव निलीय वर्तते । ननु किमर्थमन्विष्यत इत्याशङ्क्यास्मत्सर्वस्वमपहृत्य पलायित इत्याह ॥

मानिनीनां मानैकधनानामस्माकं स्मितादिना दर्पं हृतवान्, निर्धनाश्चास्मान् कृत्वा गतोऽतो धूर्तशिरोमणिरस्माभिर्द्धर्तव्य इति भावः । ननु अबलाभिर्युष्माभिः कथं धर्तुं शक्य इतिचेत् तत्राहुः ॥ रामानुजः ॥ तस्य ज्येष्ठो भ्राता बलरामोऽप्यस्मदपेक्षया न प्रबलस्तस्यायमनुजः कथं प्रबलः स्यात् । अन्यथा पलायनं न कुर्यादिति भावः । ततोऽलब्धप्रतिवचना अहो एते पुरुषजातित्वेन कठोरचित्ताः कृष्णपक्षपातिनो न कथयिष्यन्तीति मत्वाऽन्यत्र गताः ॥

निवृत्तिपक्षे, कुरवकादिशब्दैः कुरवकादिस्थानीयानामाकाशादीनां स्थूलसूक्ष्मभूतानां ग्रहणम् । रामा महामाया अनुजा भगिनी यस्य स सर्वकार्योपादानमायाधिष्ठानभूतः कच्चिद् युष्माभिरितोऽवगतः । स त्वऽस्माकं मानिनीनां तत्र प्रामाण्यवतीनामपि दर्पहरं स्मितं तत्स्थानीयं चराचरात्मकं जगद् यस्य सः । अस्माकमपि सत्त्वासत्त्वाभ्यां वक्तुमशक्यत्वात् । तथाच महाभूतेभ्योऽपि पर इति भावः ॥ ६ ॥

अथान्यत्र गत्वा तुलसीं ददृशुस्तत, इयं भगवतोऽतिप्रिया सर्वदा तन्निकटवर्तिनी स्यात् तज्ज्ञानवती, भगवदीयतया दयावती वक्ष्यति चेति मत्वा तुलसीसन्निधौ गत्वा तां पृच्छन्ति ।

कच्चित् तुलसि कल्याणि गोविन्दचरणप्रिये ॥
सह त्वाऽऽलिकुलैर्बिभ्रद् दृष्टस्तेऽतिप्रियोऽच्युतः ॥ ७ ॥

हे तुलसि त्वया अच्युतो भगवान् कच्चिद् दृष्टः । यतस्त्वं कल्याणी भगवत्प्राप्तिसाधनपुण्यपुञ्जानुष्ठानवती । अत एव गोविन्दचरणौ प्रियौ यस्याः सा. तच्चरणयोः प्रियेति वा । अत एव तवाऽतिप्रियः । अत एवाऽच्युतः । त्वया कदाऽपि न वियुक्तः । अत एव त्वामलिकुलैर्भ्रमरसमूहैः सह विक्षेपमप्यगणय्य बिभ्रद्

धारयन् वर्त्तते । यद्यप्यऽस्माकमप्यतिप्रियस्तथापि नास्माकं तादृशं कल्याणं येन कामोपाधिं विना तच्चरणावेवातिप्रियौ भवेताम् । अतो नास्माकमच्युतः, किन्तु पलाय्यास्मत्सकाशाद् गतः । सर्वस्यापि कल्याणकरी त्वमिति वा । अतो दृष्टश्चेत्तर्हि कथयेति भावः । तस्या अनासोत्तरा, अहो भगवदीयेयं भगवदाज्ञां विना न कथयिष्यतीति मत्वाऽन्यत्र गताः ॥ अनभिज्ञापक्षे, हे तुलसि हे कल्याणि दर्शनभगवच्चरणार्पणादिना सर्वलोककल्याणप्रदे यतो गोविन्दस्य महाविष्णोश्चरणयोः प्रिये । अत एव नारायणसदृशत्वादस्माकमतिप्रियोऽप्यच्युतः, अलिकुलैः सह त्वां बिभ्रत् त्वया दृष्टः कच्चित् । त्वत्सुगन्धप्रीत्या मधुव्रता अपि तेन न निवार्य्यन्ते, वयं तु तादृशसुगन्धराहित्येन त्यक्ताः किं कुर्मः । तस्मादस्मज्जीवनाय तं कथयेति भावः । अहो विष्णुपूजागर्विताः जारासक्तमानसा अकल्याणीरस्मान् न ब्रूत इति मत्वाऽन्यत्र याताः ॥ मानिनीपक्षे हे तुलसि, हेकल्याणि, परमकल्याणवति, यतो, गोविन्दचरणप्रिये चरणेत्यादरव्यञ्जकम् । गुरुचरणैरुक्तमितिवत् । हे गोविन्दस्य प्रिये इत्यर्थः । यतोऽलिकुलैः सह त्वां जातां बिभ्रत् । अहो त्वदीयं भाग्यम् । यतोऽतिक्रान्ताः प्रिया अस्मादृश्यो येन स त्वां सर्वदा बिभ्रदास्ते । अत एव त्वत्तोऽप्रच्युतस्तस्माद् दृष्टश्चेदवश्यं कथयेति भावः । अहो, इयं ततो लब्धादरा जाताऽस्वर्यगर्वा न कथयेदिति मत्वाऽन्यत्र प्रास्थताः ॥

निवृत्तिपक्षे, अथ ज्ञानेन्द्रियपञ्चकमध्ये मुख्यत्वाच्चक्षुरिन्द्रियं पृच्छन्ति । हे तुलसि, तत्स्थानीये चक्षुरिन्द्रिये, कल्याणि कल्याणस्य साधनभूते, गोविन्दस्यैन्द्रियकसुखभोक्तुश्चरणं तत्तद्विषयं प्रति विचरणं यैरिन्द्रियैस्तेषु मध्ये प्रिये अलिकुलैस्तत्तद्वृत्तिरूपत्वात्तत्सखीसमुदायैः सह त्वां बिभ्रत् प्रियो, यतो वस्तुनः स्वरूपात् क-

दाचिदपि न प्रच्युतः स ते त्वया दृष्टः कच्चित् ॥ ७ ॥

अहो एताः साधारण्यः स्त्रिय एवास्माकमुपकारं करिष्यन्तीति मत्वा मालत्यादिकाः पृच्छन्ति ॥

मालत्यदर्शि वः कच्चिन्मल्लिके जाति यूथिके ॥
प्रीतिं वो जनयन् यातः करस्पर्शेन माधवः ॥ ८ ॥

मालतीति ॥ हे मालति, हे मल्लिके, हे जाति, हे यूथिके । मां लक्ष्मीं लतति वेष्टयतीति मालती । मल्लते सुगन्धादिकं धारयतीति मल्लिका । जायत इति जाती, सुखजनकत्वात् सफलजन्मवती । यूथमस्त्यस्या असौ यूथिका । एवम्भूता अन्वर्थसञ्ज्ञाः । यूयं चतस्रो लता अतिसुगन्धपुष्पा भगवत्प्रिया, अतो भवतीर्वयं पृच्छामः । वो युष्माभिः कच्चिद् दृष्टः । न दृष्ट इति न वक्तव्यम् । यतो वो युष्माकं हस्तकमलस्पर्शेन प्रीतिमुत्पादयन् यातः । करस्पर्शजन्यस्यात्यन्तविकासस्य दर्शनात् । ननु तस्यास्मत्स्पर्शेने किं प्रयोजनमिति चेत् तत्राहुः ॥ माधवः ॥ लक्ष्मीपतेः सर्वदा तत्सहितस्य तदलङ्कारार्थं पुष्पावचय आवश्यक इति भावः । अहो एता अल्पाः फलरहिता लक्ष्मीशमानिन्यो न कथयिष्यन्तीति मत्वाऽन्यत्र गताः । मालतीजात्योरवान्तरभेदा यूथिका, जुहीति ख्याता ॥ अनभिज्ञापक्षे, अहो सौभाग्यातिरेकवत्यो नम्रस्वभावाः सर्वसुखकरा विकसितवदनाः परोपकारिण्यो भविष्यन्तीति मत्वा मालत्यादिकाः पृच्छन्ति ॥ मालतीति ॥ हे मालत्यादयः, कच्चिद् वोऽदर्शि, भवतीनां न केवलं दर्शनमात्रमपि तु स्पर्शोऽपि जात इत्यनुमीयत इत्याहुः ॥ प्रीतिमिति ॥ यतो माधवः परमशोभाधीशत्वात् स्पर्शेनापि शोभाजनकः । स्पर्शश्च पुष्पप्रियत्वात्तस्यावश्यमेव जातः स्यात् । माधवो वसन्त इवेति श्लेषेण तद्वियोगो भवतीनामप्यस-

ह्योऽतस्तुल्यदुःखत्वादवश्यं वदतेति भावः । अहो एताः कर-स्पर्शेन निवारणं कृत्वा गतः स्यादतस्तद्भयान्न कथयन्तीति म-त्वाऽन्यत्र याताः ॥ मानिनीपक्षे, अहो इमा मालत्यादयः सौभा-ग्यादिगुणैरसम्मतमाना अत एताः प्रष्टव्या इत्याशयेन पृच्छन्ति ॥ मालतीति ॥ यतो भवत्यः पुष्पिण्योऽतः करस्पर्शेन वः प्रीतिं जन-यन् यात इति सनर्मेर्ष्यां व्यञ्जयन्ति । परं त्वेतावता भवती-भिर्गर्वो न विधयो, यतः स न कस्या अपि पतिः, किन्तु मायाः शोभामात्रस्य धवः स्वामी। तस्मादस्मत्पक्षपातिन्यो यूयमवश्यं क-थयतेति भावः । अहो सद्यःस्पर्शोत्थाऽखर्वगर्ववत्य एता न ब्रुव-त इति मत्वाऽन्यत्र प्रस्थिताः ॥

निवृत्तिपक्षे, मालत्यादिस्थानीयानि यानि श्रोत्रत्वग्रसन-घ्राणाख्यानीन्द्रियाणि पृच्छन्ति ॥ मालतीति ॥ वः प्रीतिं विषयो-पलब्धिसुखं तत्प्रकाशेन जनयन् यातः । प्रतीत्या विषयं व्याप्य स्थितः । ननु व्यापकस्य तस्य कथं गमनमितिचेत् तत्राहुः ॥ माधवः ॥ मायाः प्रमावृत्तेर्धवः स्वामी । तथाच प्रमाणचैतन्यस्य गमनादिकमिति भावः ॥ ८ ॥

अहो एते आम्रादयः परोपकारशीलास्तपस्विनस्तीर्थसेवा-पराश्चेति मत्वा तान् पृच्छन्ति ॥

चूतप्रियालपनसासनकोविदार-
जम्ब्वर्कबिल्वबकुलाम्रकदम्बनीपाः ॥
येऽन्ये परार्थभवका यमुनोपकूलाः
शंसन्तु कृष्णपदवीं रहितात्मनां नः ॥ ९ ॥

चूतेति ॥ चूताम्रयोर्मधुराऽम्लफलत्वेन भेदः । नीपो धूलि-

कदम्बो बृहत्पुष्पः । कदम्बः क्षुद्रपुष्पो तिग्मगन्धः । प्रियालः शालभेदः । पनसः कटहर इति ख्यातो बृहत्फलः । असनः पीतशालः । कोविदारः काचनारभेदः । अर्कः क्षुद्रवृक्षोऽपि गोपेश्वरप्रियत्वात् प्रश्नार्हः । च्योतति रसामिति चूतः । च्युतिर् क्षरणे । प्रीणातीति प्रियालः । प्रीञ् तर्पणे । पनाय्यते स्तूयत इति पनसः । अस्यति परदुःखमिति असनः । असु क्षेपणे । कुं भूमिं विदारयतीति कोविदारः । दृ विदारणे । परोपकारार्थं झटिति भूमिं निर्भिद्य निःसृतः । जमति परदुःखमिति जम्बूः । जमु अदने । अर्कः भानुवज्जाड्यहरः । बिलति परदुःखमिति बिल्वः । बिल भेदने । वङ्कते अवगच्छति परदुःखमिति वकुलः । वकि गत्यर्थः । अम्यते स्वदुःखनिरासार्थं जनैरित्याम्रः । अम गत्यादौ । कपति हिनस्ति परदुःखमिति कदम्बः । नयति सुखं प्रापयतीति नीपः । णीञ् प्रापणे । एवम्भूता हे चूतादयः । अन्ये च ये मधूकादयः परार्थभवकाः परार्थमेव भवो जन्म येषां ते । भविका इति पाठे भविकं मङ्गलम् । फलाद्युत्कर्षोऽपीत्यर्थः । तत्रापि, यमुनोपकूलाः ॥ यमुनायाः कूलसमीपे वर्तमानाः । तीर्थनिकटवर्तित्वात् सत्यवादिनः । नोऽस्मभ्यं कृष्णस्य सदानन्दरूपस्य भगवतः पदवीं मार्गं शंसन्तु कथयन्तु स्वस्य करुणापात्रतामाविष्कुर्वन्ति ॥ रहितात्मनाम् ॥ काश्चिद्गृहादिरहिताः । अनस्तच्छंसनम् । तत्रापि मृषा भाषणं न विधेयम् । यतो, यमुनोपकूलाः । यमुनासन्निधौ वर्तमाना इति शपथो व्यज्यते । शंसनेनात्मप्रदानं कुरुतेति भावः । अत्र दर्शनं सिद्धवत्कृत्य मार्गं पृच्छन्ति । अहो एते समाधिनिष्ठा न शृण्वन्त्यतो न किञ्चिदपि वदन्तीति निवृत्ताः ॥ अनभिज्ञापक्षे, कृष्णस्यास्माच्चित्तरत्नमञ्जूषामाकृष्य गतस्य चोरचक्रवर्तिनः पदवीं शंसन्तु । व्यञ्जयन्तु । ननु स्वयमेवान्विष्य तस्य

मार्गो निश्चेतव्य इत्याशङ्क्याहुः ॥ रहितात्मनाम् ॥ विरहव्याकुलतयाऽन्वेषणसमर्थसमाहितमनोरहितानाम् । कृपया भवन्त एव वदन्तु ॥ अहो एते तीर्थवासिनोऽतोऽत्यन्तकठोरहृदयाः, अतो न कथयिष्यन्तीति ततो निवृत्ताः ॥ मानिनीपक्षेऽप्येवम् ॥

निवृत्तिपक्षे चूतादिस्थानीयानि पञ्चकर्मेन्द्रियाणि, जम्ब्वादिस्थानीयान् पञ्चप्राणान्, कदम्बनीपौ चित्ताऽहंकारौ पृच्छन्ति ॥ चूतेति ॥ ये चाऽन्ये विषयाः परार्थभवका आत्मशेषभूता यमुनास्थानीयमायाप्रदेशस्थिताः । नोऽस्माभिः श्रुतिभी रहितात्मनामस्मद्विचारविधुरचित्तानाम् । कृष्णस्य परमात्मनः पदवीं मार्गं शंसन्तु स्वप्रकाशकस्य प्राप्त्युपायं सूचयन्तु । तथाच तदनुमापका भवन्तो, न तु तदवभासका इति भावः ॥ ९ ॥

एवमतिविह्वलमानसाः प्राप्तात्यन्तदैन्या मार्गकथनप्रार्थनयोग्यमार्गस्मरणाद् भूमीनिहितदृष्टयस्तस्याः सर्वत्र सत्त्वेनावश्यं तद्दर्शनं सम्भाव्याहुः ।

किं ते कृतं क्षिति तपो बत केशवाङ्घ्रि-
स्पर्शोत्सवोत्पुलकिताङ्गरुहैर्विभासि ॥
अप्यङ्घ्रिसम्भव उरुक्रमविक्रमाद्वा
आहो वराहवपुषः परिरम्भणेन ॥ १० ॥

किमिति ॥ हे क्षिति, ते त्वया किं कीदृशनामधेयं तपः कृतम् । यद्यप्यस्माभिरपि तपः कृतमेव, तथापि तादृशफलानुकूलं न कृतमऽतो महान् खेद इत्याशयेनाहुः ॥ बतेति ॥ यतो या त्वं केशवस्याङ्घ्रिस्पर्शेनोत्सवो यस्याः सा । कश्च अश्च ईशश्च केशाः ब्रह्मविष्णुशिवास्तेऽस्य वश्यतया सन्तीति केशवः । केशान्विया-

मकतया वाति गच्छतीति वा । तथाच तादृशस्य परमात्मनोऽङ्घ्रिस्पर्शोत्सवो, नाल्पस्य तपसः फलमिति भावः । एतज्ज्ञापकं चिह्नमाहुः ॥ अङ्गरुहैरुत्पुलकिता विभासि विशेषेण शोभसे । तत्र विशेषं पृच्छन्ति ॥ अपि सम्भावनायाम् । किमयमुत्सवोऽङ्घ्रिसम्भवः । सम्प्रति तवैकदेशे चरणस्पर्शसम्भूतः । यद्वा नैतावत्, किन्तु पूर्वमेवोरुक्रमस्य त्रिविक्रमस्य वामनस्य पदा सर्वाक्रमणादधुना भगवच्चरणस्पर्शेनासमन्तात् । अथवा, नैतावदेवाऽपि तु ततोऽपि पूर्वं वराहस्य वपुषा परिरम्भणेनालिङ्गनेनेदानीमङ्घ्रिस्पर्शात् स्मृतेन । तथाचास्मत्साजात्यं भवत्या अप्यतस्तं पश्यन्ती त्वं दर्शयेति भावः ॥ अनभिज्ञापक्षे, अहो किमर्थं तीर्थवासिनोऽमी निघ्नन्ते. यस्तमवश्यं जानाति स प्रष्टव्य इत्युक्तवतीनां मध्ये काचित् क्षितिं सूचयामास, ततः सर्वास्तामाहुः ॥ किमिति ॥ हे क्षिति, त्वया किं तपः कृतम् । पुलकितैरङ्गरुहैरङ्कुरैः केशवस्याभिरूपाः केशा यस्य तस्य परमसुन्दरस्य कृष्णस्यास्याङ्घ्रिस्पर्शोत्सवा विभासि । तादृशोत्सवजनके तपसि पृष्टे, अदत्तोत्तरां तामुपलक्ष्य स्वयमेवोत्प्रेक्षन्त्योऽपि अयमङ्घ्रिसम्भव उत्सव उरुक्रमविक्रमजनितपीडारूपतपसो वा, आहोस्विन्महावराहवपुषः परिरम्भणजनितव्यथारूपेण तपसा । यद्वा, तच्चरणस्पर्शजनितपुण्याद्वा । किं वा तत्परिरम्भणजनितपुण्येन । तथाच तत्पादस्पर्शादिरहितत्वाद् दुर्भगानामस्माकं, तत्पादस्पर्शमनुभवन्ती सुभगा त्वं करुणया तं प्रदर्शयेति भावः ॥ मानिनीपक्षेऽप्येवम् ॥

निवृत्तिपक्षे, अथ क्षितिस्थानीयं मनः पृच्छन्ति ॥ किमिति ॥ हे क्षिते, त्वया किं तपः=आलोचनं कृतम् । विचारस्वरूपमाविष्कुर्वन्ति । केशान् ब्रह्मविष्णुरुद्रान् वष्टि इच्छति सृष्ट्याद्यर्थमिति केशवः परमात्मा । तस्याङ्घ्रिरंश इवांशो जीवात्मा । ममै-

मांशो जीवलोके जीवभूतः सनातनः * इत्युक्तत्वात् । तस्य स्पर्शेनोत्सवो यस्याः सा पुलकितैर्हर्षितैरङ्गरुहैः सङ्कल्पविकल्पात्मवृत्तिभिर्विभासि । स उत्सवः किं यथोक्ताङ्घ्रिस्पर्शसम्भवः । यद्वा उरुक्रमस्यान्तर्यामिणो विक्रमात् प्रेरणारूपपराक्रमात् । आहोस्विद् वराहस्य वपुषश्चेतनस्वरूपस्य परिरम्भणेनेति ॥ १० ॥

एवं व्याकुलमानसा अकस्माद् हरिणीं दृष्ट्वा तामेव पृच्छन्ति ॥

अप्येणपत्न्युपगतः प्रिययेह गात्रै-
स्तन्वन् दृशां सखि सुनिर्वृतिमच्युतो वः ॥
कान्ताङ्गसङ्गकुचकुङ्कुमरञ्जितायाः
कुन्दस्रजः कुलपतेरिह वाति गन्धः ॥ ११ ॥

अपीति ॥ हे कृष्णसारपत्नि, अत एव, हे सखि, तत्पतित्वेन समनेत्रत्वेन भीरुत्वादिधर्मसाधर्म्येण भवत्या अस्मत्सखित्वम् । अतो वो युष्माकम् अपि किम् उपगतो मिलितः । इहास्मिन् वने प्रियया सह गच्छन् सुन्दरैर्मुखबाह्वादिभिः स्वगात्रैर्भवतीनां दृशां सुनिर्वृतिपरमसुखं तन्वन् विस्तारयन् । यतोऽच्युतः परमात्मा तदुपमो नेत्रादेः परमानन्दजनक एवेति भावः । ननु प्रियासाहित्यं कथमवगतमित्याशङ्क्याहुः ॥ कान्तेति ॥ कान्ताया अङ्गेन कुङ्कुमरञ्जितायाः कुलपतेर्गोपीसमुदायस्वामिनः स्रजो मालाया गन्ध इह वाति आगच्छति । तथाऽनुभूतगन्धप्रत्यभिज्ञया प्रियासाहित्यं निश्चीयत इति भावः । अत्रैणपत्नीत्यनेन, पत्युर्नो यज्ञसंयोगे इति स्मरणादेणानां जन्मान्तरे याज्ञिकत्वसूचनेन तत्पत्नीनां यज्ञपत्नीत्वं सूचितमिति दृष्टप्रशंसा । उपगत इति तद्भाग्यप्रशंसा । दृशामित्यादिना तन्नेत्रप्रशंसा । अच्युत इति परमानन्दप्राप्तियोग्यता । कान्तेत्यादि दृश्यप्रशंसा । कुन्दस्य शुभ्रतया कुङ्कुमशोभायोग्यता ।

इहेति स्थानस्य गन्धवैशिष्ट्यम् । नातीति तन्नंगर्गनातप्रशंसेति व्यङ्ग्यमाला ॥ अनभिज्ञापक्षे, अहो पुराकृततपःप्रभावात् प्रियचरणसरोजैरनिशंप्राप्तसङ्गतिगर्ववती क्षितिरियं न वदति, यद्वा प्रत्युत्तरं दातुमसमर्था जडा न प्रष्टव्या, किन्तु चेतनः कश्चित् प्रष्टव्य इति चिन्तयन्त्योऽकस्मात् काञ्चिद्धरिणीं दृष्ट्वाहुः ॥ हे सखि एणपत्नि, अच्युतः किं त्वयोपगतः संप्राप्तः । तत्र दृष्टिगोचर एव सम्प्रति क्वचिद्वर्तते, न तु त्वत्तो वियुक्त इति सूचयितुम् अच्युत इत्युक्तम् । तत्र हेतुमाहुः ॥ प्रिययेति ॥ ततः स्वभावादेवाग्रे प्रचलितां तामवलोक्याहो इयं- दृष्ट इति किं ब्रवीमि, तं दर्शयाम्येव, मत्पृष्ठत आगम्यतामिति सूचयन्त्यग्रतो गच्छन्ती ग्रीवां परावृत्य मुहुरस्मान् पश्यति । तत एवैवात्र निर्दये वृन्दावने दयावतीति तामनुगच्छन्त्यो दैवात् क्वापि गतां तामदृष्ट्वा परस्परं पृच्छन्ति स्माऽहो संप्रति हरिणी न दृश्यते, क्व गतेति । ततः काचिदब्रवीदत्रैव कृष्णो वर्तते । सा तु तद्भयात् सूचकत्वदोपापलापार्थं क्वचित् तिरोहितेति श्रुत्वा तत्रैव स्थिता, दैवादागतसौरभ्यमाघ्रायाहो सत्यं सत्यवदुक्तमेव तत्त्वमिति महर्षं पुनराहुः ॥ कान्तेति ॥ गोपीकुलरमणस्य तस्य गोपीसमुदायं विहायैकयैव कयाचित् कान्तया रममाणस्यान्यायं पश्यतेति कुलपतिपदाशयः ॥ मानिनीपक्षे, भगवान् राधया सहान्तर्हित इति पूर्वं स्पष्टमनुक्तमर्थं सपत्नीनां मुखेन मध्ये व्यञ्जयन्ति तस्याः सौभाग्यातिरेकं द्योतयितुम् । तत्र क्षितेरप्यलब्धोत्तराः, अहो सर्वदास्मत्प्रार्थनापरायणस्याऽस्मान् विहायैकाकिनो गमनं कथं जातमिति विचारपराणां मध्ये काचिदवोचत् । सत्यमेव कयाचिद् धूर्तया नीतः स्यादिति । ततश्च संदिहाना एव पर्यटन्त्यस्तादृशं गन्धमाघ्राय कयाचिन्नीत इत्यनुमाय दैवादागतां मृगीमेवावलोक्याऽहो इयं श्रोत्रनेत्रादिमती

ज्ञास्यतीति मत्वा तां पृच्छन्ति ॥ हे सखि, एणपत्नि, अच्युतो वो युष्माकं समीपं गतः किम् । ननु प्रत्यहं गच्छति, किमाश्चर्य्यमित्याशङ्क्याहुः ॥ प्रियया ॥ यतो भवदूदृशामलौकिकानन्ददतत्प्रीतिर्दृश्यते इत्याहुः ॥ गात्रैरिति ॥ ननु प्रियया सहैव गत इति कथं ज्ञात इतिचेत् तत्राहुः ॥ कान्तेति ॥ सैव प्रिया, न वयम् । तयैवाऽप्यच्युतोऽस्माकं तु विहाय गतः । कुलपतेस्तस्य वैषम्यं नोचितमितीर्ष्या व्यज्यते । यद्वा, इहास्मिन् वने वो दृशां गात्रैः सुनिर्वृतिं तन्वन् प्रियया सह सङ्गतः किं वर्तते । नेति न वक्तव्यमित्याशयेनाहुः ॥ कान्तेति ॥

निवृत्तिपक्षे, अथ मृगीस्थानीयां बुद्धिं पृच्छन्ति ॥ अपीति ॥ हे सखि बुद्धे वो दृशां वृत्तीनां गात्रैस्तत्र वृत्त्यवच्छिन्नचेतनरूपैर्गात्रैः सुनिर्वृतिं तन्वन् प्रियया ब्रह्मप्रतिपादिकया तत्त्वमस्यादिरूपया मुख्यया श्रुत्या स उपगतः सङ्गत, इहान्तःकरणे वर्तते किम् । यतः कान्तस्य परमात्मनोऽङ्गमङ्गाय प्रतिपाद्यप्रतिपादकसंबन्धाय कुचयोस्तत्स्थानीयोपासनानिष्कामकर्मणोः कुङ्कुमेन तज्जनितविविदिषया रञ्जितायाः कुलपतेः क्षेत्रस्वामिनाश्चिदात्मनस्तत्सम्बन्धिन्याः कुन्दस्रजस्तत्स्थानीयशुद्धप्रत्ययमालाया गन्ध इह वाति शान्त्यादिरूपसुगन्धयुक्ता प्राणचेष्टाऽत्र दृश्यते इत्यर्थः ॥ ११ ॥

ततो दैवात् क्वापि गतायां हरिण्यां फलभारेण नम्राँस्तत्र-त्याँस्तरूनवलोक्य, भगवन्तं दृष्ट्वा प्रणता इति मत्वा, प्रियासहितस्य गतिविलासान् सम्भावयन्त्यस्तान् पृच्छन्ति ।

बाहुं प्रियांस उपधाय गृहीतपद्मो
रामानुजस्तुलसिकालिकुलैर्मदान्धैः ॥
अन्वीयमान इह वस्तरवः प्रणामं

किं वाऽभिनन्दति चरन् प्रणयावलोकैः ॥ १२ ॥

बाहुमिति ॥ प्रियायाः स्कन्धे उपधाय द्वितीयहस्तेन गृहीतं पद्मं येन स रामानुजः—अग्राह्यनामाऽस्मत्पतिः, मदान्धैस्तुलसिकासम्बन्धिभ्रमरसमुदायैरन्वीयमानोऽनुगम्यमानः । अनेन प्रियासाहित्यमनुमीयते । तुलसिकां विहाय तदङ्गलिप्तोत्कृष्टसौरभद्रव्यसुगन्धलोभादनुगच्छन्तीति । तथेह वने चरन् हे तरवः प्रणामं च प्रणयावलोकैः प्रेमपूर्वकैरवलोकनैरभिनन्दति किं, न वाभिनन्दतीति प्रश्नः । यद्वा तथा चरन् अभिनन्दति आनन्दं प्राप्नोति, वः प्रणामं चाभिनन्दत्यऽनुमोदति किम् ॥ अनभिज्ञापक्षे तादृशं गन्धमाघ्राय तत्रैव स्थितास्तत्रत्यान् वृक्षान् पृच्छन्ति ॥ हे तरवः किमर्थं प्रणामं कुरुत कृष्णप्रसादार्थमितिचेत्, स किमिह चरन् वः प्रणाममभिनन्दति । यद्यपि भवन्तः साधवः परोपकारशीला अनुकम्प्यास्तथापि भवदीयप्रणामं नाभिनन्दतीति वयं जानीमः । कुत इत्याशङ्क्य तस्यान्यत्रासक्तचित्तस्य कार्यान्तरव्यग्रत्वान्नास्त्यवलोकनाऽवकाश इति सासूयमाहुः ॥ बाहुं वामभुजं प्रियास्कन्धे उपधाय तत्कोमलत्वमालोच्य । किञ्च राधायास्तन्मुखगन्धेनोत्पतिष्णूनां भ्रमराणां निवारणार्थमेव दक्षिणकरगृहीतपद्मः ।

तथाचादौ चरन्—तद्गतिविलासव्यग्रः, पुनश्च तत्सेवैकतानमानसश्चाऽतो न तस्यान्यत्र दृष्टिप्रसारणावकाश इति भावः । एतेन, ननु तामेवास्मान् दर्शयितुमागतः कथमस्मत्प्रणामं नाभिनन्देदित्याशङ्कापि निरस्ता । तेन निवारिता एव एते भ्रमरा अनुगच्छन्तीत्याहुः ॥ तुलसिकेति ॥ ननु भ्रमरकुलानामेवानुपदं गच्छतस्त्याशङ्क्याहुः ॥ मदान्धैरिति ॥ मदोन्मत्ता मदान्धैरनुगम्यन्ते, भव्यजनैस्तु मदान्धा नानुगन्तुमुचिता इति भावः ॥ रामानुज इति कठोरतामभिव्यञ्जयन्ति॥ अभिनन्दतीति वर्तमानापदेशाच्छाखाना-

मनुत्थानाच्च क्वचिद्दर्शनयोग्यस्थाने स्थित इति सूचयन्ति । अभिनन्दनाक्षेपाच्च किमर्थं नम्रीभूताः, शाखा उत्थाय समाहिताः सन्तोऽस्मच्चित्तचोरं स्वाज्ञाकरं निःशङ्कं सूचयतेति व्यञ्जयन्ति ॥

निवृत्तिपक्षे, वृक्षस्थानीयान् संघातान् पृच्छन्ति ॥ बाहुमिति ॥ प्रियाया मायाया अंसे बाहुं निधाय तामधिष्ठाय गृहीतं पद्मं जगदुपादानभूतं पुष्कररूपं येन सः । यतो रामा माया अनुजा अधीना यस्य सः । लसि=प्रकाशशीलं कं सुखं तदीयमकरन्दास्वादनपरैः परमहंसलक्षणाऽलिकुलैर्ब्रह्मानन्दलक्षणमदेनान्धैर्विषयदर्शनरहितैरनुगम्यमान इह संघातेषु चरन्, हे तरवः प्रणामं नमस्कारादिलक्षणकर्म किमभिन्दति । तथाचाभिनन्दनकर्तारमात्मानं भवन्तः किं जानन्तीत्यर्थः ॥ १२ ॥

अहो किमर्थं तरवः पृच्छ्यन्ते । स्वस्त्रीसन्निधौ परस्त्रीभिः सह भाषणं न करिष्यन्तीत्यत एताः स्वल्पाः प्रष्टव्या इति काश्चिदाहुः

पृच्छतेमा लता बाहूनप्याश्लिष्टा वनस्पतेः ॥
नूनं तत्करजस्पृष्टा बिभ्रत्युत्पुलकान्यहो ॥ १३ ॥

पृच्छतेति ॥ हे सख्य इमा दृश्यमाना, लताः पृच्छत । ननु यथा स्वसन्निधौ स्वपत्नीनामस्माभिः सह भाषणं दुर्घटं तथा स्वपतिसंगतानामासां हृदे मनसां गतिर्दुर्घटेत्याशङ्क्याहुः ॥ बाहूनिति ॥ यद्यपि वनस्पतेः शाखालक्षणान् भुजानाश्लिष्टास्तथापि नूनं निश्चयेन तस्य श्रीकृष्णस्य करजैर्नखैः स्पृष्टा यतः पुलकानि बिभ्रति । अहो सर्वरसोपमर्दी अस्मत्प्रेष्ठरसः । स्वपतिरसाविष्टानामपि तत्स्पृहादर्शनात् । न हि स्वपतिसंगतावीदृक्पुलकोद्गमः संभवतीति भावः ॥ सममेतादितरपक्षयोरपि ॥

निवृत्तिपक्षे, हे सख्यो वनस्पतेः संघातलक्षणस्य वृक्षस्य वि-

षयलक्षणान् बाहूनप्याश्लिष्टा इमा लतास्तत्स्थानीयरागद्वेषादय इन्द्रियस्येन्द्रियस्यार्थे रागद्वेषौ व्यवस्थिताविन्युक्तत्वात् । नूनं तस्य चिदात्मनः कराः प्रत्ययास्तव जातेन प्रादुर्भूतेन चेतनेन स्पृष्टा अहो उत्पुलकानि बिभ्रति सचेतनतयाऽवभासन्त इत्यर्थः ॥ १३ ॥

उन्मत्तकवत् पप्रच्छुरित्येतत् प्रपञ्चितं, तदुपसंहरन्, रमापतेस्तास्ता विचेष्टा जगृहुस्तदात्मिका इति यदुक्तं तत्प्रपञ्चयितुमुपक्रमते

इत्युन्मत्तवचो गोप्यः कृष्णान्वेषणकातराः ॥
लीलाभगवतस्तास्ता ह्यनुचक्रुस्तदात्मिकः ॥ १४ ॥

इतीति ॥ इत्येवंप्रकारेणोन्मत्तवचो गोप्यः । ह्रस्वश्छान्दसः । यद्वा उन्मत्तस्य वच इव वचो यासां ताश्च ता गोप्यश्च । यद्वा, उन्मत्तवद् एतावत्, ततो गोप्यः कृष्णान्वेषणार्थकातरा अतिविह्वला भगवतस्तास्ता लीला अनुचक्रुः– अनुकृतवत्यः । यतस्तदात्मिकाः । तस्मिन् गाढासक्त्या तदभेदमापन्ना इत्यर्थः । यद्वा तस्मिन् श्रीकृष्णे आत्मा चित्तं यासां ताः । तथाच तीव्रध्याने तदात्मकत्वस्फूर्त्या कृष्णानुकरणम् । तदासक्तिप्राबल्याद्वा । पूतनाद्यनुकरणं तु कृष्णविषयकतद्धेतुकभयादिजनितपूतनाद्यात्मकत्वस्फूर्त्या व्याघ्रादिमदोन्मत्तस्य व्याघ्राद्यनुकरणवत् । अतो न प्रेमविरुद्धभावसंकरः । यद्वा प्रतिकूलानामनुकरणं, योगमायैव तन्मध्ये गोपीस्वरूपा भूत्वा तत्तल्लीलासिद्ध्यर्थं चकार । यद्वा तत्तल्लीलाविशिष्टे भगवति अन्तराविर्भूते बहिस्तल्लीलादर्शनस्य साक्षादसंभवात् तथानुकरणं कृतवत्यः । तत्रोत्कृष्टाः कृष्णरूपं, मध्यमा बलरामादिरूपं, निकृष्टाः पूतनादिरूपम् । कृष्णस्य सदानन्दरूपस्य परमात्मनोऽन्वेषणे कातरा व्यग्राः । कातर्यं प्राप्ता इति वा । ततः षड्गुणैश्वर्यसम्पन्नस्य परमात्मनः संबन्धिन्यस्तास्ता लीला हि प्रसिद्धा अनुचक्रुः ।

भगवत्कृतं तत्तल्लीलानुकरणं वर्णयामासुः । वाच्यवाचकयोरभेदादनुचक्रुरित्युक्तमिति सूचयितुमाह ॥ तदात्मिकाः ॥ द्वे वाव ब्रह्मणो रूपे परं चापरं चेत्यादिश्रुतेः ॥ १४ ॥

अथैतद्विवृणोति ।

कस्याश्चित्पूतनायन्त्याः कृष्णायन्त्यापिबत् स्तनम् ॥
तोकायित्वा रुदत्यन्या पदाहन् शकटायतीम् ॥ १५ ॥

कस्याश्चिद् गोप्याः पूतनावदाचरन्त्याः काचित् कृष्णवदाचरन्ती अहं कृष्ण इत्युक्तवती, तां कृष्णबुद्ध्याङ्के कृतवत्यास्तस्याः स्तनमपिबत् । यावच्छक्यते तावदनुक्रियते । अतोऽसुपानसामर्थ्याभावात् स्तनपानमात्रमुक्तम् । तस्यापि द्वेषभावनाभावान्मरणाभावः । अनुकरणात् तोकायित्वा तोकवदाचरित्वा तोकमात्मानं मत्वेति वा । तोकादात्मानं कृत्वेति वा । शकटायतीं शकटवत् स्थितां पदा चरणेनाऽहन् ॥

निवृत्तिपक्षे काचित् पूतनावदाचरणं तं परमात्मानं वर्णयामास । काचित् कृष्णरूपेण स्तनपानमनुकुर्वती काचित् तोकरूपमनुकृत्य रोदनमनुकुर्वच्छकटरूपापन्नमात्मानं चरणेन हननमनुकुर्वन्तं निरूपयामासेत्यर्थः । एवमग्रेऽपि ॥ १५ ॥

दैत्यायित्वा जहारान्यामेका कृष्णार्भभावना ॥
रिङ्गयामास काप्यङ्घ्री कर्षती घोषनिःस्वनैः ॥ १६ ॥

अन्या तृणावर्तदैत्यवदात्मानं कृत्वा कृष्णार्भं तस्य बाल्यं भावयन्तीमपरां जहार । कापि अङ्घ्री कर्षती घोषनिःस्वनैरिङ्गयामास चालितवती ॥ १६ ॥

तत्कृतं वृन्दावनविहारलीलानुकरणमाह ॥

कृष्णरामायिते द्वे तु गोपायन्त्यश्च काश्चन ॥
वत्सायतीं हन्ति चान्या तत्रैका तु बकायतीम् ॥ १७ ॥

द्वे गोप्यौ कृष्णरामायिते कृष्णरामवज्जाते । काश्चन गोपायन्त्यो गोपबालानुकरणं कृतवत्यः । काश्चन वत्सरूपाश्च जाता इत्यादिद्रष्टव्यम् । तत्र वत्सासुरवदाचरन्ती काचिदन्या बलरामरूपा, प्रलम्बो निहतोऽनेन वत्सको धेनुकादयः * इत्यनुसारेण हन्ति हननमनुकरोति स्म । काश्चिद्बकवदाचरन्तीमन्या कृष्णरूपा हन्ति स्म ॥ १७ ॥

अथ तत्कृतं गवाह्वानादिलीलानुकरणमाह ।

आहूय दूरगा यद्वत् कृष्णस्तमनुर्वतीम् ॥
वेणुं क्वणन्तीं क्रीडन्तीमन्याः शंसन्ति साध्विति ॥ १८ ॥

आहूयेति ॥ तत्र काश्चन गोरूपा जाताः काश्चन गोपालरूपास्तत्र यद्वत् कृष्णो दूरगा आह्वयन् वेणुक्वणनं करोति तद्वत् तं कृष्णमनुकुर्वती दूरगा गोरूपा गोपीराहूय वेणुं क्वणन्ती क्रीडन्ती काचिदन्या गोपरूपाः साध्विति शंसन्ति स्म ॥ १८ ॥

कस्यांचित् स्वभुजं न्यस्य चलन्त्याहाऽपरा ननु ॥
कृष्णोऽहं पश्यत गतिं ललितामिति तन्मनाः ॥ १९ ॥

गोपरूपायां कस्याञ्चिदऽपरा कृष्णरूपा भुजं निधाय चलन्ती आह, ननु कृष्णोऽहं, ललितां मदीयां गतिं, हे गोप्यः पश्यतेति । यत स्तस्मिन्मनो यस्याः सा अतस्तदावेशात् तद्रूपा जातेति भावः । यद्यपीयं लीला पूर्वमनुक्ता तथाप्यत्र तदनुकरणस्यो-

क्त्वाज्जातेति द्रष्टव्यम् ॥ १९ ॥

मा भैष्ट वातवर्षाभ्यां तत्त्राणं विहितं हि वः ॥

इत्युक्त्वैकेन हस्तेन यतन्त्युन्निदधेऽम्बरम् ॥ २० ॥

अपरा कृष्णरूपा, भीता इवावस्थिता गोपादिरूपाः, हे गोपादयो वातवर्षाभ्यां भयहेतुभूताभ्यां मा भैष्ट । ताभ्यां वातवर्षाभ्यां मया त्राणं विहितमित्युक्त्वा यत्नवती एकेन हस्तेनाऽम्बरमुत्तरीयं वस्त्रमुन्निदधे ऊर्ध्वं धृतवती ॥ २० ॥

आरुह्यैका पदाक्रम्य शिरस्याहापरा नृप ॥

दुष्टाऽहे गच्छ जातोऽहं खलानां ननु दण्डधृक् ॥ २१ ॥

एका कृष्णरूपा कालियरूपां काञ्चिच्चरणेनाक्रम्य तस्याः शिरसि आरुह्याह—हे दुऽष्टाहे, इतो गच्छ । ननु निश्चयेन खलानामहं दण्डधृग् जातः । शिरःस्थितिर्वृक्षशाखामालम्ब्य, अन्तःकरणे भगवत आवेशान्निरालम्बतयैव वा । यथा तदीययात्मनः शक्त्या वेशान्तरस्य नृपस्येति संबोधनाशयः ॥ २१ ॥

तत्रैकोवाच गोपाला दावाग्निं पश्यतोल्वणम् ॥

चक्षूंष्याश्वपिधध्वं वो विधास्ये क्षेममञ्जसा ॥ २२ ॥

तत्र तासु मध्ये एका कृष्णरूपा गोपरूपा उवाच । हे गोपाः उल्वणं दावाग्निं, पश्यत शीघ्रं चक्षूंषि पिधध्वम् । निश्चयेनाऽञ्जसा क्षेमं विधास्ये । अत्र विरहेण दावाग्निदर्शनं, भावनया वा । अन्यासां तु तस्या वस्तुतो भगवद्भावभानात् ततस्त्राणप्रार्थना । एवमेव वातवर्षस्थलेऽपि। अत्यन्तमत्तानामेव भगवद्भावोदयात् ॥ २२ ॥

बद्धाऽन्यया स्रजा काचित् तन्वी तत्र उलूखले ॥

भीता सुदृक् पिधायास्यं भेजे भीतिविडम्बनम् ॥ २३ ॥

तत्र तासु मध्ये अन्यया यशोदारूपया काचित् कृष्णरूपा तन्वी अत्यन्तसुकुमारविग्रहा मालया उलूखलरूपायां कस्यांचिद्बद्धा भीता सुष्ठुदृष्टियुक्ता, सुनयनमास्यं वा हस्तेनाच्छाद्य भीत्यनुकरणं कृतवती ॥ २३ ॥

एवमनुकरणं कृत्वा पुनरपि तथैव पृच्छमाना भगवतः पदानि ददृशुरित्याह ।

एवं कृष्णं पृच्छमाना वृन्दावनलतातरून् ॥
व्यचक्षत वनोद्देशे पदानि परमात्मनः ॥ २४ ॥

एवमिति ॥ तथाच गाढोन्मादे भगवल्लीलानुकरणोत्साहे प्रश्न इत्येवं भ्रममाणानां तासां भगवत्प्रसादेन समाहिततापाप्तौ तच्चरणदर्शनं जातमित्याशयेनाह ॥ व्यचक्षतेति ॥ परमात्मनः परमेश्वरस्य श्रीकृष्णात्मनावतीर्णस्य परमश्रेष्ठस्येति वा । कस्मिँश्चिद् वनप्रदेशे भूमौ संलग्नानि पदानि दृष्टवत्यः ॥

निवृत्तिपक्षे, चित्तैकाग्रतासिद्ध्यर्थं भगवत्कृतलीलानुकरणं वर्णयन्त्यः पुनस्तदन्वेषणप्रकारं बोधयन्त्यो, वनोद्देशे अन्तःकरणलक्षणस्य सात्त्विकप्रदेशे पदानि चिदाभासलक्षणानि चिल्लक्षणपदज्ञापकानि तत्प्रतिकृतिभूतानि व्यचक्षत तदवलोकनं निरूपयामासुरित्यर्थः ॥ २४ ॥

तानि दृष्ट्वा परस्परमाहुः ॥

पदानि व्यक्तमेतानि नन्दसूनोर्महात्मनः ॥
लक्ष्यन्ते हि ध्वजाऽम्भोजवज्राऽङ्कुशयवादिभिः ॥ २५ ॥

एतानि पदानि स्पष्टं नन्दसूनोर्महात्मनः सन्ति । परमात्मनो

नन्दसूनुत्वेनाऽवतीर्णत्वात् तत्पदानां सर्वविलक्षणत्वादिति भावः । यद्वा, नारायणसमो गुणैरित्युक्तत्वान्महात्मनः सर्वोत्कृष्टस्य । हि यतो ध्वजादिभिर्लक्ष्यन्ते ध्वजादीनां धारणास्थानाद्युक्तं स्कान्दे । दक्षिणस्य पदाऽङ्गुष्ठमूले चक्रं बिभर्त्यजः ॥ तत्र भक्तजनस्यारिषड्वर्गच्छेदनाय सः । मध्यमाऽङ्गुलिमूले च धत्ते कमलमच्युतः । ध्यातृचित्तद्विरेफाणां लोभनायातिशोभनम् । पद्मस्याधो ध्वजं धत्ते सर्वानर्थजयध्वजम् । कनिष्ठामूलतो वज्रं भक्तपापाद्रिभेदनम् । पार्ष्णिमध्येऽङ्कुशं भक्तचित्तेभ–वशकारिणम् । भोगसम्पन्मयं धत्ते यवमङ्गुष्ठपर्वणि । आदिपदात् स्वस्तिकादिसंग्रहः । तथाच श्रीकृष्णमेव प्रकृत्य पाद्मे । षोडशैव तु चिह्नानि मया दृष्टानि तत्पदे ॥ दक्षिणे चाष्ट चिह्नानि इतरे सप्त एव च । ध्वजः पद्मं तथा वज्रमङ्कुशो यव एव च । स्वस्तिकं चोर्ध्वरेखा च अष्टकोणं तथाऽष्टमम् । इन्द्रचापं त्रिकोणं च कलशश्चाऽर्द्धचन्द्रकम् । अम्बरं मत्स्यचिह्नं च गोष्पदं सप्तमं स्मृतम् । षोडशं च तथा चिह्नं शृणु देवर्षिसत्तम । जम्बूफलसमाकारं दृश्यते यत्रकुत्रचिदिति । शङ्खध्वजातपत्रैश्च चिह्नितं चरणद्वयमिति तापिन्युक्तेः । चक्राङ्कितपदानन्तेति वाराहाच्च । चक्रशङ्खाऽऽतपत्रैः सहैकोनविंशतिः । तत्र सर्वचिह्नानि श्रीकृष्णपादयोरेव । तदुक्तं पाद्मे । अङ्कान्येतानि भो विद्वन् दृश्यन्ते तु यदा तदा ॥ कृष्ण स्वयं तु परं ब्रह्म सुविज्ञातं न संशयः । द्वयं चाथ त्रयं चाथ चत्वारः पञ्च चैव च । दृश्यन्ते वैष्णवश्रेष्ठ अवतारे कथञ्चनेति ॥

निवृत्तिपक्षे नन्दसूनोः आनन्दरूपसूर्य्यस्य परमात्मन एतानि चिदाभासलक्षणानि पदानि व्यक्तम् । किं भगवच्चरणारविन्दस्थध्वजादिभिर्ध्यातैः स्वचरणसक्ति–सर्वानर्थविजय–पापवासनाध्वंस–मदनिवृत्ति–वैराग्यादिजनकैर्युक्तानि लक्ष्यन्ते । तथाच सत्त्व

गुणे उद्रिक्ते भगवच्चरणारविन्दध्यानाद्यासक्तेऽन्तःकरणे कामक्रोधादिनिवृत्त्या पुनः पुनर्भगवद्ध्यानात्मप्रत्ययनिष्ठचिदाभासैर्भगवत्स्वरूपपर्य्यन्तं संगच्छमानैस्तत्स्वरूपप्राप्तिरिति भावः ॥ २५ ॥

तैस्तैः पदैस्तत्पदवीमन्विच्छन्त्योऽग्रतोऽबलाः ॥
वध्वाः पदैः सुपृक्तानि विलोक्यार्ताः समब्रुवन् ॥ २६ ॥

भगवतः पदानीति निश्चित्य तैस्तैस्तथाभूतैरेव भुवि संलग्नैः पदैः पदवीं मार्गमन्वेषणं कुर्वत्यः स्वभावत एवाऽबला, विहारान्वेषणाभ्यां विशेषतो बलहीनाः कृताः, वध्वाः श्रीमत्या राधायाः पदैर्भुवि संलग्नैः संपृक्तानि मिलितानि विलोक्य तन्मध्ये तयेर्ष्यावत्यो मानिन्यः काश्चिदार्ता मोहिताः सत्यः समब्रुवन् प्रथममातिविह्वलत्वात्तत्पदोपरि तासां दृष्टिर्न पतिता । भगवत्पददर्शनेनेषत्समाहितानां किञ्चिद् दूरे गतानां तदुपारि दृष्टिः पतितेति ज्ञेयम् ॥

निवृत्तिपक्षे. तैस्तैर्यथोक्तैरेकाग्रतां प्राप्तैः साभासप्रत्ययैरग्रे भगवत्स्वरूपान्वेषणं प्रतिपादयन्त्योऽबलाः प्रत्यक्षादिभिर्वादानुवादपरत्वान्निर्बला, द्वा सुपर्णेत्याद्या भेदानुवादिन्यः श्रुतयो मुख्यवधूस्थानीयायास्तत्त्वमसिश्रुतेस्त्रिभिः पदैः सुपृक्तानि तदर्थविचारपरत्वेन तत्संमिश्राणि विलोक्यार्ताः सत्यः समब्रुवन् ॥ २६ ॥

यदब्रुवँस्तदाह ।

कस्याः पदानि यातायाः पश्यध्वं नन्दसूनुना ॥
अंसन्यस्तप्रकोष्ठायाः करेणोः करिणा यथा ॥ २७ ॥

कस्या इति ॥ अहो लघुत्वनिम्नत्वादिचिह्नैश्चिह्नितत्वात् स्त्रिया एतानि पदानि वर्तन्ते । तथापि कस्या अस्माकं मध्ये कस्याः । नवग्रामान्तरस्त्रियाः । यतो नन्दसूनुना सह यातायाः ।

अन्यस्याः प्रेष्ठसाहित्यं न सम्भवति । तथाच का वा निष्ठुरा प्रेष्ठमेकान्ते नीतवती सा निश्चेतव्येति भावः । तत्रापि तेन स्कन्धे न्यस्तः प्रकोष्ठभागो यस्याः सा । पदानामनुपृक्तत्वादिदं ज्ञातव्यः । तच्च तस्या रात्रौ सुखेन नयनार्थं दूरेऽबलां बलान्नयनार्थं वा, रसाभिव्यक्त्यर्थं वा तदनुरूपं दृष्टान्तमाह ॥ करिणा हस्तिना करेणोर्हस्तिन्या यथा । एतेन तस्यां तस्य प्रीत्यतिशयः, काममदाक्रान्तता तदधीनता चेति ध्वनितम् ॥

निवृत्तिपक्षे, एतानि पक्षोक्तप्रत्ययेषु प्रविष्टानि पदानि कस्याः । नन्दसूनुना परमात्मना सह यातायाः प्रतिपादकभावेन सहप्रविष्टायाः । तत्राप्यनेन परमात्मना अंसे शुद्धचेतनलक्षणे भागे न्यस्तः प्रकोष्ठस्थानीयस्तत्पादभागो यस्याः । साहित्ये दृष्टान्तः । तथाच का वा अहेतुप्रतिपादने समर्थेत्यापाततस्ताः श्रुतय उक्तवत्य इति भावः ॥ २७ ॥

तत्सुहृद्भावा आहुः ।

अनयाऽऽराधितो नूनं भगवान् हरिरीश्वरः ॥
यन्नो विहाय गोविन्दः प्रीतो यामानयद्रहः ॥ २८ ॥

अनयेति ॥ तत्राभिज्ञापक्षे, अनया तेन सार्द्धं यातया सख्या नूनं भगवान् आराधितः । यद्यप्यस्माभिरप्याराधितस्तथाप्यनया यथाराधितस्तथा नाराधितः । फलवैलक्षण्यदर्शनात् । नचास्माभिरपि तथैवाराधित इति भ्रमितव्यम् । आराधनतारतम्यस्य तेन सम्यग् ज्ञात्वैव फलप्रदानप्रवृत्तत्वात् । यतो भगवान् अत एव, हरिः, विलक्षणप्रेमवत्या मम समानं सुखं दत्तवानिति तदीयदुःखस्य हर्ता । ननु तदाराधनपराणामस्माकमन्तर्धानेन किमिति दुःखं दत्तवानितिचेत् तत्राहुः ॥ ईश्वरः =कर्तुमकर्तुमन्यथा च कर्तुं सम-

र्थः । तत्कल्पकं विलक्षणं फलमावेदयन्ति ॥ यद्यस्मान्नोऽस्मान् सर्वा विहाय प्रीतः सन् यां रह एकान्तमनयत् । गोविन्दः साधारणोऽपि सर्वेन्द्रियग्राहकस्तस्या असाधारणो जात इत्यहो तस्या उत्कर्षातिशय इति भावः ॥ अनभिज्ञापक्षे, अनया जन्मान्तरे नूनं निश्चयेन हरिर्दुःखहर्ता महाविष्णुराराधितो, न त्वस्माभिः । तत्रापि भगवत्त्वेनेश्वरत्वेन च । यतोऽत्र भाग्यातिशयः परमस्वातन्त्र्यं च तथा लब्धमित्याशयेनाहुः ॥ भगवानीश्वर इति ॥ यतः सर्वासां रक्षणेन लब्धगोविन्दनामाऽपि नो विहाय प्रीतो यां रहोऽनयत् । अनेन, राधयत्याराधयत्याराध्यते वा राधेत्यर्थात् तन्नाम सूचितम् । तथाच तादृशी राधैवाऽतस्तस्या एव पदानीति किमर्थमसूयया, कस्या इत्युक्तवतीभिरिति भावः । स्पष्टं नामाग्रहणं प्रतिपक्षाणां गोपीनां राधाया वा संकोचात् । मुनिना तु ब्रह्मवैवर्तादौ तन्नाम्नः स्पष्टमुक्तत्वात् तत एव गोपीनां मानिनीनां ज्ञातव्यानीति कस्या अपि नामानुक्त्या सूचितम् । परोक्षप्रिया हि देवा इति न्यायश्चानुसृतः । एतद्ग्रन्थस्य गम्भीरार्थकत्वं च ध्वनितम् ॥ मानिनीपक्षे, हे अनयाः परमोत्कर्षवत्या राधायाः स्पर्द्धाद्याचरणरूपान्यायवत्यः, हरिः सर्वासां सामान्यतो मनोहर्ता श्रीकृष्णो राधितः पृथक्तया राधामेवेनः प्राप्तः । शकन्ध्वादित्वात् पररूपम् । यद्वा, राधा सर्वापेक्षयाधिक्येन प्रिया संजाता अस्येति तारकादित्वादितच् । यतो भगवान् कामातुरः, श्रीमानिति वा, कीर्तिमानिति वा । भगं श्रीकाममाहात्म्यवीर्य्ययत्नार्ककीर्तिष्वित्यमरः । तत्रापीश्वरः । ग्रहणपलायनवञ्चनादौ समर्थः । यद् यस्माद् गा इन्द्रियाणि विन्दति विन्दयति वा गोविन्दस्तया परस्पररमणाभिलाषुः । श्रीराधायाः पदचिह्नान्येकोनविंशतिसंख्याकान्युक्तानि । तत्र वामचरणे यवचक्रच्छत्रवलयोर्ध्वरेखाकमलध्वज-

वल्लीपुष्पाऽङ्कुशार्द्धचन्द्रा इत्येकादश । दक्षिणचरणे शङ्खगदावेदीकुण्डलशक्तिपर्वतरथचामराणीत्यष्टौ ॥

निवृत्तिपक्षे, तत्पक्षपातिन्यः, ऐदात्म्यमिदं सर्वं, तत्सत्यं, स आत्मानं, नेह नानास्ति किञ्चनेत्याद्या आहुः ॥ अनया नूनं भगवान् जगत्पालको, हरिः संहर्ता, ईश्वर उत्पादक आराधितः प्रतिपादितः । अखण्डैकरसस्य प्रतिपादनेन तत्स्वरूपस्य भगवत्त्वादेः प्रतिपादितत्वात् । यद् यस्मात् सकलश्रुतिगम्यत्वाद् गोविन्दोऽपि प्रीतः सन् नो विहाय यां रहः अनयत् । तज्जन्यचरमवृत्तिविषयत्वमगच्छदिति भावः ॥ २८ ॥

तटस्थास्तु—अहो किमर्थं विवादो भवतीभिरारब्धः, सखीचरणोपरि दृष्टिं दत्वा भगवच्चरणाब्जरेणून् पश्यतेत्याहुः ।

धन्या अहो अमी आल्यो गोविन्दाङ्घ्र्यब्जरेणवः ॥
यान् ब्रह्मेशौ रमा देवी दधुर्मूर्ध्न्यघनुत्तये ॥ २९ ॥

धन्या इति ॥ आल्यः सख्यो गोविन्दस्य परमात्मनश्चरणकमलरेणवोऽमी उपलभ्यमाना अहो आश्चर्यं धन्या अतिपुण्याः । यान् रेणन् ब्रह्मा ईशो महादेवो रमादेवी उपादानशक्तिः, अघस्य स्वस्वाधिकारे सम्भावितस्य दोषस्य विरहदुःखस्य वा निवृत्तये मूर्ध्नि दधुः । तथाच तद्वियोगजनकदोषनिवृत्तये तद्धारणं कर्तव्यमिति भावः । स्ववचसि विश्वासार्थं सम्बोधयति ॥ हे आल्य इति ॥ अनभिज्ञापक्षे, अहो तत्स्पर्शाऽभावे रेणुतोऽपि वयं तुच्छा इति भावः । प्रेम्णोऽसतोऽपि माहात्म्यस्य स्फोरकत्वस्वाभाव्यात् प्रेमकृतैवेयं रेणुमाहात्म्यभावना । यथा भरतेन, किं वा अरे आचरितम् इत्यादिना मृगपदस्पर्शेन भुवो भाग्यं वर्णितम् ॥ मानिनीपक्षे, यथा रेणवस्तथात्माऽप्यतो नास्ति मात्सर्यकृत्यमिति भावः ॥

निवृत्तिपक्षे,सत्यं ज्ञानमनन्तं ब्रह्म, सर्वं खल्विदं ब्रह्म तज्जलानिति शान्त उपासीतेत्याद्यास्तटस्था आहुः ॥ हे सख्यः, अहो अमी गोविन्दस्यौपनिषदस्य परमात्मनः सम्बन्धिनस्तद्ध्यानास्पदस्य हृदयकमलस्य रेणवस्तत्रस्थाः शुभ्राश्चित्प्रत्यया धन्या याँस्तथाभूतान् प्रत्ययान् ब्रह्मादयो देव्या वेदशरीरायाः सरस्वत्या मूर्ध्नि मस्तके दधुः, वेदान्तार्थाखण्डाचिदेकरसपरमात्मस्वरूपानुसंधानपराः समाधिस्था बभूवुःअघस्य विक्षेपस्य निवृत्तये ॥ २९॥

पुनस्तत्प्रतिपक्षा अहो किमुच्यते भवतीभिः, समाहितमनसामियं कथा, न तु क्षुब्धचित्तानामित्याशयेनाहुः ।

तस्या अमूनि नः क्षोभं कुर्वन्त्युच्चैः पदानि यत् ॥
यैकापहृत्य गोपीनां रहो भुङ्क्तेऽच्युताऽधरम् ॥ ३० ॥

तस्या अमूनि अशक्यादर्शनानि पदानि नोऽस्माकं वियुक्तानामुच्चैः क्षोभं व्याकुलतां जनयन्ति । यतो या सर्वासां गोपीनां समानमच्युताऽधरमेकाऽपहृत्य तत्रापि रहसि स्थित्वा भुङ्क्ते । ननु बहुस्त्रीसबन्धवशादुपरतिं प्राप्तस्य भगवतः कुतोऽधराऽमृतदानाय प्रवृत्तिः समाव्यते इत्याशङ्कानिरासायाऽच्युत इत्युक्तम् । तथाचाऽप्रच्युतस्य नास्ति विरततासंभावनेति भावः । यद्वा तद्विरहदुःखादप्यस्माकं तस्यास्तत्संयोगजन्यं दुःखं महदुत्पन्नमित्यच्युतपदेन ध्वनितम् । तया न प्रच्युत इत्यर्थावगमात् ॥

निवृत्तिपक्षे, पुनस्तद्विरुद्धार्थिका आहुः ॥ यस्या उक्तश्रुतेरुच्चैः सर्वोत्कृष्टत्वेनानुसंधीयमानानि पदानि नः क्षोभं स्वार्थप्रच्युतिलक्षणं जनयन्ति यतो यैका सर्वासां श्रुतीनां प्रतिपाद्यमर्थमच्युताधरेमकरसानन्दस्वरूपं रहो भुङ्क्ते । तत्तत्प्रतिपाद्याद्वैशिष्ट्यादर्थाद्वैशिष्ट्यमात्रमपहृत्य सर्वविशेषविनिर्मुक्तं प्रतिपादयतीत्यर्थः॥ ३० ॥

अहो माऽस्तु कलहस्तत्पदानि सम्प्रति न दृश्यन्ते इति तट-स्थाभिरुक्ते सति, अहो सत्यं तत्पदान्यत्रास्मिन् प्रदेशे न लक्ष्यन्ते इति तद्वाक्ये सर्वाभिरङ्गीकृते तदन्तरङ्गाः काश्चित् सुहृद आहुः ॥

न लक्ष्यन्ते पदान्यत्र तस्या नूनं तृणाङ्कुरैः ॥
खिद्यत्सुजाताङ्घ्रितलामुन्निन्ये प्रेयसीं प्रियः ॥ ३१ ॥

नेति ॥ अहो सा प्रेयसा विश्लिष्टेति न भ्रमितव्यं, किन्तु तामुन्निन्ये बाहुभ्यामुत्थाप्य स कटिभागे गृहीतवानतस्तस्याः प-दान्यत्र न लक्ष्यन्ते इत्येवं निश्चयेन ज्ञातव्यम् । उन्नयननिमित्त-माहुः ॥ तृणाङ्कुरैः खिद्यती सुजाते अङ्घ्रितले यस्यास्ताम् । नन्वेवं तर्हि स्कन्धमारोपितवानिति कुतो न कल्प्यत इतिचेत् त-त्राहुः ॥ प्रेयसीम् ॥ रसाविर्भावकरं खेदाजनकं कटिभागारोप-णमेव तादृश्याः समुचितमिति भावः । ननु खिन्नपादा तत्रैव कुतो न स्थितेत्याशङ्क्याहुः ॥ प्रियः ॥ यतस्तस्या अपि अविश्लेषो यथा तथा परिरम्भणीयोऽभीष्ट इति भावः ॥

निवृत्तिपक्षे, अहं ब्रह्मास्मीत्याद्यास्तदेकार्थप्रतिपादिका आ-हुः ॥ तस्याः पदानि अत्राखण्डैकरसे परमात्मनि न लक्ष्यन्ते श-क्तिवृत्त्या प्रवृत्तानि नोपलभ्यन्तेऽतो नूनं तृणाऽङ्कुरस्थानीयै-र्वाच्यांऽशैः खिद्यती सुजाते एकाऽर्थनिष्ठत्वात् समानाधिकरण-भूते अङ्घ्रितले कोमलपदे यस्यास्तामुन्निन्ये । उद् ऊर्ध्वं शक्ति-वृत्तेः प्रच्याव्य भागत्यागलक्षणया सर्वोत्तमं स्वरूपमानन्दैकरसमा-शोधितवान् । यतः प्रेयसीं प्रियः, संसर्गासङ्गिसम्यग्ज्ञानहेतुत्वात् प्रेयसीं, स्वयं च तदेकपरायास्तस्याः प्रिय इति भावः ॥ ३१ ॥

एतच्छ्रुत्वा अधिकमग्नानि प्रेष्ठपदानि च दृष्ट्वाऽतिक्षुब्धस्वा-न्तास्तटस्थाभिमुख्यः प्रतिपक्षा आहुः ।

इमान्यधिकमग्नानि पदानि वहतो वधूम् ॥
गोप्यः पश्यत कृष्णस्य भाराक्रान्तस्य कामिनः ॥ ३२ ॥

इमानीति ॥ अहो सत्यमुक्तमेताभिर्यतो वधूं कामिनो न तु प्रेमिणः, प्रेमवतीनामस्माकं त्यागात्, कृष्णस्येमानि उपलभ्यमानानि पदानि भाराक्रान्तानि यतोऽधिकमग्नानि पश्यत स्थित्वा विचारयत यतो भवत्यो विचारचतुरा इति गोप्य इति सम्बोधनाऽऽशयः । कामिन इत्यादिपदैरसूया व्यज्यते । तथाच स्थूलदेहाया वध्वाः सुकुमारशरीरेणोद्वहनं भारेण पीडाकरमत्यन्तकामिचेष्टितम् । पददर्शनादप्यधिकखेदकमिति भावः ॥

निवृत्तिपक्षे, सर्वकाम इत्यादिश्रुतय आहुः ॥ हे गोप्यः, पालनशक्तिमत्परमात्मस्वरूपप्रतिपादनपरा यथोक्तश्रुतिलक्षणां वधूं वहतो यथोक्तरीत्या प्रतिपादकत्वेन धारयत इमानि कृष्णस्य सदानन्दविग्रहस्य सिसृक्षादिकामनाविशिष्टस्य पदानि ध्यानयोग्याऽधिकार्यन्तःकरणप्रत्ययलक्षणानि । अव्यक्ता हि गतिर्दुःखं देहवद्भिरवाप्यत * इत्युक्तत्वाद् भाराक्रान्तानि यथोक्तश्रुत्यर्थवदनाऽसमर्थानि पश्यत ॥ ३२ ॥

अहो एतावतैव क्षुब्धस्वान्ताः सम्पन्नाः !! प्रेयसा तु प्रेयस्यर्थेऽन्यदपि यत् कृतं तत् पश्यतेति तत्सुहृद आहुः ।

अत्रावरोपिता कान्ता पुष्पहेतोर्महात्मना ॥
अत्र प्रसूनावचयः प्रियार्थे प्रेयसा कृतः ॥
प्रपदाक्रमणे एते पश्यताऽसकले पदे ॥ ३३ ॥

अत्रेति ॥ सार्द्धेन । अत्र पुष्पहेतोर्महात्मना चतुराशिरोमणिना

कान्ता अवरोपिता । महे केशप्रसाधनोत्सवे आत्मा मनो यस्य इति वा ॥ अत्र तु प्रसूनानां पुष्पाणामवचयः प्रियाया अर्थे प्रेयसा कृतः । पुष्पहेतोः प्रियार्थे इत्यनेन तत्प्रियार्थमेवावरोपणं, न तु भारजनितश्रमनिवृत्त्यर्थमिति सूचितम् । नन्विदं कुतो ज्ञातमित्याशङ्क्याहुः ॥ प्रपदाभ्यां पादाग्राभ्याम् आक्रमणं भुवो यत्र ते असकले पदे पश्यत सम्पूर्णयोस्तयोर्भुवि चिह्नानवलोकनात् प्रतिपक्षाभिप्रायं पदे इति द्वित्वम् । तेन, पदान्यत्र महात्मन इति विष्णुपुराणोक्तबहुत्वेन पूर्वोक्तबहुत्वेन च न विरोधः ॥

निवृत्तिपक्षे, नान्योऽतोऽस्ति द्रष्टा, नान्योऽस्ति श्रोतेत्याद्यास्तत्पक्षपातिन्य आहुः सार्द्धेन । अत्रैषु ध्येयाकारतायोग्यप्रत्ययेषु महात्मना यथोक्तकान्ता, अवरोपिता स्वार्थबोधकत्वाद्रहिता । कुत इत्यत आहुः । पुष्पस्य तदर्थाकारवृत्तिलक्षणफलहेतुभूतचित्तैकाग्र्यलक्षणस्य हेतोः, एषु प्रत्ययेषु प्रियाया अर्थस्याविर्भावार्थमैकाग्र्यलक्षणपुष्पसञ्चयः प्रेयसा सम्पादितः । यतः पदाभ्यां पदयोर्वा वाच्यार्थाभ्यामाक्रमणं ययोस्ते, असकले जीवत्वोपासकत्वेश्वरत्वोपास्यत्वाक्रान्ते पदे चैतन्ये पश्यत ॥ ३३ ॥

केशप्रसाधनं त्वत्र कामिन्याः कामिना कृतम् ॥
तानि चूडयता कान्तामुपविष्टमिह ध्रुवम् ॥ ३४ ॥

इदं श्रुत्वा सम्यक् तद्भूमिभागमवलोक्य कृष्णजान्वन्तरुपविष्टायास्तस्याश्चिह्नमालक्ष्य विपक्षा आहुः ॥ केशेत्यर्द्धेन ॥ अहोऽत्ययुक्तम् । यतोऽत्र कामिन्या, न तु प्रेमवत्याः । स्वप्रसवीर्वञ्चयित्वा एकां गृहीत्वा गतत्वात् कामिना, न तु प्रेमिणा प्रेमवतीनामस्माकं विरहपीडाननुसंधानात् । केशानां प्रसाधनं वेण्याकारेणाऽऽपीडाकारेण वा देवदन्तकङ्कतिकया नखैर्वा कृतम् । तुशब्दो

त्रिपक्षानिरासार्थः । न त्वत्र ज्ञानार्थमुपवेशनं संभवति । द्वयोरपि कामाक्रान्तत्वादिति सूचयितुं, कामिन्या इत्यादि ॥ अहो सत्यमिति तत्सुहृद आहुः ॥ तानीत्यर्द्धेन ॥ कान्तामधिकृत्य तानि पुष्पाणि चूडाकारेण बध्नता ध्रुवमुपाविष्टम् । यद्वा चूडायां पुष्पप्रवेशनमुत्थितेनाऽपि भवति, अतस्तानि क्रमेण चूडायां निवेशयता कान्तासमीपे विष्टमुत्थितमपि ध्रुवम् । अतस्तत्सादृश्यं दुर्लभमतः किमर्थं स्पर्द्धया खिन्ना भवतेति भावः ॥

निवृत्तिपक्षे, अतः परं पराजितास्तत्पक्षमनुमोदयन्ति ॥ केशप्रसाधनमिति॥कामिन्यास्तत्प्रतिपादनकामनावत्यास्तत्पदप्रतिपाद्यस्य केशस्य ब्रह्माद्यधीशस्य प्रसाधनमत्र ध्येयाकारप्रत्ययेषु कामिना त्वाऽनुगृहीतमोक्षाऽभिलाषुप्रभुणा कृतम् । तत्त्वमसिश्रुतिलक्षणां कान्तामधिकृत्य तानि तत्त्वमसीति पदानि चूडयता चूडास्थानीयैकव्यक्तिपरत्वं नयताऽधिकारिणा सहोपविष्टमभिन्नतया स्थितमित्यर्थः ॥ ३४ ॥

एवं गोपीमुखेनैव राधया सह भगवल्लीलामुपवर्ण्य स्वयमाह शुकः

रेमे तया चात्मरत आत्मारामोऽप्यखण्डितः ॥
कामिनां दर्शयन् दैन्यं स्त्रीणां चैव दुरात्मताम् ॥ ३५ ॥

रेम इति ॥ आत्मनि स्वरूप एव रतो, न तु स्त्र्यादौ । अत एवाऽखण्डितः स्वस्वरूपादप्रच्युतस्तथाभूतोऽपि भगवाँस्तत्प्रेमवशीकृतस्तया राधया यथा ताभिस्तर्कितं तथा रेमे चेत्यर्थः । यद्वा अखण्डितः । अस्याः सकाशादविच्युतः सन् । यद्वा अप्यर्थे चः । आत्मरतोऽपि आत्मारामोऽपि अखण्डितोऽपि स्त्रीविभ्रमैरनाकृष्टोऽपि तया रेमे । ननु तथाभूतः किमर्थं रेम इत्याशङ्क्य लोकोपदेशार्थमेवं विडम्बनं चकारेत्याह ॥ कामिनामिति ॥ का-

मिनस्त्वेवमेवातिदीना भवन्ति दैन्येन चैवमेव निरोधं प्राप्नुवन्तीत्युपदिशँस्तेषामनुकरणं कृतवानिति । तथा स्त्रीणां दुरात्मतां दौष्ट्यं दर्शयन् । वशीकृतपुरुषे दौष्ट्यमेव कुर्वन्तीत्युपदिशन्नेवं कृतवानित्यर्थः । तथाच कामवशैः स्त्रीवशैश्च न भाव्यमिति लोकान् शिक्षयामासेति भावः । यद्वा ईदृशप्रेमविहीनाः कामिनः कामिन्यश्च स्वक्रीडयापरास्तर्शिता इत्याह ॥ कामिनां देहेन्द्रियतर्पणेच्छारूपकामस्वभावानां दैन्यं दुर्गतत्वं स्त्रीणामपि तादृशीनां तदन्यासां दुरात्मतां दुर्गतनायकवशीकारेण गर्वादिदुष्टस्वभावतां दर्शयन्नित्यर्थः । यद्वा, कामिभिः सुरतप्रार्थनादिपरैर्दीनैर्भवितव्यं, स्त्रीभिस्तत्राऽसंमतिपराभिर्दुरात्मभिर्भवितव्यमिति रसिकान् बोधयन्नित्यर्थः ॥

निवृत्तिपक्षे, सर्वश्रुतिविरोधनिवृत्त्या तया रेमे तत्प्रतिपाद्योऽखण्डितः, अखडैऽकरसः सर्वकामविनिर्मुक्तः, अत एवात्मारामश्च । चकाराभ्यां, सत्यज्ञानानन्तानन्दस्वरूपः । आधिकार्यन्तःकरणवृत्त्यारूढो जात इत्यर्थः । न चाऽस्ति, द्वा सुपर्णा सयुजा सखाया समाने वृक्षे परिषस्वजाते तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्न्योऽभिचाकशीतीतिश्रुतिविरोधः । तत्प्रकरणपर्यालोचनयास्य मन्त्रस्याभेदपरत्वावगमात् । तथाहि । ब्रह्मैवेदममृतं पुरस्तादिति वाक्ये ब्रह्मणः सर्वात्मत्वे निर्दिष्टे, ननु ब्रह्मणो भोक्त्रभेदाद् भोक्तृत्वमपि स्यादतो न युक्तं सर्वात्मत्वमित्याशङ्कानिरासायाऽयं मन्त्रः पठ्यते । यौ द्वौ बिम्बप्रतिबिम्बभूतौ जीवेश्वरावस्मिञ्छरीरे वर्त्तेते तयोर्मध्ये यो बुद्धिप्रतिबिम्बभूतस्तदभेदाध्यासात् तद्धर्माभिमानी कर्मफलं भुङ्क्ते स एवान्यः बुद्धितादात्म्यरहितः सन् स्वरूपभूतचैतन्यात्मना भोगरहितः प्रकाशते । औदासीन्यबोधाभ्यां चैतन्यमात्रमुच्यते । तथाच भोगानुवादो भोगनिषेधशेष इति । न च समाने वृक्षे पुरुषो निमग्नः अनीशया शोचति मुह्यमानः, जुष्टं यदा

पश्यत्यन्यमीशमस्य महिमानमिति वीतशोक इत्युत्तरश्रुतिविरोधः । अस्याः पूर्वोक्तानशनस्य स्वाभाविकत्वबोधनार्थकत्वात् । तथाहि । जीवेश्वरपुरुषाश्रये शरीरं पुरुषो बुद्ध्युपहितो निमग्नः कर्तृत्वाभिमानी, अत एव, मुह्यमानः तत्कारणमोहावृतोऽनीशया स्वस्यानन्दरूपेश्वरभावाप्रतीत्या शोचति विषयागमापायनिमित्तं दुःखमनुभवति । जुष्टं कार्यकारणसंघातैः सेवितम् अविवेकिभिस्तदात्मतया गृहीतं यदाऽधिकारी, अन्यं विवेकात् शरीरत्रयात् पृथग् भूतं तत्साक्षितयावगतशोधितत्वम्पदार्थमीशं सन्तं पश्यति तदास्यात्मत्वेनं अवगतस्य महिमानमपरिच्छिन्ननन्दात्मताम् इति एति नान्तरीयकतया वीतशोकः सर्वानर्थविनिर्मुक्तः । यद्वा, जुष्टं विवेकवैराग्यादिभिः प्रक्षालिताशयमलैः सनकादिभिर्नैरन्तर्येणात्मत्वेन सेव्यमानम्, अन्यं कार्यकरणसंघाताद्विलक्षणमीशं यदा पश्यतीति । नाऽपि, पृथगात्मानं प्रेरितारं च मत्वा जुष्टं ततस्तेनामृतत्वमेतीति विरोधः। न ह्यात्मानं प्रेरितारं च पृथङ्मत्वाऽमृतत्वमेतीति श्रुत्यर्थः । पामराणामपि तादृशमननसत्त्वेनाऽमृतत्वप्राप्तिप्रसङ्गात् । किन्तु शरीराद्यभेदेन गृहीतमात्मानं पृथङ्मत्वा पृथक्कृतमात्मानं प्रेरितारं च मत्वा ईश्वरत्वेन च निश्चित्य अमृतत्वमेतीति । तस्मान्नास्ति कयाचिदपि श्रुत्या तस्याः श्रुतेर्विरोधः । तत्र को मोहः कः शोक एकत्वमनुपश्यतः, यन्मदन्यन्नास्ति कस्मान्नु बिभेमि तदिदमप्येतर्हि य एवं वेदाऽहं ब्रह्मास्मीति, स इदं सर्वं भवति, उदरमन्तरं कुरुते अथ तस्य भयं भवति, मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यति, नात्र काचन भिदास्यत्र भिदामिव मन्यमानः शतधा सहस्रधा भिन्नो मृत्योः स मृत्युमाप्नोतीत्याद्याः श्रुतयो भेदमपाकुर्वन्त्यस्तस्य।भेदश्रुत्यैव मुख्यं रमणमावेदयन्तीति संक्षेपः। विपक्षे दोषं दर्शयन् रेमे इत्याह ॥ कामिनां पुरुषाणां श्रुत्यर्थविचारा-

ऽधिकृतानां दैन्यमनीशत्वाभिमानेनानर्थजालप्राप्तिं दर्शयँस्तथाविधानां स्त्रीणां चैव दुरात्मतां दुष्टात्मरूपतां संसारानर्थास्पदजीवात्मतां दर्शयन् । यथोक्तश्रुत्यर्थविचारविधुरस्य पुरुषादेरनर्थनिवृत्त्यभावं बोधयन्तीत्यर्थः । तथाच श्रुतिः—

यदा चर्मवदाकाशं वेष्टयिष्यन्ति मानवाः ।
तदा देवमविज्ञाय दुःखस्यान्तो भविष्यतीति ॥ ॥ ३५ ॥

इत्येवं दर्शयन्त्यस्ताश्चेरुर्गोप्यो विचेतसः ॥
यां गोपीमनयत् कृष्णो विहायान्याः स्त्रियो वने ॥ ३६ ॥
सा च मेने तदात्मानं वरिष्ठं सर्वयोषिताम् ॥
हित्वा गोपीः कामयाना मामसौ भजते प्रियः ॥ ३७ ॥

अथेतरगोपीकृतं तल्लीलावर्णनमुपसंहरति इत्येवं भगवल्लीलाः परस्परं प्रदर्शयन्त्यश्चेरुः । यतो, गोप्यः ॥ गोपरूपेणावतीर्णस्य भगवतः सम्बन्धिन्यः । वस्तुस्वभावादेव गोपालजे तस्मिन् प्रेमवत्यो, न तु शास्त्रेण भगवदीया जाताः । विचरन्त्यश्च विचेतसो जाताः प्रकारत्रयस्यापि समाप्तत्वादित्थंव्याकुलमानसा बभूवुरित्यर्थः ॥

अथ वृषभानुनन्दिन्या विप्रलम्भांशं वर्णयितुं पीठिकां रचयति ॥ कृष्णः सदानन्दरूपस्तस्यामानन्दमाविर्भावयितुं यां गोपीमनयत् । अन्याः स्त्रियो वने विहाय । अन्यासु स्त्रीत्वं प्रगल्भतामालोक्य तासां त्यागः । तस्या गोपीत्वं मुग्धात्वमालक्ष्य नयनमिति द्योतयितुं स्त्रियो, गोपीमित्युक्तम् ॥

निवृत्तिपक्षे, इत्येवम् अविचेतसः समाहितचित्तस्य पुरुषस्य ब्रह्मस्वरूपं दर्शयन्त्यस्तस्यान्तःकरणवृत्तिषु विचेरुः । अन्याः श्रुतिलक्षणाः स्त्रियो वने अन्तःकरणे यां गोपीं कृष्णः सदा-

ऽऽनन्दस्वरूपः परमात्मा अनयत् मम कृपावबोधिकेयमित्यवभासयत् ॥ ३६ ॥

तस्यास्त्यागे निमित्तमाह ॥ सा चेति ॥ चकारात् पूर्वं सर्वासां स्मयो जात इदानीं तस्यामिति गम्यते । सर्वाभ्य उत्कृष्टमात्मानं मन्यमानायाः साधारणं रमणं स्मयकरं नासीदधुना त्वऽसाधारणं, तस्मात् सापि गर्वं प्राप्ता । अनेन समुदायदोषेण भगवान्न त्यजति, किन्तु प्रत्येकदोषेणेत्यपि ध्वनितम् । साऽपि सर्वासां योषितां मध्ये आत्मानं परमोत्कृष्टं मेने । तन्निमित्तं तच्चेतसि स्फुरितमाह ॥ कामयाना: ॥ कामयमानाः, कामो यानमागमनसाधनं यामामिति वा । गोपीः स्वभोग्या अपि हित्वा सर्वासामपि साधारण्येन प्रियः, असौ सर्वोत्तमो मामेकां भजते मन्मनोऽनुकूलमाचरति इति विचार्य्येत्यर्थः ॥

निवृत्तिपक्षे सापि श्रुतिरात्मानं सर्वश्रुतीनां मध्ये श्रेष्ठं मेने यतः सर्वा अपि गोपीः स्वसम्बन्धिनीः स्वप्रतिपादनकामनावतीर्हित्वा असौ प्रत्यगभिन्नः परमात्मा प्रिय आनन्दघनो मां भजते मत्प्रतिपाद्यतां प्राप्तः । महावाक्यश्रुतिबोध्यः परमात्मेत्यधिकारिचेतासि स्फुरितमिति भावः ॥ ३७ ॥

ततो गत्वा वनोद्देशं दृप्ता केशवमब्रवीत् ॥
न पारयेऽहं चलितुं नय मां यत्र ते मनः ॥ ३८ ॥

तत इत्येवं मनसि स्फूर्त्यनन्तरं तेनैव सार्द्धं कस्मिँश्चित् प्रदेशे प्रियेण सहैव गत्वा अखर्वगर्वाक्रान्तस्वान्ता सा, केशवं स्वस्याः केशान् वयते ग्रथ्नाति तम् । तथाच स्वाधीनकान्तायास्तस्या रसात्महो दर्पो जात इति भावः । रमणबहुवनभ्रमणादिना जातश्रमाऽहमतः परं चलितुं न पारये न शक्ता भवामि । ननु

भो मुग्धे ताभ्यो दूरमग्रेऽतिमनोज्ञस्थानं वर्तते तत्पर्यन्तं यथाकथञ्चिच्चलनीयमितिचेत् तत्राह ॥ नयेति ॥ एवं तर्हि पूर्ववन्मामङ्के निधाय त्वमेव नय प्रापय, अहं तु पदमात्रमपि गन्तुं न शक्तेत्यर्थः । ननु किं पौष्पाभरणपुष्पतल्पशयनाद्यर्थं पुष्पोद्यानं नयामि, किं वा यमुनापुलिनं तत्र विहाराद्यर्थमित्यपेक्षायामाह ॥ यत्र ते मनः अनेनाऽऽलस्यमनुमोदनं च सूचितम् । यद्वा स्वप्रेमरज्जौ प्राप्तबन्धनं कान्तं निश्चित्य प्राप्तगर्वा केशवं ब्रह्मादिसमस्तस्वामिनं देहादिसम्बन्धातीतं प्रत्यब्रवीत् ॥

निवृत्तिपक्षे, ततोऽन्तःकरणलक्षणस्य वनस्य उद्देशे श्रेष्ठप्रदेशे शोभनप्रत्यये गत्वा अहमेव प्रत्यगभिन्नब्रह्मावभासिकेति गर्ववती ब्रह्माद्यधिष्ठानभूतं परमात्मानमब्रवीत् । अहं चालितुं स्वार्थाच्च्यावयितुं केनापि प्रमाणेन, वादिना वा न शक्या । अतस्त्वत्संबन्धाऽधिकारिमनो यत्राऽखण्डैकरसे त्वयि वर्तते तत्रैव मां नय तत्प्रतिपादकत्वेनैव मां स्थापय । तथा च यथोक्तश्रुतिवेद्यत्वं ब्रह्मणोऽस्तीति विवेकिचेतसि स्फुरितमिति भावः ॥ ३८ ॥

तच्छ्रुत्वा भगवतैवं विचारितम् । अनया मां स्वाधीनमवगत्य अपालस्यादिमयं नर्मवाक्यमुक्तमतो नर्मवाक्यमुक्त्वान्तर्धानं कार्यम् । तच्चावश्यकम् । यत एनेनैतच्छृङ्गाररसपोषणं, महाप्रेमवत्या अस्या मद्वियोगजनितदशाया अवलोकनं मत्संश्लेषजनितसौभाग्यमवलोकयाऽतिविस्मितस्वान्तानां तासां परमचमत्कारमिन्धुनिमज्जनकराया असाधारण्या अस्या मद्विरहावस्थाया दर्शनपूर्वकं सर्वाभिरभिरमणाऽनुकूलस्यैकमत्यस्य सम्पादनं च सेत्स्यतीति तदेतदभिप्रेत्याह ॥

एवमुक्तः प्रियामाह स्कन्ध आरुह्यतामिति ॥

ततश्चान्तर्दधे कृष्णः सा वधूरन्वतप्यत ॥ ३९ ॥

एवमिति ॥ एवमुक्तः श्रीकृष्णो मम स्कन्ध आरुह्यतामिति प्रियामाह । यद्वा, स्कन्धः प्रकाण्डे काये चेति कोशात् स्कन्धः कायः । स च योग्यत्वादङ्करूपः । साऽपि तत्कृतं नर्माऽबुद्ध्वा तत्स्कन्धमारोढुं प्रवृत्ता । ततस्तत्प्रवृत्त्यनन्तरमेवाऽन्तर्दधे । यतः कृष्णः सदानन्दस्वरूपोऽन्तर्दधे, अतः सा तद्दर्शनैकजीवना वधूः परमप्रिया विश्लेषासहा अन्वतप्यत परमं पश्चात्तापमगच्छत् । तेन च बहुधा विललाप ॥

निवृत्तिपक्षे, एवमुक्तः परमात्मा स्कन्धं तत्स्थानीयमेकदेशं विशेष्यं चैतन्यमात्रमारुह्यतां प्रतिपाद्यतामित्येवंविधामाह । भागलक्षणया चैतन्यमात्रैकत्वं यथोक्तश्रुतेरधिकारिणावगतमित्यर्थः । ततो यथोक्तश्रुत्या ब्रह्मणः स्वैक्यत्वावगत्यनन्तरं कृष्णः अपरिच्छिन्नसदानन्दस्वरूपः परमात्मा अन्तर्दधे परिच्छिन्नताप्राप्त्याऽविज्ञाततां गतः । यदि मन्यसे सुवेदेति, दहरमेव नूनं त्वं वेत्थ, अविज्ञातं विजानतामित्यादिश्रुतेः । सा वधूः तल्लक्षणा श्रुतिरन्वतप्यत पुनः पुनरनधिकारिणा विचारिता, अहो अस्य ब्रह्मणः श्रुतिवेद्यता कथमिति ॥ ३९ ॥

तत्कृतविलापमाह ।

हा नाथ रमण प्रेष्ठ क्वासि क्वासि महाभुज ॥
दास्यास्ते कृपणाया मे सखे दर्शय सन्निधिम् ॥ ४० ॥

हेति ॥ आर्तिसंबोधनमिदं सर्वत्र योज्यम् । हा नाथ स्वामिन् पालक, हा रमण प्रियोचित सुखप्रद, हा प्रेष्ठ प्रेमविस्तारक । तथाच तादृशस्य तव मद्वियुक्ततयाऽवस्थानं नोचितमित्याशयेनाह ॥ क्वासीति ॥ आलिङ्गनं स्मृत्वाह ॥ महाभुज ॥ दैन्येनाह ॥ ते

दास्याः ॥ सख्यादौ अयोग्यायास्तत्रापि कृपणाया एवंविधदुःखं सोढुमशक्तायाः परिहर्तुं वाऽजानन्त्या मम, सन्निधिं दर्शय सन्निहितोऽस्मीति ज्ञापय । यतस्त्वं सखा, मुख्यसख्या अपराधाः क्षन्तव्या एवेति भावः । यद्वा, हा हेति पश्चात्तापे । अयुक्तं जातमित्यर्थः । यद्यपि मया अयुक्तं कृतं, तथापि त्वया नाहं त्याज्या, किन्तु दोष एवोपेक्षणीयो, यतस्त्वमेव मम स्वामीत्याशयेनाह ॥ हे नाथ ॥ ननु संकटप्राप्तौ साहाय्यं करिष्यामीतिचेत् तत्राह ॥ हे रमण । तथाच रमणस्य भोक्तुस्तव भोग्याया मे त्वत्तो दूरेऽवस्थानं परमसंकटरूपं, तस्मात् त्राणं कर्तुं योग्योऽसीति भावः । ननु भोग्येच्छया भोक्ता न प्रवर्तते, किन्तु स्वेच्छया । तथाच ममेच्छाभावात् कथं रमणे प्रवृत्तिरित्याशङ्क्याह ॥ हे प्रेष्ठ ॥ यद्यप्येवं, तथापि मम प्रीतिविषयस्याभावात्त्वद्विरहे मरणमेव सम्भव्यतेऽतोऽनुग्रहबुद्ध्या तथा कुर्वित्यभिप्रायः । अतस्तथाभूतस्त्वं क्वापि गन्तुमयोग्योऽत्रैव स्याः । अहं व्याकुलत्वाज्जानामि ततः पृच्छामि क्वासीति ॥ झटिति कथय, नोचेद् गच्छन्ति मम प्राणा इत्याशयेन पुनराह क्वासीति ॥ इत्युक्त्वा भूमौ निपतिता मूर्च्छाभिमुखा उत्थानार्थं संबोधयति ॥ हे महाभुजेति ॥ यतस्तवैवाहं दासी, तत्रापि सम्प्रति कृपणा तस्या मम सन्निधिं दर्शय ॥ हे सखे ॥ सख्युस्तवेदमुचितमिति भावः । यद्वा, हे नाथ, त्वदेकप्राणायास्त्वदधीनाया इमे प्राणाः सम्प्रति गन्तुकामा मया रक्षितुमशक्या, अतस्तानागत्याशु संरक्षेत्याशयः। तद्गमने तवात्यन्तं दुःखं भविष्यति । सर्वापेक्षयोत्कृष्टत्वेन संमतायां मयि मृतायामन्यत्र रतिमलभमानस्य पश्चात्तापेन रोदनावश्यम्भावादित्याशयेनाह ॥ हे रमणेति ॥ नन्वस्तु मम दुःखं, तव तेन किमितिचेत् तत्राह ॥ प्रेष्ठेति ॥ प्रेष्ठस्य तव दुःखं कोटिगुणितं सन्मय्येव फलिष्यतीति भावः

ननु सर्वथा निर्गन्तुं प्रवृत्ताः प्राणा मयापि कथं संरक्ष्या इतिचेत् तत्राह ॥ हे महाभुज, क्वासि क्वासि । झटित्यागत्य स्वभुजमृतसञ्जीवनौषधेन सुकरस्तद्रक्षणं सम्पादयेति भावः । नन्वेवं तर्हि, न पारयेऽहं चलितुमित्येवं किमर्थमुक्तवत्यसि, ततः सापराधां त्वां न स्पृशामीति चेत् तत्राह ॥ दास्यास्ते ॥ यद्यपि तदानीं प्राप्तगर्वयाऽऽलस्यादिवशात् तथोक्तं, सम्प्रति तु तन्निवृत्त्या दासीभावं प्राप्तास्मि, तत्रापि कृपणा परमदीना जातास्मि । ततः क्षमैवोचिता । इतः परं मरणस्यैवावशेषादपराऽधनिमित्तस्य दोषस्य निवृत्तत्वान्न कोप इति भावः । किञ्च वस्तुतो नास्ति ममापराधस्त्वयैव दास्ययोग्याया मम सख्यं कृतं, तदनुरूपं च मयाऽनुष्ठितमित्याशयेनाह ॥ हे सख इति ॥ ननु नास्ति मम कोप इतिचेत् तर्हि सन्निधिं दर्शय । प्रसन्नः सन् मत्समीपे आगतोऽसिचेत् तर्हि विरहव्याकुलस्वान्तायाः पश्चात्तापदुःखेनान्धीकृतनेत्राया मम सन्निधिं स्पर्शादिना दर्शय, पश्चाद् अवहिता सती द्रक्ष्यामीति भावः । एवं विलपन्ती भगवत्स्पर्शादिकमलब्धवती ततः परं विलापेऽप्यक्षमा मूर्च्छिता सती भूमावपतदित्यपि ज्ञेयम् । मोहितां ददृशुरिति वक्ष्यमाणानुसारात् ॥

निवृत्तिपक्षे, अथ ब्रह्मणः साक्षात्स्ववेद्यत्वाभिमानं विहाय स्वजन्यवृत्त्यावरणनिवृत्त्या सन्निधिं प्रार्थयते ॥ हा नाथेति ॥ हेति स्वजन्यवृत्तिरहितानाक्रोशति ॥ हे नाथ, सर्वेश्वर, हे रमण, जगत्सृष्टिस्थितिभङ्गलक्षणक्रीडापरायण—तत्पदार्थ, हे प्रेष्ठ वरप्रेमास्पद महाभुजाऽसंख्यातभुजाऽऽदिमहेश्वर—त्वम्पदार्थ, असि असीत्येवं नवकृत्वस्तत्त्वोपदेशपराया अधिकारिभिर्मदर्थाग्रहे कृपणाया दीनतां प्राप्ताया मम क्वचित् क्वचित् सखे निरुद्धैरिन्द्रियैः सह रममाणे शुद्धेऽन्तःकरणे, सन्निधिम् आवरणनाशकवृत्त्युत्थानेन मत्प्रतिपाद्यतां

प्रकटयेत्यर्थः ॥ ४० ॥

अथ ता अपि तत्राशु समागता इत्याह ।

अन्विच्छन्त्यो भगवतो मार्गं गोप्योऽविदूरतः ॥
ददृशुः प्रियविश्लेषमोहितां दुःखितां सखीम् ॥ ४१ ॥

भगवतो मार्गं मृगयमाणा गोप्यः, अविदूरतः समीप एव तां दुःखितां प्रियविश्लेषजन्येन तापेन मूर्च्छितां समानदुःखाक्रान्तत्वात् सखीं तथाभूतां दृष्ट्वा विगतेर्ष्यास्तां वस्त्रवातादिना सचेतनां कृतवत्य इत्यपि द्रष्टव्यम् ॥

निवृत्तिपक्षे, भगवतो मार्गं विदूरतोऽन्विच्छन्त्यो गोप्यः परमात्मसंबन्धिन्यः श्रुतयो दुःखिता आसन् । अहोऽस्माकं साक्षात्परमात्मप्रतिपादिका नास्तीति । यदा मुख्यामपि सखीं समानविषयत्वात् प्रियेण चिदात्मना योऽयं विशेषेण श्लेषो वाच्यवाचकत्वलक्षणसंबन्धस्तत्र मोहितामत एव दुःखितां ददृशुस्तदा यत्किञ्चित् स्वास्थ्यं प्राप्ता इत्यर्थः ॥ ४१ ॥

तया कथितमाकर्ण्य मानप्राप्तिं च माधवात् ॥
अवमानं च दौरात्म्याद् विस्मयं परमं ययुः ॥ ४२ ॥

अयि सखि किं वृत्तमिति ताभिः पृष्टया तया हे सख्यो मुग्धाऽहं तेन नीतेत्यादिनिश्चयपर्यन्तं कथितं वृत्तमाकर्ण्य तत्र माधवाल्लक्ष्मीपतेः कान्तिपतेः सुन्दराद्वा मानप्राप्तिं चाकर्ण्य दौरात्म्यात् स्वदौर्जन्यादवमानं त्यागलक्षणं चाकर्ण्य परमं विस्मयं ययुः । अहो महान्तमियं मानं लब्धवती, स चैवंविधं मानं दत्वा कथमवमानं कृतवानाश्चर्यमिदमित्येवं परमं विस्मयं प्राप्तवत्यः ॥

निवृत्तिपक्षे, तया यथाश्रुत—तत्त्वम्पदार्थयोरभिन्नत्वं कथित-

माकर्ण्य माधवात् स्वजन्यब्रह्मविद्यापतेर्मानस्य प्रामाण्यस्य प्राप्तिं चाकर्ण्य, दूरे आत्मा शुद्धचिदानन्दघनो निर्विशेषो यस्याः सा दूरात्मा तद्भावो दौरात्म्यं, तस्माद्रागविषयप्रतिपादकत्वादवमानं तद्विषयकप्रमानुत्पादकत्वं चाकर्ण्याहो लब्धप्रामाण्याया अस्याः कथमप्रामाण्यमिति परमविस्मयं ययुरित्यर्थः ॥ ४२ ॥

ततस्तां हस्ते धृत्वोत्थाप्य तया सहिता अन्वेषणे प्रवृत्ता इत्याह ।

ततोऽविशन् वनं चन्द्रज्योत्स्ना यावद्विभाव्यते ॥
तमः प्रविष्टमालक्ष्य ततो निववृतुर्हरेः ॥ ४३ ॥

तत इति ॥ ततो विस्मयप्राप्त्यनन्तरं पदचिह्नानां वने प्रवेशमालक्ष्य वनमविशन् तत्र यावत्पर्यन्तं वृक्षाणां विरलत्वाच्चन्द्रज्योत्स्ना विभाव्यते तावत् । ततो निबिडवृक्षेषु घनीभूततमःप्रविष्टं पदचिह्नैरालक्ष्य हरेरन्वेषणान्निवृत्ताः । स्त्रीत्वाद् भयेन तमो नाविशन्निति भावः । यद्वा हरेः संबन्धिन्यस्तथाच तत्र धूर्तान्तरास्थितिशङ्कया न प्रविष्टा इति भावः । यद्वा, अस्मासु तमः प्रविष्टासु सतीषु स बहिर्निःसृत्य गमिष्यतिचेत् सर्वथा न मिलिष्यतीति, न तत्र प्रवेश इत्याशयः । यद्वाऽस्मासु प्रविष्टासु संभ्रमादन्धकारे पलायनपरायणस्य परमसुकुमारपादाद्यवयवस्य प्रेष्ठस्य खेदो भविष्यतीति विचार्य्य निवृत्ता इत्यभिप्रायः । अथवा प्रकाशकराजस्य भगवतोऽत्र प्रवेशे तमःप्रवेशो न संभवतीति तत्र प्रविष्टं तम आलक्ष्य तर्कयित्वा निववृतुरित्याशयः ॥

निवृत्तिपक्षे, ततो विस्मयं प्राप्यानन्तरं यावद्विवेकलक्षणचन्द्रस्य ज्योत्स्ना तत्र तत्पदार्थे तत्प्रकाशो विभाव्यते तावदतन्निरसनार्थमविशन् । अग्रे चैतन्यघने परमात्मनि तमः प्रविष्टप्रकाशात् सामर्थ्याद् आलक्ष्य हरेः संबन्धिन्यः श्रुतयो निववृतुः ॥ ४३ ॥

तन्मनस्कास्तदालापास्तद्विचेष्टास्तदात्मिकाः ॥
तद्गुणानेव गायन्त्यो नात्मागाराणि सस्मरुः ॥ ४४॥

ननु सर्वथा कृष्णमलब्धवत्यः प्राप्तपरिश्रमाः स्वगृहान् प्रति कुतो न गता इतिचेत् तत्राह ॥ नात्मागाराणि सस्मरुः । आत्मानं परिश्रमादित्युक्तं. देहं गृहागाराणि गृहाँस्तत्रत्यानि वस्तूनि च न स्मृतवत्यः । स्मरणं विना कथं गमनादिकं तासां भवेदिति भावः । ननु कुतो न सस्मरुरित्याशङ्क्याह ॥ तन्मनस्का इति ॥ तस्मिन् भगवति मनो यासां ताः । तथाच स्मरणकरणस्य मनसो भगवति प्रावष्टत्वात् कथमन्यस्मरणं भवेदिति भावः ॥ आलापद्वारापि स्मरणं वारयति ॥ तदालापास्तत्सबन्ध्यालापो यासां ताः । तथाच गृहं नु प्रति गन्तव्यमितिभापणे कस्या अप्यवकाशो न जात इति भावः ॥ नापि हस्तादिसंज्ञया सूचनावकाशः कस्या अप्यासीदित्याशयेनाह ॥ तस्यैव विचेष्टा पूर्वकथा यासां ताः । ननु कदाचिन्मनसा गेहाद्यनुसंधानं कुतो न जातमितिचेत् तत्राह ॥ तदात्मिकाः ॥ स आत्मा यासां ताः । तथाचान्तर्हितात्मनां तासां तदन्यानुसन्धानादिकं दुर्लभमिति भावः । किञ्च गेहादिस्मृतिसंपादकं दुरदृष्टमपि नोत्थितं, तन्नाशकतद्गुणकीर्तनपरत्वादित्याह ॥ तादिति ॥ गुणान् गोवर्द्धनोद्धरणादिना गोकुलरक्षणादीन् । यद्वा, यतः काश्चित् तन्मनस्काः, अहो प्रेष्टः संप्रति कुत्र वर्तते, कथं मिलिष्यतीत्यादितद्विषयकमनोराज्यपराः । काश्चित् तदालापाः । अहो अस्मान् विहाय कथं गत, इतः परं कुत्रान्वेषणीय इत्यादितद्विषयकवार्तालापपराः । काश्चित् तद्विचेष्टाः पूतनास्तनपानादितद्विचेष्टाकरणपराः । काश्चित्तदात्मिकास्तस्मिँल्लीनमनस्कत्वात् समाधिस्था इव तदेकस्फूर्त्तयः । काश्चित्

तद्गुणानेव गायन्त्यः सत्यस्तदाऽऽत्मागाराणि न सस्मरुः । यद्वा कदाचित् तन्मनस्काः कदाचित् तदालापा इत्येवं योज्यम् ॥

निवृत्तिपक्षे, कांश्चित् तन्मनस्काः, प्रत्यगभिन्नब्रह्मविषयकाऽभिप्रायाः । काश्चित् साक्षादेव तदालापाः, सत्यत्वादिरूपेण तस्य प्रतिपादिकाः । काश्चित् तद्विचेष्टाः, सर्जनादिरूपतच्चेष्टाप्रतिपादिकाः । काश्चित् तदात्मिकाः, तस्मिन्नात्मा तत्प्राप्तिसाधनशान्त्यादिरूपः स आत्मत्वेन वा प्रतिपाद्यो यासां ताः कारागृहस्थानीयानि तानि । काश्चित्तद्गुणान् सर्वज्ञत्वसर्वेश्वरत्वादिरूपानेव गायन्त्य आत्मनोऽगाराणि अज्ञानाहङ्कारादीनि न सस्मरुः । परमाऽर्थत्वेन न प्रतिपादयामासुरित्यर्थः ॥ ४४ ॥

पुनर्विरहव्याकुलचित्ताः परस्परं विचारयामासुः । अहो कुत्र गत्वा तदन्वेषणं विधेयमिति कयाचिदुक्ते, अहो अन्वेषणं प्रियस्य क्लेशमात्रावहम् । समीपमागता अस्मानालक्ष्य पलायनपरस्य क्लेशावश्यम्भावादित्यन्याभिरभिहिते, अहो सत्यं तस्य करुणां विना तत्प्राप्तिर्दुर्घटाऽतस्तत्प्राप्त्युपायो विधेय इत्यपराभिः कथनपूर्वं विचार्य तत्कीर्तनमेव बलवदुपायं निश्चित्य तदर्थं पुनः कालिन्द्याः पुलिनमागता इत्याह ।

पुनः पुलिनमागत्य कालिन्द्याः कृष्णभावनाः ॥
समवेता जगुः कृष्णं तदागमनकाङ्क्षिताः ॥ ४५ ॥

पुनरिति ॥ यत्र प्रेमपूर्वं संगम आसीत् तदेव कालिन्द्याः पुलिनं स्वसुखहेतुभूतमसरच्छन्दम् । यत्र वस्तु लुप्यते तत्रैवान्विष्यत इत्याशयेनागत्य गुप्तकृष्णभावनाः । प्रेष्ठमेव भावयन्ति ध्यायन्ति तथा तस्य श्रीकृष्णस्यागमनं काङ्क्षितं यासां ताः, समवेता मिलताः सत्यः कृष्णमेव जगुरूर्ध्वं गानं चक्रुः । विरहजनकदोषनिवृत्त्य-

ऽर्थं तस्य करुणोत्पत्त्यर्थं चोच्चैर्गानं, तदर्थं च समवेतत्वम् । कस्या अपि भाग्यात् स्नेहेन कृपया वाऽऽगच्छेदित्याशयेन वा समवेताः । अन्यां काञ्चिदादाय पुनः पलायनं कुर्यादित्याशयेन वा ॥ निद्राव्याप्तिपक्षे,पुनर्मायालक्षणायाः कालिन्द्याः पुलिन इति ॥ ४८ ॥

इति श्रीमद्भागवतव्याख्यायां गूढार्थदीपिकायां

दशमस्कन्धे त्रिंशोऽध्यायः ॥ ३० ॥ २ ॥

## अथैकत्रिंशोऽध्यायः ॥

एकत्रिंशे शुभाध्याये गोपिकागीतसंज्ञके ॥
प्रार्थयन्त्यो जगुः कृष्णं प्रेम्णा गोप्य इतीर्यते ॥ १ ॥

अहो तस्य कलगीतेनाकृष्टा यथा तदन्तिकं प्राप्तास्तथा सोऽप्यस्मद्गीतेनाकृष्टोऽस्मदन्तिकं प्राप्स्यतीत्याशयेन गानप्रवृत्तानां भगवत्प्रियाणां गानमुदाहरति ॥

श्रीगोप्य ऊचुः ॥

जयति तेऽधिकं जन्मना व्रजः श्रयत इन्दिरा शश्वदत्र हि ॥
दयित दृश्यतां दिक्षु तावकास्त्वयि धृतासवस्त्वां विचिन्वते १

जयतीति ॥ मङ्गलार्थमादौ जयतीति प्रयोगः । तथाच मङ्गलाऽर्थकत्वादादौ क्रियापदप्रयोगो न दोषावहः । अहो व्रजकृतार्थतार्थं कृतावतारेण त्वया सर्वोऽपि व्रजः कृतार्थीकृतस्तत्रत्या वयं किमर्थमुपेक्ष्यन्ते इत्याशयेनाहुः ॥ तवाजस्य जन्मनाऽऽदिकारणविधुरस्य जन्मना स्वेच्छागात्रविलासितेन जन्मना प्रादुर्भावेण व्रजस्तत्स्थानत्वाज्जयति समस्तभूमिभुवःस्वर्लोकप्रदेशेभ्यः सर्वेभ्यो ब्रह्मलोकान्तेभ्य उत्कर्षेण वर्तते। तत्राप्यधिकं वैकुण्ठादपि जयति यद्यपि तत्रापि भगवान् वर्तते तथाप्येवंविधं जन्मादायैवंविधा लीला नाऽऽचरति। यद्यपि जन्मस्थानं मथुरा, तथापि तत्रत्यानां तदनुपलम्भात । देवकीवसुदेवाभ्यामपि नन्दयशोदावन्न तु जन्मोपलब्धमपि तु विष्णुस्वरूपदर्शनमात्रम् । अत्रत्यलीलादर्शनं तु सर्वस्याऽपि दुर्वारमतो व्रज एवोत्कृष्टतम इति भावः । ननु मज्जन्मना व्रजस्य परमोत्कर्षो भवतीभिः कथमवगत इतिचेत् तत्राहुः ॥ श्रयत इति ॥ हि यस्मादिन्दिरा श्रीरत्र व्रजे श्रयते । वैकुण्ठे तु सैव प्राधान्यात् सर्वैराश्रीयत इत्यर्थः । तत्र हि शश्वत् सर्वदा तु सै-

व नित्या भार्याऽतस्तस्या नैश्चिन्त्यान्न सर्वदाऽऽश्रयणमावश्यक-मत्र तु बह्वीनां मपत्नीनामस्माकं सत्त्वादत्रसरलाभाय सर्वदा सेवन-म्। युक्तश्चैतत् । पतिव्रताशिरोमणिभूतायास्तस्या, भक्तेष्वनुग्रहा-तिशयं ख्यापयितुमन्याधीनतया वर्तमानस्य पत्युरनुवर्तनमिति भावः । यस्मादस्मदर्थमत्र भवतो जन्म, यस्माच्च नास्ति लक्ष्म्या भयं तयाऽङ्गीकृतत्वादतो, हे दयित, दृश्यतां त्वया प्रत्यक्षीभूय-ताम् । प्राणप्रियस्य प्रत्यक्षं तव प्राणस्थितिसाधनमिति संबोधना-शयः । किञ्च तावका व्रजस्त्रियस्त्वां दिक्षु विचिन्वते । तथाचात्रा-ऽनुग्रहार्थमवतीर्णस्य तव ब्रह्मादिभिरन्वेषणमुचितं, न तु व्रजवा-सिभिरिति भावः । ननु युष्माकं तादृशी भक्तिर्नास्ति इति कृत्वा-ऽहं तिरोहित इतिचेत् तत्राहुः ॥ त्वयि धृता असवः प्राणाः सर्वेन्द्रि-याणि याभिस्तास्तथाचैवंविधाः। त्वदीयानाम् अनाथवद्दिक्षु भ्राम्य-तीनामिदं महदसंगतमिति महद्दैन्यं व्यज्यते ॥ अनभिज्ञापक्षे, हे दयित, ते जन्मना व्रजस्य सर्वोऽपि जनोऽधिकं जयति । यद्दिनमा-रभ्यात्र तव जन्म जातं तद्दिनमारभ्य ब्रह्माण्डस्थेषु मध्ये कस्माच्चि-दपि व्रजवासिनां मध्ये कस्यापि पराजयो न जात इत्यैश्वर्यस्य परा काष्ठा ध्वनिता ॥ इन्दिरा संपदादिरूपा श्रीरपि अत्र व्रजे शश्वन्निरन्तरं श्रयते। श्रीरिति स्वनामसार्थक्याय व्रजमलङ्कृत्य वर्त्तते हि प्रसिद्धमिदमिदानीं लोकत्रये । तथाच, नारायणसमा गुणै-रिति ज्योतिर्विदग्रगण्येन गर्गाचार्येण भवज्जन्मपत्रे लिखितत्वा-न्नारायणसमत्वं त्वय्यनुभूयते व्रजे वैकुण्ठतुल्यत्वम् । अतोऽस्माकं विरहरहितवैकुण्ठवासिसमानत्वं कुतो नास्ति । तस्मादस्मास्वपि तथात्वं सम्पादयितुमवश्यमस्माभिर्भवान् दृश्यताम् । नच वैकुण्ठ-वासिनां नारायण इव युष्माकं नाहं प्रेष्ठ इति चेत् तत्राहुः ॥ दिक्षु तावका इति ॥ सर्वासु दिक्षु यावच्छक्त्याऽव्याप्यस्माभिरन्विष्य-

ते, तथापि भवान्न लभ्यते तत्र वयं किं कुर्म इति भावः । तत्रापि तावकास्त्वदनन्या, अत एव त्वामेव । अनेनासमाहितता निरस्ता । ननु परोक्षार्थं तिरोहितेन मयाऽवगतं– नाद्यापि युष्मत्प्रेमपरिपाकावस्था सम्पन्ना । मद्विरहेऽपि जीवनदर्शनादितिचेत् तत्राहुः ॥ त्वयि त्वत्प्राप्त्याशया धृतासवो जीवन्तीत्यर्थः । तन्निवृत्त्या तु तावकानां जीवनं दुर्लभमतो झटिति दृश्यताम्।मरणपर्य्यन्तपरीक्षाया अनुचितत्वादिति भावः ॥ मानिनीपक्षे, तव व्रजो यासामस्माकं जन्मना अधिकं जयति श्रीश्च शश्वदत्रैव श्रयते, तथाभूतास्तावकास्त्वां विचिन्वत इति दृश्यतां ज्ञायताम् । परमोत्कर्षैश्वर्य्यादिहेतुभूतस्वजनदुखाऽपरिज्ञानरूपमान्ध्यं नोचितमिति भावः । न च साधारणसम्बन्धः, किन्तु प्रेष्ठो भवानिति सम्बोधनाशयः । किञ्च, त्वयि धृतासवस्त्वत्प्राप्त्याशया धृतजीवनाः । तथाच तन्निवृत्त्या मृतास्वस्मासु तवापि परमोत्कर्षादिकं न स्थास्यतीति भावः। यद्वा, ननु दयिते मयि वियुक्ते भवतीनामेतावत्पर्य्यन्तं कथं प्राणा देहे स्थिता इतिचेत् तत्राहुः ॥ त्वयीति ॥ कठोराशिरोमणिभूते असंख्यातस्वसखीजनपरमतापहेतुक्रीडापरे स्वीयदुःखजनितसुखाऽम्बुधिमग्ने धृताः स्थापिताः प्राणाः याभिस्ताः । तथाच यथा स्वगृहे दह्यमानेऽप्यन्यदीयगृहस्थं वस्तु न दह्यते तथा त्वयि स्थितत्वादस्मत्प्राणानामेतावत्पर्य्यन्तं रक्षा जातेति भावः । यद्वा यद्यपि तव जन्मना व्रजोऽधिकं जयति श्रीश्च शश्वदत्रैव श्रयते तथापि वृथैवेदं सर्वम् । यतस्त्वयि धृतासवस्त्वदर्पितप्राणादयस्तावकास्त्वां विचिन्वते । अद्यापि दुःखिता एव सन्ति, तस्मात् सुहृदननुग्राहिकायाः समृद्धेर्वैयर्थ्यं दृश्यतां ज्ञायताम् । तद्वैयर्थ्यपरिहाराय प्रत्यक्षीभूयतामिति वा । दयितत्वात् तवेदं हितं वदाम इति सम्बोधनाशयः ॥

निवृत्तिपक्षे, अधिष्ठानभूतचिदात्मनैवेदं देहादिसमस्तं शोभत इति श्रुतय आहुः ॥ जयतीति ॥ हे दयित परप्रेमास्पद तव जन्मना प्रादुर्भावेण व्रजो देहेन्द्रियसंघातोऽधिकं जयति सत्तास्फूर्तिमत्तयाऽवभासते तथेन्द्रियशोभाप्यत्रैव निरन्तरं श्रयते सौन्दर्यादिगुणाक्रान्ततया प्रतीयते । तस्माद् यस्यात्मनस्तव सत्तादिना मिथ्याभूतस्यात्यन्तमलिनस्याऽप्येवं प्रतीतिस्तेन त्वया दृश्यताम् । विद्वदनुभवविषयत्वं प्राप्यताम् । के ते विद्वांस इत्यपेक्षायाहुः ॥ ये त्वयि धृतासवस्तावकाः । तानि सर्वाणि संयम्य युक्त आसीत मत्परः, मच्चित्ता मद्गतप्राणा इत्यादिनोक्तलक्षणा भवदीयास्त्वां सर्वाधिष्ठानभूतं परमात्मानं विचिन्वते अन्वेषणपराः सन्ति । तथाच पञ्चकोशविवेचनात्मकान्वेषणप्रकार उक्तस्तैत्तिरीयश्रुतौ । तस्माद्वा एतस्मादन्नरसमयादन्योऽन्तरात्मा प्राणमयः । तस्माद्वा एतस्मात् प्राणमयादन्योऽन्तरात्मा मनोमयः । तस्माद्वा एतस्मान्मनोमयादन्योऽन्तरात्मा विज्ञानमयः । तस्माद्वा एतस्माद्विज्ञानमयादन्योऽन्तरात्माऽऽनन्दमयस्तस्य प्रियमेव शिरो मोदो दक्षिणः पक्षः प्रमोद उत्तरः पक्ष आनन्द आत्मा ब्रह्मपुच्छं प्रतिष्ठा । असन्नेव स भवत्यसद् ब्रह्मेति वेदचेत्, अस्ति ब्रह्मेति चेद्वेद सन्तमेनं ततो विदुरिति । यद्वा व्रजः श्रुतिकदम्बस्तव जन्मना प्रादुर्भावेण प्रकटवेदार्थभूतेन त्वयाऽधिकं जयति शोभां च महतीं प्राप्नोति । हि यस्मादतो ये त्वयि धृतासवस्त्वां विचिन्वते तेषां श्रुतिकदम्बे भवान् दृश्यतामित्यर्थः । यद्वा तवाविर्भावेण व्रजः संघातोऽधिकं जयति, श्रीश्च विद्वद्देहादौ शश्वच्छ्रयते । अतो ये विचिन्वते तेषां दृश्यताम् । एषु पद्येषु पादद्वितीयाक्षरहलैक्यं केषुचित् पादेषु प्रथमसप्तमाक्षरहलैक्यमालङ्कारिकसमयसिद्धसावर्ण्यात् क्वचिदैक्यमिति द्रष्टव्यम् । एकादशाक्षरे त्रिष्टुप्संज्ञके छन्दसि चतुःषष्ट्युत्तरषट्शत-

तमो भेदः ॥ १ ॥

अहो यो गुडदानेन म्रियेत तस्मै विषं किमर्थं देयमिति लौकिकन्यायादीषदारक्तकटाक्षसाध्याऽस्मद्व्यापादनार्थं तिरोधानं नोचितमित्याशयेनाहुः ॥

शरदुदाशये साधुजातसत्सरसिजोदरश्रीमुषा दृशा ॥
सुरतनाथ ते शुल्कदासिका वरद निघ्नतो नेह किं वधः ॥ २ ॥

शरदिति ॥ शरत्कालीनो यः स्वच्छजलाशयस्तत्र साधु सम्यक् प्रकारेण जातं सत्समीचीनं यत् सरसिजं कमलं तदन्तर्वर्तिनी या श्रीरारुण्यशोभा तां मुष्णातीति तथा तादृशरूपया रोषेणेषद्रक्तया दृशा नेत्रेण अमूल्यदासिका नो निघ्नतो मारयतस्तव त्वया क्रियमाणोऽयमिह लोके किं वधो न भवति । किं विरहानलज्वालया वधो भवति । यतो, हे सुरतनाथ सुरतस्य सम्भोगस्य नाथ तत्प्रद । तथाच सुरतनाथस्य तव रोषदृष्ट्यैवाऽस्माकं मरणं सुकरमिति भावः । ननु रोषतिरोधानयोरुभयोरपि मरणहेतुत्वाविशेषात् किमर्थमेवमुच्यते इति चेत् सत्यं, तथापि क्षमापनादिना रोषदृष्ट्युपशमस्यापि सम्भवादस्ति विशेष इत्याशयेनाहुः ॥ वरदेति ॥ समक्षे प्रेष्ठेऽतिप्रार्थिनया वरदत्वं सम्पादयितुं शक्यमऽसमक्षे त्वशक्यप्रतीकारतेति भावः । तथाचाऽस्मद्दर्पनाश एव भवतः कर्तुं समीहितो, न तु प्राणवियोगः । करुणानिधेरिष्टदेवस्य तत्साधने प्रवृत्त्यसम्भवादतस्तन्निवृत्तिस्त्वीषद्रोषदृष्ट्यैव सुकराऽतो वृथैव तिरोहितोऽसीति भावः । यद्वा, ननु नाहं युष्माकं मरणे व्यापृतः, स्वत एव भवतीनां प्राणा अपगच्छन्ति चेन् तत्र मम कोऽपराध इतिचेत् तत्राहुः ॥ शरदिति ॥ तव दृशा दर्शनेन निघ्नतः किं वधो न । तत्रापि हे सुरतनाथ । सुरतार्थमागतानां तत्प्राप्तिस्तु

दूरे गता, प्रत्युत मरणमेव मध्य उपस्थितमित्यतोऽस्मन्मन्दभाग्यस्य सुरतप्रदान्मरणप्राप्तिकरस्य माहात्म्यमिति भावः। किञ्चास्मद्वधे किं चित्रं त्वद्दर्शनं तथाभूतां श्रियमपि मुष्णाति नाशयतीति तथा। किञ्च सर्वेषां वरप्रदस्त्वमस्मान्मारयसीति महच्चित्रमित्याशयेन संबोधयति हे वरदेति ॥ तथाच सर्वेषां वरदानाय प्रत्यक्षभवनशीलस्य तवाऽस्मन्मन्दभाग्यवशादस्मन्मरणसाधनं तव तिरोधानं सम्पन्नमित्याक्रोशोऽपि ध्वनितः ॥ अनभिज्ञापक्षे, विचिन्वन्तु भवत्यो, मया तु नागम्यत इति चेत् तर्हि दृशा.स्मत्सर्वस्वमपहृत्य गतेन त्वयाऽस्मद्वध एव संपादित इत्याशयेनाहुः ॥ शरदिति ॥ यथोक्तया दृशा निघ्नतस्तव त्वया क्रियमाण इह लोके वधो न किम्। अभिचारादिकर्मणा कृतो लोकैरज्ञातोऽपि वधोऽनिष्टसाधनं किं न भवतीति भावः॥ दृशैव शुल्केन मूल्येन दासिका अपि मारयतः। कन्प्रत्ययेन सूचनेनात्यन्तकरुणापात्रतां व्यञ्जयन्ति। यद्वा वयं तु न त्वया मूल्येन क्रीता नापि विवाहिता, अपि त्वऽशुल्कदासिकाः स्वयमेव मौग्ध्येनाभूमेत्यर्थः। तस्मात् सुरतरूपवरप्रदानेनास्मत्प्राणप्रत्यर्पणाय दृश्यतामित्याशयेनाहु ॥ हे सुरतनाथ, हे वरद ॥ मानिनीपक्षे, अहो अस्मद्वधायानुनयं कर्तुं प्रवृत्तस्य तवाभिप्रायस्तदानीमस्माभिर्न बुद्धोऽधुना त्वसंख्यातस्त्रीवधादपि भयशून्यस्तथा प्रवृत्त इत्याशयेनाहुः॥ शरादिति ॥ दृशा सुरतयाचक ! न केवलयाचनमात्रसमर्था तव दृक्, किन्तु चौर्य्यकर्माऽपीति द्योतनाय विशिषन्ति ॥ शरादिति ॥ यथा चौरः सतामपि निगूढां कठिनदुर्गस्थामपि नायिकां मुष्णातीति तथा। तथा यदेवम्भूता श्रीरपि हृता तदा सरलानां सर्वत्र भ्रमतीनां विवृतश्रोत्रादिकवाटानां मनआदिहरणे किञ्चित्रमिति भावः। यद्वा, हे सुष्ठु रतानां नाथ उपतापक, हे निजवरच्छादक, अशुल्कदासिकाः परमप्रेमवतीः सखीर्नः। अतो मित्रद्रोहाऽऽदि-

दोषपरिहारायागम्यतामिति भावः ॥

निवृत्तिपक्षे, तव दर्शनेनैव संसारनिवृत्तिर्नान्यथेत्याहुः ॥ शरदिति ॥ शरत्कालीनजलवत्स्वच्छे आशये अन्तःकरणे ते तव दृशा दर्शनेन किं किमप्यनिर्वचनीयमज्ञानं शुल्कस्य तत्त्वाद्विषयस्य दासिकास्तत्तदाकारा अन्तःकरणवृत्तीश्च निघ्नतो नाशयतो विदुष इह वधो नाशो जन्ममरणलक्षणसंसृतिप्रवेशलक्षणो न भवति । तथाच श्रुतयः आत्मन्येवात्मानं पश्येत् । तरति शोकमात्मवित् । ब्रह्मविदाप्नोति परम् । न स पुनरावर्तत इत्याद्याः । अज्ञानतत्कार्ययोर्ज्ञाननिवर्त्यत्वमुक्तमित्याशयेनाहुः ॥ असाधुजातमनिर्वचनीयोत्पत्तिमद्, यत् सरसिजं सद्रूपब्रह्मलक्षणे सरसि अधिष्ठाने प्रतीतं कमलस्थानीयमज्ञानं तदुदरश्रीश्च तदुभयं मुष्णाति नाशयतीति तथा तयेत्यर्थः ॥ २ ॥

किञ्च बहुभ्यो मृत्युभ्यो रक्षित्वा विरहाग्निना मारणाय प्रवृत्तौ निमित्तं न विद्म इत्याशयेनाहुः ।

विषजलाप्ययाद् व्यालराक्षसाद् वर्षमारुताद्वैद्युतानलात् ॥
वृषमयात्मजाद्विश्वतो भयादृषभ ते वयं रक्षिता मुहुः ॥ ३ ॥

विषेति ॥ विषजलं कालियह्रदजलं तेनाप्ययो गोपानां नाशस्तस्मात् । व्यालराक्षसाद् वत्सपालान् गिलतोऽघासुराद् वत्सपालादिरक्षणेन परम्परया वयमपि रक्षिताः । वर्षयुक्तान्मारुताद् वैद्युतानलादशनिपाताच्चेन्द्रकृताद् गोवर्द्धनधारणेन । साक्षाद् वृषो वृषभासुरारिष्टः । मयात्मजाद् व्योमासुरात् । तच्चरितमग्रे वक्ष्यमाणमपि रासोत्सवात् पूर्वं जातमिति द्रष्टव्यम् । तल्लीलाया आतिबाल्य एव योग्यत्वात् । किं बहुना अन्यस्मादपि सर्वतो भयाद्, हे ऋषभ सर्वोत्तम वयं रक्षिताः । तथाच यथा श्रेष्ठत्वात् पूर्वं रक्षि-

तास्तथेदानीमपि दर्शनप्रदानेनाऽस्मद्रक्षणमेवोचितं, न तु स्वभाव-त्याग इति भावः ॥ अनभिज्ञापक्षे, तत्र तत्र स्वरक्षणेन यथा वयं रक्षितास्तथेदानीमपि स्वप्रकटनेन रक्षणीया इति भावः ॥

मानिनीपक्षे, ननु यदि भवतीनां वधो ममाऽभीप्सितः स्यात् तर्हि भवत्यो न रक्षिताः स्युरित्याशङ्क्याहुः ॥ विषेति ॥ तथाच स्वहस्तेन वधार्थमेव रक्षिता इति वर्तमानकालीनया प्रवृत्त्या ज्ञायत इति भावः। तत्र तत्र रक्षणपरायणे श्रेष्ठत्वेन ख्याते त्वयि विश्व-स्तानामस्माकं घातो नोचितो, विश्वासघाताख्यकर्मकर्तृत्वायोग्य-त्वाच्छ्रेष्ठस्य तवेति संबोधनाशयः ॥

निवृत्तिपक्षे, किञ्चास्माकमपि तत्र तत्त्वज्ञानादेव रक्षणं भ-वति, नान्यथेत्याहुः ॥ विषेति ॥ ते तव ज्ञानादिति शेषः। हे ऋ-षभ क्षराक्षरातीतपुरुषोत्तम, तव ज्ञानाद्धेतुभूतादधिकारिभिस्त्वद-नुग्रहेण संपादितात्पुनः पुनर्वयं रक्षिता जाताः।परमात्मज्ञानस्य वि-शेषणानि विषरूपस्य, बिभेत्यल्पश्रुताद्वेदो मामयं प्रहरिष्यतीति भ-यहेतुत्वेनाभितस्य जलस्य, डलयोरभेदाज्जडस्याल्पश्रुतस्याप्ययया-त् पलायनकरात्। पुनश्च व्यालानां बहुश्रुतत्वेऽपि विपरीता-र्थकल्पकत्वात् खलानां, राक्षसाद् राक्षसवद्भयङ्करात्। व्यालो दुष्टगजे सर्पे खले श्वापदसिंहयोरिति मेदिनी। वर्षस्य दुःखवृष्टे-र्मारुताद् वातवत्तन्नाशकरात्। तत्र को मोहः कः शोक एकत्व-मनुपश्यत इत्यादिश्रुतेः। तथा वैद्युताद् विद्युद्वद् निष्प्रभतरणा-दिस्थानीयं ज्ञानं वैद्युतम्। विद्युत्तडिति सन्ध्यायां स्त्रियां त्रिषु तु निष्प्रभे इति मेदिनी। तदेव वैद्युतं, तत्सम्बन्ध्यहङ्कारादिकं वा। तस्याऽनलादनलवद्दाहकात्। तथा वृषमयात्मजाद् भगवदाराधन-लक्षणं निष्कामं कर्म नित्यादि समाध्यन्तं वृषशब्दप्रतिपाद्यम्। तन्मयादात्मनोऽन्तःकरणाज्जातात्। अत एव, विश्वतः सर्वतः

अभयात् सर्वप्रकारेणाऽनुच्छेद्यात् । हेतुबाधेन सर्वभयोच्छेदकरादिति वा । द्वितीयाद्वै भ भवतीति श्रुतेः ॥ ३ ॥

युक्तं चास्मदादिरक्षणं, तदर्थमेव नन्दनन्दनविग्रहात्मनाऽऽविर्भूतत्वादित्याशयेनाहुः ।

न खलु गोपिकानन्दनो भवा-
नखिलदेहिनामन्तरात्मदृक् ॥
विखनसार्थितो विश्वगुप्तये
सख उदेयिवान् सात्त्वतां कुले ॥ ४ ॥

नेति ॥ गोपिकाया यशोदाया नन्दनः सुतो भवान्न भवतीति प्रसिद्धम् । किन्तु सर्वप्राणिनां योऽन्तरात्मा तस्य दृक् साक्षी अन्तर्यामी भवान् एवम्भूतोऽपि विखनसा ब्रह्मणाऽर्थितो विश्वस्य रक्षणाय प्रार्थितः सन् सात्वतां यादवानां कुले उदेयिवान् प्रादुर्भूतः । नन्वेवंजानतीभिः किमित्युक्तं— निघ्नतो नेह किं वध इति तस्मात्तिरोहित एव स्थास्यामि, यथा युष्माकं कदापि दर्शनं न भवेदित्याशङ्क्याहुः ॥ सख इति ॥ तथाच भवद्दत्तसख्यानुरूपेयमुक्तिः करुणोद्दीपिका, न तु कोपावहाऽतो विश्वगोपनाय प्रादुर्भूतस्य तव तन्मध्यगतानां स्वयं सखीभावावेशितानां करुणयापालनमेवानुरूपमिति भावः । यद्वा सर्वान्तरवृत्त्यभिज्ञस्य तवास्मदन्तःकरणानिरुपमानिरेकोपरि दृष्टिः कर्तुं युक्ता, न तु दर्पाभासोपालम्भोत्पादिगणनेत्याशयेनाहुः ॥ नेति ॥ अनभिज्ञापक्षे, तथाच कालियमर्दनादिना स्वीयरक्षणादिना लोकोत्तरसामर्थ्यप्रकटनाद्वयमेवं तर्कयाम इत्याशयेनाहुः ॥ नेति ॥ खलुशब्दो वितर्के । सर्वापेक्षयाऽल्पबलाया गोप्याः सुतो भवान्न, किन्तु सर्वदेहिनामन्तरात्म-

दृगिति तर्क्यतेऽस्माभिः । ननु सर्वान्तर्यामिणो मम देहिभावेन क-थमुत्पत्तिरित्याशङ्क्याहुः ॥ विखनसेति ॥ सात्त्वतां सात्त्विका-नां सज्जानानां कुले विश्वगुप्तये उदेयिवान् । तस्मात् तत्राविर्भावो, न तु जन्माऽतः सर्वपालनायावतीर्णस्य तव सखीनामस्माकमुपेक्षा नोचिता । दर्पोऽप्यस्माकं त्वदुत्कर्षहेतुरतः कोपं विहायागन्तव्य-मिति भावः ॥ मानिनीपक्षे अहो निर्दयशिरोमणिरयं क इति बहु विचार्य यथाऽस्माभिर्भवान्निश्चितस्तथेत्याशयेनाऽऽहुः ॥ नेति ॥ भवान् करुणाहीनः प्रेयसीदुःखाभ्यां तदाविष्टस्वान्तायाः श्री-यशोदाया नन्दनस्तदीयानां दुःखप्रदत्वादानन्दजनकः सुतो न भवति । तर्हि कोऽहं निश्चित इतिचेत्त्राहुः ॥ सर्वप्राणिनामन्तर्यामी-स एव परमदुःखवतां दुःखं पश्यन्नपि तदन्तः सुखं रमाति । सर्वा-न्तःस्थस्य तस्याबाहिराविर्भावे निमित्तमपि वयं विद्म इत्याहुः ॥ वि-खनसेति ॥ स्वसृष्टिवृद्धिमभीप्सुना ब्रह्मणा विश्वगुप्तये प्रार्थितः—त्व-द्भक्त्या जीवानां मोक्षो भवत्यतस्त्वमवतीर्य गुप्तस्तिष्ठतदेश्वरत्वादिना-मपि त्वीश्वरमन्यं मन्यमानानामपि मोक्षो दुर्लभो भविष्यति, तत एव मे सृष्टेर्वृद्धिर्भविष्यतीति विधिवाञ्छितसिद्ध्यर्थं परदारपरद्र-व्यचौर्यादिकं स्वस्वभावप्रतिकूलं स्वगोपनार्थमङ्गीकर्तुं सात्त्व-तां कुले उदेयिवान् । अत एव परदाराणामस्माकं सख्यमाश्रित-वानिति संबोधनाशयः । यद्यपि स्वगोपनार्थमेव त्वं प्रवृत्तस्त-थाप्यस्मद्दुःखकरमौदासीन्यं किमिति स्वज्ञापकं चिह्नं पुन-र्गृहीतवानतः स्वप्रकटतासंपादकं तव सर्वथा त्याश्रयणीयमि-ति भावः । यो विश्वस्य प्रपञ्चस्य मोक्षमार्गेऽप्रवृत्तिसम्पादनेन संरक्षणार्थं सात्त्वतां दयादिसात्त्विकधर्मवतां कुले तेषामपि ततो वैमुख्यसम्पादनार्थमुदेयिवान् अस्माकमपि स्वधर्माद्विच्युतिसिद्ध्य-र्थं सख्यं गृहीतवानिति सम्बोधनाशयः । यद्वा प्रथमं निर्दिष्टस्य

नञः सर्वपादैः सम्बन्धः । भवान् गोपिकानन्दनो न खलु प्रसिद्धं तद्रक्षणाद् व्यावृत्तत्वात् । नाप्यखिलदेहिनां हृद्गतभावज्ञः । अस्मन्मनोगतप्रेमातिरेकाज्ञानात् । तथा विखनसा, न हिंस्यात् सर्वा भूतानीत्यादिवेदवाक्यैर्विश्वगुप्त्यर्थं न प्रार्थितो, यथोक्तप्रार्थनावाक्यमपि न श्रुतवान्, अस्मद्धिंसापरायणत्वात् । नाऽपि सात्वतां कुले उदेयिवान् तत्कुलोचितकृपालुत्वाद्यदर्शनात् । तथा तद्धर्मासम्पादनाद् वृथैव गोपिकानन्दनत्वादिना ख्यातोऽसीति भावः । अत एव सखित्वेन ख्यातः सखा न भवसि शत्रुधर्म्माक्रान्तत्वादित्याशयेन सम्बोधयति, हे असख्य इति ॥

निवृत्तिपक्षे, खलुशब्दो निषेधे । भवान् गोपिकानां श्रुतीनामस्माकमानन्दकरो न भवतीति न, यतोऽखिलदेहिनामन्तरात्मदृक् । यो विज्ञाने तिष्ठन् विज्ञानमन्तरो यमयति यं विज्ञानं न वेदैष त आत्मान्तर्याम्यऽमृत इति श्रुतेः । विशेषेणाखनति वेदार्थं विचारयतीति विखना विद्वान् तेनार्थितो विषयीभूतमोक्षरूपो विश्वस्य सर्वस्य सकार्यकारणसङ्घातस्य गुप्तये सखः स्वैरिन्द्रियैः सह वर्तमानः सन् सत्त्ववतां मनआदीनां समुदाये उदेयिवान् । अनेन जीवेनात्मनाऽनुप्रविश्य नामरूपे व्याकरवाणि । अपरेयमितस्त्वन्यां प्रकृतिं विद्धि मे पराम् * जीवभूतां महाबाहो ययेदं धार्य्यते जगदिति श्रुतिस्मृतिभ्याम् ॥ ४ ॥

तस्मात् त्वद्भक्तानामस्माकमेतत्प्रार्थनाचतुष्टयं सम्पादयेत्याहुः ।

विरचिताभयं वृष्णिधुर्य्य ते
चरणमीयुषां संसृतेर्भयात् ॥
करसरोरुहं कान्तकामदं
शिरसि धेहि नः श्रीकरग्रहम् ॥ ५ ॥

विरचितेति, चतुर्भिः ॥ करसरोरुहं नोऽस्माकं शिरसि धेहि तत्र स्थापनेनान्तःकरणस्थस्य तापस्योपशमो भविष्यति सरोरुहात्मक-स्यात्यन्तशीतलत्वादिति सरोरुहपदेन सूचितम् । न केवलं तापोपशामकं किन्तु कामदं सकलमनोरथपूर्तिकरम् । ननु स्वकान्तस्येदं कृत्यमिति चेत् तत्राहुः ॥ कान्तेति ॥ ननु योगिध्येयः कस्यापि कान्तो न भवति, कुतो भवतीनामित्याशङ्क्याहुः ॥ श्रियः करस्य ग्रहो ग्रहणं येन तत् । यथा तत्र गृहस्थो भगवान् यथा श्रियं हस्ते गृहीतवाँस्तस्माच्छिरसि हस्तं धारयतु, नास्ति किञ्चिद्बाधकमिति भावः । ननु श्रियो विधिपूर्वकं हस्तग्रहणम्भवतीनां शिरोग्रहणे को हेतुरस्तीति चेत्तत्राहुः ॥ शरणमीयुषां तव शरणागतत्वाभिलाषाणां विरचितमभयं येन तत् । एवञ्च विवाहितापेक्षयापि शरणागतानामस्माकं कामशत्रोः सकाशात् पालनमत्यावश्यकम् । शरणागतपालनस्येश्वरस्य तव निजधर्म्मत्वात् । ननु तथापि निषिद्धोऽयं प्रकारः सर्वथापि वर्जनीय इतिचेत् तत्राहुः ॥ वृष्णिधुर्य्य, यदुकुलोद्भवस्य बहुस्त्रीकस्य वृष्णेर्वंशधुर्य्यः श्रेष्ठो भवान् पतित्वेन वृतोऽस्माभिरतो नास्ति दोषः । तस्माद् दृष्टादृष्टदुःखमपाकर्तुं योग्योऽसीति भावः । यद्वा यस्माद्विश्वस्य गुप्तये भगवत उद्यस्तस्मादावश्यकत्वाद्यथाऽस्मद्रक्षणं तथा त्वयावश्यं विधेयमित्याहुः ॥ विरचितेति ॥ मदीया भवत्य इत्याश्वासनार्थं करसरोरुहं नः शिरसि निधेहि तत्स्थापनेन त्रिवर्गसिद्धिरस्माकं भविष्यतीत्याशयेनाहुः ॥ कामदम् ॥ यतोऽस्मत्कान्तत्वेनावतीर्णस्य भगवतोऽस्मन्मनोरथपूर्तिरावश्यकीत्याशयेन सम्बोधयन्ति ॥ कान्तेति ॥ ननु भवतीनां सन्ति पतयोऽतः कथमहं कान्तः, कथं च मद्धस्तसरोरुहं कामदमितिचेत् तत्राहुः ॥ श्रीकरग्रहम् ॥ यथा श्रीपतित्वेन प्रसिद्धा अपि न वस्तुतः श्रियः पतयः, किन्तु सुव-

र्णादिमायिकरूपापन्नायास्तस्याः । अत एव भगवद्धस्तकमलं तत्करग्रहं, तथाऽस्माकमपि मायिकरूपान्तरमभजँस्ते । मुख्यस्तु कान्तो भवानेवात एवास्मान् स्वीकृतवानित्याशयः ॥ किञ्च, संसृतेर्भयाच्छरणमीयुषां विरचिताभयं मोक्षप्रदं चरणं प्रपन्नानामित्यर्थः । सर्वस्य मनोरथानुरूपफलप्रदानाय वृष्णिषु श्रेष्ठत्वेन भवानवतीर्ण इत्याशयेनाहुः ॥ वृष्णिधुर्य्य ॥ अनभिज्ञापक्षे, युष्मत्प्रार्थनामाकर्ण्य स्वस्मिँस्तत्करणसामर्थ्यमवधार्य्याहं प्रकटितो भविष्यामीति तदभिप्रायमालक्ष्य सुकरं प्रार्थयन्ति ॥ हे कान्त, करसरोरुहं नः शिरसि धेहि । किमर्थमितिचेत् तत्राहुः ॥ कामदम् ॥ शरप्रहारपरस्य कामस्य खण्डनकरं तदुद्दीपकं च । अनेन रतिप्रार्थनमपि व्यञ्जयन्ति । अन्यथा सर्वाप्यस्माकम् अलंक्रिया कान्ताननुमोदनाद् वृथाभविष्यतीत्याशयेनाहुः ॥ श्रीकरः सर्वशोभापूर्तिकरः ग्रहो येन यत्कर्तृकं शिरोग्रहणं सर्वालङ्कारशोभाकरमिति यावत् । नन्वार्य्यमार्गाद् यद्भयं तत्सत्त्वे कथं तेन सुखं भविष्यतीति चेत्तत्राहुः ॥ सम्यक्सृतेर्मार्गाद्यद्भयं तदुल्लङ्घनजन्यं तस्मादपि तव शरणं गतानां विरचिताभयम् । इन्द्रादेरपि पराजयं कर्तुं समर्थस्य तव त्वदीयानां च नास्ति सन्मार्गादपि भयम् । प्रबलेन त्वया प्रवर्तितस्य सन्मार्गत्वात् । तदुक्तं, सर्वं बलवतां पथ्यं सर्वं बलवतां शुचि ॥ सर्वं बलवतां धर्म्मः सर्वं बलवतां स्वकमिति । प्रागयं वसुदेवस्येत्यनुरोधेन वृष्णिधुर्य्येति सम्बोधनम् । तथाच पालनशक्तिमतस्तवास्मत्पालनमेवोचितमिति तदाशयः ॥ मानिनीपक्षे, नोऽस्माकं मध्ये तव सतः सम्यक्पलायनादितोऽपि दूरतरातिरोधानाद्यद्भयं तस्माच्छरणं प्राप्तानां शिरसि करसरोरुहं निधेहि । यतः पूर्वं विरचितमभयं येन । जन्मान्तरे क्षत्रवंशोद्भवत्वाद् भयप्रदत्वमुचितमेव तव हस्तस्येति द्योतयन्त्यः सम्बोधयन्ति ॥ हे वृष्णिधुर्य्येति ॥

पुनश्च हे तत्कान्त ॥ तासां कामद । तथाच कान्तभावमङ्गीकृत्य येन हस्तकमलेन कामं दत्तवाँस्तस्याधुना शिरसि स्थापने को विलम्ब इति भावः । पुनश्च, श्रीकरग्रहम् ॥ शोभाकरग्रहणयोग्यम् । तथाच तदभावे तासां शिर एव पतिष्यतीति भावः ॥

निवृत्तिपक्षे, अतः स्वस्वरूपप्रकाशनार्थं त्वं कुर्विति प्रार्थयन्ति । विरचितेति ॥ हे वृष्णिधुर्य्य, नृणां निःश्रेयसार्थं गृहीतकृष्णाद्यवतार, तव शरणमीयुषां भगवच्चित्तत्वादिमपन्नलक्षणवतां श्रीकरग्रहं मोक्षश्रीसम्पादकमाग्रहं नोऽस्माकं श्रुतीनां शिरसि मस्तके उपनिषद्भागे, कं तद्रूपो रसो, ब्रह्मानन्दात्मकरसं राति ददातीति करमरस्त्वं निधेहि । श्रीकरेति सम्बोधनं वा । तथात्वे सति मत्प्राप्तिस्तेषां सुकरेत्याहुः ॥ हे कान्त ॥ अस्मत्प्रतिपाद्य, कामं द्यति खण्डयतीति तं सर्ववासनोच्छेदकरम् । पुनश्च, अरुहम् अरूणि वेदरूपशब्दप्रमाणाद् बाह्यानि मतानि हन्तीति तथा तम् । अत एव संसृतेर्भयाद्विरचिताभयम् । एवम्भूतग्रहस्य त्वत्कृपां विनोदयासम्भवात्तदर्थं त्वां प्रार्थयाम इति भावः ॥ ५ ॥

अपराः प्रार्थयन्ति ।

व्रजजनार्तिहन् वीरयोषितां
निजजनस्मयध्वंसनस्मित ॥
भज सखे भवत्किङ्करीः स्म नो
जलरुहाननं चारु दर्शय ॥ ६ ॥

व्रजजनार्तिहन् व्रजजनपीडानाशाय कृतावतार । तथाच स्वावतारसामान्यप्रयोजनमवलोक्याप्यस्मदार्तिनाशनं तवोचितम् । न चातोऽधिका काचिदार्तिरस्त्यस्माकमिति भावः । किञ्च, हे

योषितां वीर दानशूर ब्रह्मादिभिरप्यशक्यपूरणाया अस्मदिच्छायाः पूरक । ननु सत्यमेवं तथापि भवतीनां मानरूपं दोषमवलोक्य तन्निरासाय तिरोहितोऽस्मीतिचेत् तत्राहुः ॥ निजेति ॥ निजजनानामस्मदादिस्वसेवकानां स्मयस्य गर्वस्य ध्वसनं स्मितं यस्य । तथाच स्मितमात्रस्यैवोत्कटप्रार्थनोत्पादनेन तन्नाशकस्य सम्भवान्न किमर्थं तिरोधानाय प्रवृत्तोऽसीति भावः ॥ स्मितेन हाससङ्केतेनैव गर्वध्वंसो भवतीति वा । अतोऽस्मान् भज सेवय । ननु पालनप्रार्थनाधिकारवतीनां, भजेति प्रार्थनादद्यापि स्मयो न निवृत्त इति गम्यत इतिचेत् तत्राहुः ॥ भवत्किङ्करीरिति ॥ अस्मत्कृतसेवनसदृशभवत्कर्तृकसेवनेनैवास्मत्पालनं नान्यथा । तच्चावश्यकम् । ये यथा मां प्रपद्यन्ते ताँस्तथैव भजाम्यहमितिभवत्प्रतिज्ञामत्त्वात् तदनुसारेण गृहीतसखिभावस्य यथोक्तप्रार्थनायामनौचित्यशङ्का नो कार्येति द्योतनाय संबोधयन्ति ॥ हे सख इति ॥ अस्मत्कैङ्कर्यं प्रसिद्धम् । यद्वा यथेच्छास्ति तथा कुरु, संप्रति तु कमलात्मकं स्वमुखं चारुमनोहरमस्माकं दर्शयेति सदैन्यं प्रार्थनम्॥ अनभिज्ञापक्षे, हे वीर प्रदेयस्य दाने समर्थ नोऽस्मान् भजाऽस्मन्निकटे सर्वदा तिष्ठ । प्रथमं तु चारु जलरुहाननं योषितामबलानां नो दर्शय । यतो, हे व्रजजनार्तिहन् ॥ अन्यथास्मन्मरणावश्यम्भावादार्त्तिनाशनव्रतभङ्गः स्यादिति भावः । गर्वध्वंसनायान्तर्धानं नोचितं, तस्य सुकरोपायसाध्यत्वादित्याशयेनाहुः ॥ निजेति ॥ ननु पूर्वं कुतो गर्वं कृतवत्य इत्याशङ्क्य किंकरीणामप्यस्माकं त्वयैव सख्यपदे स्थापितत्वादित्याशयेनाहुः ॥ सखे, भवत्किङ्करीरिति ॥ यद्वा अस्मत्त्याग एव यदि तत्राग्रहस्तर्हि संप्रत्यस्मन्मरणकाले चारु स्वमुखपद्मं संदर्शय, दृष्ट्वा प्राणत्यागं करिष्याम इत्यर्थः ॥ मानिनीपक्षे, व्रजजनार्तिहर्तापि योषितां वीरस्तद्वधे समर्थः । अत एव

# विज्ञापनम् ।

## बनारससंस्कृतसीरीज़नाम्नी वाराणसेयसंस्कृतपुस्तकावली ।

इयं पुस्तकावली खण्डशो मुद्रिता भवति । अस्यां संस्कृतभाषानिबद्धा बहवः प्राचीना दुर्लभा उत्तमोत्तमाः केचिदङ्गलभाषानुवादसहिताश्च ग्रन्था मुद्रिता भवन्ति । तांश्च ग्रन्थान् काशिकराजकीयसंस्कृतपाठशालीयपण्डिता अन्ये ऽपि विद्वांसः शोधयन्ति । यैर्ग्राहकमहाशयैरियं पुस्तकावली नियमेनाविच्छेदेन संग्राह्या तैस्तदेकैकस्य खण्डस्य कृते ।॥) मूल्यं प्रापणव्ययश्च =) देयः । अन्यैर्महाशयैर्यैः कानिचित् खण्डानि संग्राह्याणि तैश्च प्रत्येकं खण्डानां कृते १) मूल्यं प्रापणव्ययश्च =) देय इति ॥

### तत्र मुद्रिता ग्रन्थाः ।

| | रु० | आ० |
|---|---|---|
| सिद्धान्ततत्त्वविवेकः खण्डानि ५ | ५ | ० |
| अर्थसङ्ग्रहः अंग्रजीभाषानुवादसहितः | १ | ० |
| तन्त्रवार्त्तिकम् खण्डानि १३ | १३ | ० |
| कात्यायनमहर्षिप्रणीतं शुक्लयजुःप्रातिशाख्यम् सभाष्यं ख०६ | ६ | ० |
| सांख्यकारिका चन्द्रिकाटीकागौडपादभाष्यसहिता | १ | ० |
| वाक्यपदीयम् खण्डानि ६ ( प्रथमभागः प्रथमद्वितीयकाण्डे पुण्यराजटीकासहित खण्डानि ३ । द्वितीयभागः तृतीयाकाण्डम् हेलाराजटीकासहित खण्डानि ३ ) | ६ | ० |
| रसगङ्गाधरः खण्डानि ९ | ९ | ० |
| परिभाषावृत्तिः खण्डे २ | २ | ० |
| वैशेषिकदर्शनं किरणावलीटीकासंवलितप्रशस्तपादप्रणीतभाष्यसहितम् खण्डे २ | २ | ० |
| शिक्षासङ्ग्रहः खण्डानि ५ | ५ | ० |
| नैष्कर्म्यसिद्धिः खण्डानि ४ | ४ | ० |
| महर्षिकात्यायनप्रणीतं शुक्लयजुस्सर्वानुक्रमसूत्रम् सभाष्यम् | ३ | ० |
| ऋग्वेदीयशौनकप्रातिशाख्यं सभाष्यम् खण्डानि ४ | ४ | ० |
| (बृहत्) वैयाकरणभूषणम् पदार्थदीपिकासहितम् खण्डानि ४ | ४ | ० |
| विवरणोपन्यासः सटीकवाक्यसुधासहितः खण्डे २ | २ | ० |

| | | |
|---|---|---|
| तत्त्वदीपनम् ( पञ्चपादिकाविवरणस्य व्याख्यानम् ) ख० ८ | ८ | ० |
| वेदान्तदीपः (श्रीभगवद्रामानुजाचार्यविरचितः) खण्डानि ३ | ३ | ० |
| टुप्टीका खण्डानि ४ | ४ | ० |
| पातञ्जलदर्शनम्।श्रीरामानन्दयतिकृतमणिप्रभाऽख्यवृत्ति ख० १ | १ | ० |
| व्याकरण मिताक्षरा । श्रीमदन्नभट्टप्रणीता खण्डानि १० | १० | ० |
| रसमञ्जरी । व्यङ्ग्यार्थकौमुद्या प्रकाशेन च सहिता ख० ३ | ३ | ० |
| भेदधिक्कारः व्याख्यासहित. श्रीमदप्पयदीक्षितकृत उपक्रम पराक्रमसहितः खण्डे २ | २ | ० |
| बोधसारो नरहरिकृत तच्छिष्यदिवाकरकृतटीकया स० ख० १० | १० | ० |
| ब्रह्मसूत्रदीपिका श्रीमच्छङ्करानन्दभगवद्भिरचिता खण्डे २ | २ | ० |
| दैवज्ञकामधेनुः अर्थात् प्राचीनज्योतिषग्रन्थः खण्डानि ३ | ३ | ० |
| श्रीमदणुभाष्यम् । श्रीश्रीवल्लभाचार्यविरचितम् । गोस्वामिश्रीपुरुषोत्तमजी महाराजविरचितभाष्यप्रकाशाख्य-व्याख्या समेतम् खण्डानि १५ | १५ | ० |
| तत्त्वशेखरः । श्रीभगवल्लोकाचार्यप्रणीतः । तथा—तत्त्वत्रयचुलुक-संग्रहः । कुमारवेदान्ताचार्यश्रीमद्वरदगुरुविरचितः । | १ | ० |
| श्रीभाष्यवार्तिकम् ।श्रीमद्रामानुजाचार्यविशिष्टाद्वैतसिद्धान्तप्र-तिपादनपरम् । यतीन्द्रमतदीपिका च । श्रीगोविन्दाचार्यसूनु-श्रीनिवासाचार्यकृता । सकलाचार्यमतसंग्रहश्च । खण्डे २ | २ | ० |
| गूढार्थदीपिका । श्रीमद्भागवतदशमस्कन्धस्थरासपञ्चाध्यायी-व्याख्या खण्डे २ । | २ | ० |
| आश्वलायनसूत्रप्रयोगदीपिका । श्रीविद्वद्वरमंचनाचार्यभट्ट-विरचिता खण्डे २ । | २ | ० |
| काव्यालंकारसूत्राणि । पण्डितवरवामनविरचितवृत्तिसमेतानि कामधेनुसमाख्यव्याख्यासहितानि खण्डे २ । | २ | ० |
| श्रुत्यन्तसुरद्रुमः । श्रीपुरुषोत्तमप्रसादविरचितः खण्डानि ३ । | ३ | ० |
| चतुर्विंशतिमतसंग्रहः । श्रीभट्टोजिदीक्षितसंकालितः खण्डे २ । | २ | ० |


**ब्रजभूषण दास और कम्पनी**

चांदनीचौक के उत्तर नई सड़क बनारस सिटी।